NOT TO BE ISSUED
OUT OF THE LIBRARY.



Digitized with financial assistance from
Hemendra Kothari
on 06 November, 2019

JAC
181 · 452
Pat / Pet
42122
00042122

42122

पातंजलदर्शनम्।

समाधिपादः।

॥ श्री नमोगणेशाय ॥

अथ योगानुशासनम् ॥ १ ॥

यस्यक्वा रूपमाद्यं प्रभवति जगतोनेकधानुग्रहाय
शेषोऽसौ शरारिर्विषमविषधरोऽनेकवक्त्रः सुभोगी।
सर्वज्ञानप्रसूतिर्भुजगपरिकरः प्रीतये यस्य नित्यम्,
देवोऽव्यो वोऽव्यात् सितविमलतनुर्योगदोयोगयुक्तः ॥१॥

अथेत्ययमधिकारार्थः। योगानुशासनं शास्त्रमधि-

नमामि जगदुत्पत्तिस्थितये हृषकेतवे।
क्लेशकर्म्मविपाकादिरहिताय हिताय च ॥
नत्वा पतञ्जलिमृषिं वेदव्यासेन भाषिते।
सङ्क्षिप्तस्पष्टवक्ष्यार्थां भाष्येव्याख्या विधास्यते ॥

इह हि भगवान् पतञ्जलिः प्रारिप्सितस्य शास्त्रस्य सङ्क्षेपतस्तात्पर्यार्थं प्रेक्षा-
पूर्वकारित्वात् प्रत्यक्षं श्रोतृन् सुखावबोध माचिख्यासुरादाविदं सूत्रं रचयाञ्चकार।

कृतं। वेदितव्यम्। योगः समाधिः स च सार्व्वभौम
चित्तस्य धर्म्मः। क्षिप्तं मूढं विक्षि मेकाग्रं नि
मिति चित्तभूमयः। तत्र विक्षिप्ते चेतसि वि

अथ योगानुशासनं। तत्र प्रथमावयवमथशब्दं व्याचष्टे। अधेत्ययमधिकारार्थ
थेष ज्योतिरितिवत् नत्वानन्तर्य्यार्थः। अनुशासनमिति हि शास्त्रमाह अनु
तेऽनेनेति व्युत्पत्त्या। नचास्य शमदमाद्यनन्तरं प्रवृत्तिः। अपि
चिख्यापयिषानन्तरम्। जिज्ञासाज्ञानधीस्तु स्यात् यथाम्नायते तस्मात्
दान्त उपरत स्तितिक्षुः समाहितीभूत्वात्मन्येवात्मानं पश्येदित्यादि
थरथरसायनाद्युपयोगानन्तर्यस्य च सर्व्वेषि नाभिधानम्। अ
त्थोरनुपयोगात्। प्रामाणिकत्वे योगानुशासनस्य तदभावे प्युपेयत्वात्
माणिकत्वे च तद्भावेपि हेयत्वात् एतेन तत्त्वज्ञानचिख्यापयिषधीर
धानं परास्तम्। अधिकारार्थत्वे तु शास्त्रेणाधिक्रियमाणस्य योगस्याभिधानात्
सकलशास्त्रतात्पर्य्यार्थव्याख्यानेन शिष्यः सुखेनैव बोधितश्च प्रवर्त्तितश्च भवती
निश्रेयसस्य हेतुः समाधिरिति हि श्रुति स्मृति इतिहास पुराणेषु प्रसि

ननु किं सर्व्वं सन्दर्भं गतीऽत्र शब्दोऽधिकारार्थः। तथासत्यथातो ब्रह्म
दावपि प्रसङ्ग इत्यत आह। अथमिति॥ ननु हिरण्यगर्भो योगस्य व
पुरातन इति योगी याज्ञवल्क्य स्मृतेः कथं पतञ्जलि योगशास्त्रत्व मित्याशङ्क्य सू
कारेणानुशासनमित्युक्तं। शिष्टस्य शासनमनुशासनमित्यर्थः। यदा अथम
ऽधिकारार्थस्तदेष वाक्यार्थः सम्पद्यते इत्याह॥ योगानुशासनं शास्त्रमधि
ननु श्रुत्पाद्यमानतया योगोवाधिक्रियते न तु शास्त्रमित्यत आह। वेदि
इति। सत्यं श्रुत्याद्यमान तया योगः प्रस्तुतः स तु तद्विषयेण शास्त्रेण करण
श्रुत्पाद्यः करणगोचरश्च श्रुत्पादकस्य व्यापारो न कर्म्मगोचर इति

सर्व्वभौमः समाधिर्न योगपक्षे वर्त्तते यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्म्मबन्धनानि

व्यापार विवक्षया योग विषयस्य शास्त्रस्याधिकृतत्वं वेदितव्यं। शास्त्रव्यापार-गोचरतयातु योगएवाधिकृत इति भावः। अधिकारस्य चाथशब्दस्यार्थं नीय-मानोदकुम्भदर्शनेनिव श्रवणं मङ्गलायोपकल्पत इति मन्तव्यं।

शब्दसन्देह निमित्तमर्थसन्देहमपनयति॥ योगः समाधिः। युज समाधा वित्यस्माद्भावत्पन्नः समाध्यर्थो न तु युजिर योगद्वित्यस्मात् संयोगार्थः इत्यर्थः।

ननु समाधिरपि वक्ष्यमाणस्याङ्गिनो योगस्याङ्गं। नचाङ्गमेवाङ्गीत्यत आह॥ स च सार्व्वभौम चस्त्वर्थोऽङ्गादङ्गिनं भिनत्ति भूमयोऽस्या वक्ष्यमाणा मधुमती मधुप्रतीका विशोका संस्कारशेषाश्चित्तस्य तासु सर्व्वासु विदितः। सार्व्वभौम श्चित्तनिरोध लक्षण योगस्तदङ्गन्तु समाधि नैवं भूतः व्युत्पत्तिनिमित्त माचाभिधानं चैतद्योगः समाधिरिति। अङ्गाङ्गिनी रभेद विवक्षामाश्रित्य। प्रवृत्तिनिमित्तन्तु योग शब्दस्य चित्तवृत्ति निरोध एवेति परमार्थः। वृत्तयो ज्ञानान्यात्मायानि अतस्तन्निरोधाय्यात्मायएवेति। ये पश्यन्ति तान्निरासायाह। चित्तस्य धर्म्म इति। चित्तशब्देनात्मः करणं बुद्धिमुपलक्षयति। नहि कूटस्यनित्या चिति शक्तिरपरिणामिनी ज्ञानधर्म्मा भवितुमर्हति। बुद्धिस्तु भवेदिति भावः।

स्यादेतत् सार्व्वभौमश्चेद्योगः कृत्स्न भोः चित्त मूढ विचित्रा अपि चित्त भूमयोऽस्ति च परम्परापेक्षयाऽस्ति निरोधोप्यस्तिति तत्रापि योगत्व प्रसङ्ग इत्याशङ्क्य हेयोपादेय भूमीरुपन्यस्यति। चित्तमित्यादि॥ क्षिप्तं सदेव रजसा तेषु तेषु विषयेषु क्षिप्यमाण मत्यन्तमस्थिरं। मूढन्तु तमःसमुद्रेकान्निद्रा हरिमत्। विक्षिप्तं क्षिप्ताद्विशिष्टं विक्षितं विशेषोऽस्यैव सत्वस्य कादाचित्कः

श्रयति निरोधमभिमुखं करोति स सम्प्रज्ञातो योगइत्याख्यायते। स च वितर्कानुगतो विचारानुगतोऽस्मितानुगत इत्यूपरिष्टात् प्रवेदयिष्यामः। सर्व्ववृत्तिनिरोधे त्वसम्प्रज्ञातः समाधिः॥ १॥

स्थैर्य्यं सा चाच्छा स्थैर्य्यवत्ता सात्त्विकी वा वक्ष्यमाण व्याधिप्रत्यूहाना प्रत्यूहाय जनित वा। एकाग्र्यमेकाग्रता। निरुद्धसकल वृत्तिकं संस्कार मात्रशेषं चित्तं निरुद्धं। तत्र चित्तमूढ्यौ: सत्यपि परस्परापेक्षत्वाद् वृत्तिनिरोधे। पारम्पर्य्येणापि निश्रेयसहेतुभावाऽभावात्। तदुपघातकत्वाच्च योगपक्षाद्बहि र्व्यावर्त्तितत्वमिति। न तयोर्योगत्वं निषिद्धं। विक्षिप्तस्य तु कादाचित्क सद्भूत विषय स्थैर्य्यशालिन: सम्भाव्येत योगत्व मिति निषेधति। तत्र विक्षिप्ते चेतसि समाधि: कादाचित्क: सद्भूत विषयस्य चित्तस्य स्थैर्य्या न योगपक्षे वर्त्तते। कुत यतस्तद्विपक्ष विक्षेपोपसर्जनीभूत: विपक्ष वर्गान्तर्गतस्य हि स्वरूप मेव दुर्लभं प्रागेव कार्य्य करणं। न खल दहनान्तर्गतं बीजं चिरतरत्वावस्थित मुत्तमप्यङ्कुराय कल्पत इतिभाव:।

यदि विक्षेपोपसर्जनीभूत: समाधिर्न योग: कस्तर्हि इत्यत आह यस्त्वेकाग्र्य चेतसि इति। भूतमिति समारोपितमर्थं निवर्त्तयति। निद्रावृत्तिरपि स्वालम्बने तमसि भूते भवत्येकाग्र्यमत उक्तम्। सदिति श्रीभवं नितान्ताविर्भूतत्वं तम:समुद्रेकस्वभावत्वस्य क्लेशहेतुत्वादिति द्योतनं हि तत्त्वज्ञान मागमादाऽनुमानाद्वा भवदपि परोक्ष रूपतया न साक्षात्कारवती मविद्यामुच्छिनत्ति।

विचन्द्र दिङ्मोहादिव्यवच्छेदकत्वादत आह। प्रज्ञेति। प्रज्ञाद्दीप्ति: प्रकर्ष द्योतयन् साक्षात्कारं सूचयति। अविद्यामूलत्वादस्मितादीनां क्लेशानां विद्यायाश्च अविद्याच्छेदरूपत्वात् विद्योदये चाविद्या क्लेशसमुच्छेदो विरोधित्वात्

तस्य लक्षणाभिधित्सयेदं सूत्रं प्रवर्तते—

योगश्चित्तवृत्तिनिरोधः ॥ २ ॥

सर्व्वशब्दाग्रहणात् सम्प्रज्ञातोपि योगइत्याख्यायते।

कारण विनाशार्थ त्याह। क्षिणोतीचेति। अतएव कर्म्म रूपाणि बन्धनानि श्लथयति। कर्म्म चावापूर्व्वमभिमतं कार्य्यं कारण उपचारात् श्लथयति। स्वकार्य्याद् वसादयति। वक्ष्यतिहि सति मूले तद्विपाक इति किंच निरोधमभिमुखं करोत्यभिमुखी करोति। सच संप्रज्ञातयतुःप्रकार इत्याह। सचेति। 'असंप्रज्ञातमाह सर्व्ववृत्तिभिः। रजस्तमोमयी किल प्रमाणादि वृत्तिः सात्विकीं वृत्तिमुपादाय संप्रज्ञाते निरुद्धा। असम्प्रज्ञाते तु सर्व्वासामेव निरोध इत्यर्थः। तदिह भूमिद्वये समाप्ता या मधुमत्यादयो भूमयस्ताः सर्व्वासासु विदितः सार्व्वभौम इति सिद्धं ॥१॥

द्वितीयं सूत्रमवतारयति। तस्य लक्षणेति। तस्येति पूर्व्वसूत्रोपात्तं। द्विविधं योगं परामृशति। योगश्चित्तवृत्ति निरोधः। निरुद्धे यस्मिन् प्रमाणादि वृत्तयोऽवस्थाविशेषे चित्तस्य सोवस्थाविशेषो योगः।

ननु संप्रज्ञातस्य योगस्य व्यापकत्वात् अलक्षणमिदं मनिरुद्धाहि तत्र सात्विकी चित्त वृत्ति रित्यत आह। सर्व्वशब्दाग्रहणादिति। यदि सर्व्वचित्तवृत्तिनिरोध इत्युच्यते भवेदव्यापकं संप्रज्ञातस्य क्लेशकर्म्मविपाकाश्रव परिपन्थी चित्तवृत्तिनिरोधस्तु तमपि संगृह्णाति तत्रापि रजसतामसचित्तवृत्तिनिरोधात्तस्य च तद्भावादित्यर्थः। कुतः पुनरेकस्य चित्तस्य क्षिप्तादिभूमिसम्बन्धः। किमर्थं चैवमवस्थस्य चित्तस्य वृत्तयोनिरोद्धव्या इत्याशङ्क्य प्रथमंतावदवस्थासम्बन्ध हेतुमुपन्यसति। चित्तं हीति। प्रख्याशीलत्वात् सत्वगुणं। प्रवृत्तिशीलत्वाद्रजोगुणं। स्थितिशीलत्वात्

चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुण
प्रख्यारूपं हि चित्तसत्त्वम्। रजस्तमोभ्यां संसृ
ऐश्वर्यविषयं प्रियं भवति। तदेव तमसानुविद्धमधर्मा

तमोगुणं। प्रख्यायहणमुपलक्षणार्थं तेनान्येपि सात्विकाः। प्रसादलाघवप्रीत्यादयः सूच्यन्ते प्रवृत्त्या च परितापशोकादयो राजसाः प्रवृत्तिविरोधी तमोनिमित्तधर्मः स्थितिः। स्थितिग्रहणाद् गौरवावरणदैन्यादयोपलक्ष्यन्ते। एतदुक्तं भवति एकमपि चित्तं त्रिगुणनिर्मिततया गुणानाञ्च वैलक्षण्येन परस्परविमर्दे वैचित्र्या द्विचित्रपरिणामं सदवैकाग्र्यमुपपद्यत इति।

चित्तमाद्या एव चित्तस्य भूमिः यथासम्भवमवान्तरावस्थाभेदवतीं तां दर्शयति। प्रख्यारूपं हीति चित्तरूपेण परिणतं सत्त्वं चित्तसत्त्वं तदेव प्रख्यारूपतया सत्त्वप्राधान्यं चित्तस्य दर्शितं तच्च चित्ते सत्त्वात् किञ्चिदूने रजस्तमसी यदा मिथः समे च भवतः तदैश्वर्यञ्च विषयाश्च शब्दादयस्तान्येवप्रियाणि यस्य तत्तथोक्तं सत्त्वप्राधान्यात् खलु चित्तं तत्त्वं प्रणिधित्सदपि तत्त्वस्य तमसापिहितत्वादनिमादिकमेव तत्त्वमभिमन्यमानं तत्प्रणिधित्सति प्रणिधत्ते च चलं अथ रजसाक्षिप्तमात्रं। तत्राप्यलब्धस्थिति तत् प्रियमात्रं भवति। शब्दादिषु पुनरस्य स्वरसवाही प्रेम्णि रूढ एव। तदनेन विक्षिप्तं चित्तमुक्तं चित्तं दर्शयन् मूढमपि सूचयति। तदेवतमसेति। यदाहि तमो रजो विजित्य प्रसृतं। तदा चित्तसत्त्वावरकतमः समुत्थानेऽशक्तत्वात् रजस्तमस्थगितं चित्तमधर्मादिमुपगच्छति अज्ञानञ्च विपर्ययज्ञानं तमोभावप्रत्ययालम्बनञ्च निद्राज्ञानमुक्तं। ततश्च मूढावस्थापि सूचितेति। अनैश्वर्यं सर्वत्रेच्छाप्रतिघातः। अधर्मादिव्याप्तं चित्तं भवतीत्यर्थः। यदा तु तदेव चित्तं सत्त्वमाविर्भूतसत्त्वमपगततमःपटलं सरजस्कं भवति। तदा धर्मज्ञानवैराग्यैश्वर्यमुपगच्छतीत्याह प्रधीयेत्यादि। नीहारमलदेव चावरणं प्रकर्षेण चीयते

ानावैराग्यानैश्वर्योपगं भवति। तदेव प्रक्षीणमोहावरणं र्व्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्म्मज्ञानवैराग्य ऐश्वर्योपगं भवति तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्वपुरुषान्यताख्यातिमात्रं धर्म्ममेघध्यानोपगं भवति। तत्परं प्रसङ्ख्यानमित्याचक्षते ध्यायिनः। चितिशक्तिरपरिणामित्यप्रतिसङ्क्रमा दर्शितविषया शुद्धा चानन्ता च सत्व-

तत्त्वधीकं। अतएव सर्व्वतो विशेषाविशेषलिङ्गमात्राऽलिङ्गपुरुषेषु प्रद्योतमानं तथापि न धर्म्मायैश्वर्य्याय च कल्पते प्रहत्यभावादित्यत आह। अनुविद्धं रजः मात्रया रजसः प्रवर्त्तकत्वादस्मि धर्म्मादिरित्यर्थः। तदनेन संप्रज्ञातसमाधिसम्पन्नयो सदृशमिकप्रज्ञाज्योतिषोर्मध्याधमयो र्योगिनोश्चित्तसत्वं संगृहीतं संप्रत्यतिक्रान्तभावनीयस्य ध्यायिनश्चतुर्थस्य चित्तावस्थामाह। तदेव चित्तं रजोलेशमलादपेतं अतएव स्वरूपप्रतिष्ठमश्मासवैराग्यपुटपाकप्रकर्षविधुतरजस्तमो मलस्यहि बुद्धिसत्वतपनीयस्वरूपप्रतिष्ठस्य विषयेन्द्रियप्रत्याङ्गतस्य निवसिताधिकारतया च कार्य्यकारिणी विवेकख्यातिः परं कार्य्यमवशिष्यत इत्याह। सत्वपुरुषान्यताख्यातिमात्रं चित्तं धर्म्ममेघध्यानोपगं भवति। धर्म्ममेघस्य वक्ष्यते। अत्रैव योगिजनप्रसिद्धिमाह।

तदिति। सत्वपुरुषान्यताख्यातिमात्रं चित्तं धर्म्ममेघपर्य्यन्तं परं प्रसंख्यानमिति आचक्षते ध्यायिनः. चित्तसामानाधिकरण्यं च धर्म्मधर्म्मिणोरभेदविवक्षया द्रष्टव्यं। विवेकख्यातेर्हानहेतुं चितिशक्तीपदानहेतुं निरोधसमाधिमवतारयितुं चितिशक्तेः साधुतामसाधुतां च विवेकख्यातिर्दर्शयति। चितिशक्तिरित्यादि सुखदुःखमोहात्मकत्वमनुद्धिः। सुखमोहावपि विवेकिनं दुःखाकुरुत। अतो दुःखबद्धियो तथाचातिसुन्दरमप्यत्नवतदुनीति। तेन तदपि हेयमेव विवेकिनः सेयमविप्लवविरत्नस्य। चिति शक्तौ पुरुषेण स इत्युक्तं शुद्धा चानन्ता चेति। ननु सुख-

गुणात्मिका चेयम्। अतो विपरीता। विवेकख्यातिरित्यतस्स्यां विरक्तं चित्तन्तामपि ख्यातिं निरुणद्धि। तदवस्थं चित्तं संस्कारोपगं भवति। स निर्बीजः समाधिः, न तत्र किञ्चित् सम्प्रज्ञायतइत्यसम्प्रज्ञातः द्विविधः स योगश्चित्तवृत्तिनिरोध इति ॥ २ ॥

दुःखमोहात्मकशब्दादीनि यं चेतयमाना तदाकारापन्ना कथं विमुहा तदाकारपरिग्रहपरिवर्जने च कुर्वती कथमेनन्त्यजेत्यत उक्तं।

दर्शितविषयेति। दर्शितो विषयः शब्दादि यस्येमा तथोक्ता भवेदेतदेवं। यदि बुद्धिवच्चितिशक्तिर्विषयाकारतामापद्येत। किन्तु बुद्धिरेव विषयाकारेण परिणता सती अतदाकारायैश्चितिशक्तेर्विषयमादर्शयति ततः पुरुषस्त्यजेत इत्युच्यते। ननुविषयाकारां बुद्धिमनारूढाया चितिशक्तेः कथं विषयवेदं विषयान्तरेहे वा कथं न तदाकारापत्तेरिति। अतः उक्तं। अप्रतिसंक्रमेति। प्रतिसंक्रमः सञ्चारः सचितेर्नास्तीत्यर्थः। स एव कुतोस्यां नास्तीत्यत उक्तं। अपरिणामिनीति। न चिति स्त्रिविधोपि धर्मलक्षणावस्थालक्षणः। परिणामोऽस्ति येन क्रियारूपेण परिणता सती बुद्धिसंयोगेन परिणमेत चितिशक्तिः असंक्रान्तायाः अपि विषयसम्वेदनमुपपादयिष्यते। तत्सिद्धं चितिशक्तिः प्रतिसंक्रमेति विवेकख्यातिस्तु बुद्धिसत्त्वात्मिका अप्रतिसंक्रमेत्युक्तं। अतश्चितिशक्तेर्विपरीतेति। यदा च विवेकख्यातिरपि हेया तदा कैव कथावृत्त्यन्तराणां दोषबहुलानामिति भावः। ततस्सङ्ख्यातो निरोधसमाधिरेवतारी युज्यते इत्याह। अतस्तस्यामिति। ज्ञानप्रसादमात्रेण हि परेण वैराग्येण विवेकख्यातिमपि निरुणद्धीत्यर्थः। अथ अनिरुद्धाऽशेषवृत्तिचित्तं कीदृशमित्यतआह।

तदवस्थमित्यादि। स निरोधः अवस्था यस्य तत्तथोक्तं। निरोधस्य स्वरूप-

तदवस्थे चेतसि विषयाभावात् बुद्धिबोधात्मा पुरुषः किं स्वभावः ? इति—

तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥ ३ ॥

स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये व्युत्थानचित्ते तु सति तथापि भवन्ति न तथा ।

माह । स निर्बीज इति । क्लेशसहितः कर्माशयो आत्मायुर्भोगबीजं । तस्याश्रितं इति निर्बीजः अस्येव योगिजनप्रसिद्धामन्वर्थसंज्ञामादर्शयति । न तस्येति । उपसंहरति । द्विविधः संयोगश्चित्तशक्तिनिरोध इति ॥ २ ॥

संप्रत्यनुत्तरसूत्रमवतारयंश्चोदयति । तदवस्थे चेतसीति । किमात्मीये तत्तदाकारपरिणतबुद्धिबोधात्मा त्वयं पुरुषः सदानुभूयते । ननु बुद्धिबोधरहितोऽसौ अस्य पुरुषस्य बुद्धिबोधस्वभावः सवितुरिव प्रकाशः न च संस्कारशेषे चेतसि सोऽस्ति न च स्वभावमपहाय भावो वस्तुमर्हतीति इति भावः । स्यादेतत् संस्कारशेषामपि बुद्धिं कस्मात् पुरुषो न बुद्धते इत्यत आह । विषयाभावादिति । न बुद्धिभावं पुरुषस्य विषयोपि तु पुरुषार्थवती बुद्धिः । विवेकख्यातिविषयभोगौ च पुरुषार्थौ तौ च निरुद्धावस्थायां नास्त इति सिद्धो विषयाभाव इत्यर्थः । सूत्रेण परिहरति तदाद्रष्टुः स्वरूपेऽवस्थानं । स्वरूप इत्यारोपितम् । ज्ञाता घोर मूढ स्वरूपं नित्यसंगात पुरुषस्याद्वितीयं स्वरूपं मतीपाधिकम् । ननु बुद्धिबोधः ज्ञातादिरूप औपाधिकः हि सः स्फटिकस्येवस्वभाव स्वच्छधवलस्य जपाकुसुमसन्निधानोपाधिरक्तिमा मणीपाधि निरुत्तापुपहित निरुत्ति रतिप्रसङ्गादितिभावः । स्वरूपस्य चाभेदेपि भेदं विकल्प्य अधिकरण भाव एक इति । अतमेवार्थोभाष्यकृता दीर्यते ।

कथन्तर्हि दर्शितविषयत्वात—

वृत्तिसारूप्यमितरत्र ॥ ४ ॥

व्युत्थाने याः चित्तस्य तद्विशिष्टवृत्तिः पुरुषः । तयाच सूत्रं "एकमेव दर्शनं" ख्यातिरेव दर्शनमिति। चित्तम्। अयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वे न सम्भवति ।

स्वरूप प्रतिष्ठेति । तदानीं निरोधावस्थायां न व्युत्थानावस्थायामिति भावः । स्यादेतत् व्युत्थानावस्थाया मप्रतिष्ठिता स्वरूपे चिति शक्ति निरोधावस्थायां प्रतितिष्ठन्ति परिणामिनी स्याद्व्युत्थाने वा स्वरूपप्रतिष्ठाने सति व्युत्थान निरोधयोरविशेष इत्यत आह । व्युत्थानचित्तेति । न जातु कूटस्थनित्या चितिशक्तिः स्वरूपात्च्यवते । तेन यथा निरोधे तथैव व्युत्थानेपि । न खलु शक्तिकायाः प्रमाण विपर्यय ज्ञानगोचरत्वेपि स्वरूपोदयीव्ययौ भवतः प्रतिपत्तातु तयाभूतमप्यतथात्वेनाभिमन्यते । निरोधसमाधिमपेक्ष्य सम्प्रज्ञातोपि व्युत्थानमेवेति ।। ३ ॥

सूत्रान्तरमवतारयितुं पृच्छति । कथन्तर्हि इति। यदि तथा भवती न तदा केन तर्हिप्रकारेण प्रकाशत इत्यर्थः॥ हेतुपद मध्याहृत्यसूत्रं पठति । दर्शित विषयत्वात् । वृत्तिसारूप्यमितरत्र । इतरत्र व्युत्थाने याश्चित्तवृत्तयः शान्ता घोर मूढाश्च एवाविशिष्टा अभिन्नाहृत्तयो यस्य पुरुषस्य सतथोक्तः सारूप्य मित्यत्र सशब्द एकपर्यायः । एतदुक्तं भवति अपा कुसुम स्फटिकयोरिव बुद्धि पुरुषयोः सन्निधानादभेदग्रहे बुद्धिवृत्तीः पुरुषे समारोप्य शान्तोस्मि दुःखितोस्मि मूढोस्मीति अध्यवस्यति । यथा मलिने दर्पणतले प्रतिबिम्बितं मुखं मलिनमारोप्य श्रीचत्यात्मानं मलिनीकरोति । यद्यपि पुरुष समारोपोपिशब्दादि विज्ञानवत् बुद्धिवृत्तिः यद्यपि च प्राकृततत्वमाचि-

पुरुषस्य स्वामिनः। तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादि-सम्बन्धोहेतुः ॥४॥

दृष्टयानुभाव्य स्तथापि बुद्धेः पुरुषत्वमापादयन् पुरुषवृत्तिरिवानुभव इवावभासते तथाचायमविद्यास्मितात्मा विपर्ययवानिवाभोक्तापि भोक्तेव विवेकख्याति रहितोपि तत्सहित इवाविवेकख्याया प्रकाशते। एतच्च चितेरप्रतिसंक्रमाया स्तदाकारापत्तौ स्वबुद्धि संवेदनमित्यत्र। सत्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्यया विशेषोभोग इत्यत्र चोक्तपादयिष्यते। एतच्च मतान्तरेपि सिद्धमित्याह। तथाचेति पञ्चशिखाचार्यस्य सूत्रम्। एकमेव दर्शनमिति।

ननु कथमेकं दर्शनं यावता बुद्धेः शब्दादि विषया विवेक विषयाच वृत्तिः प्रकृततया जडत्वेनानुभाव्या दर्शनं ततोऽन्यत् पुरुषस्य चैतन्य मनुभवो 'दर्शन मित्यता आह ख्यातिरेव दर्शनमिति तदयमत्ययधर्मिणीं वृत्तिं ख्याति लौकिकी मभिप्रेत्य तदुक्तमेकमेवेति। चैतन्यन्तु पुरुषस्य स्वभावो न ख्यातिः। न तु न लोकप्रत्यक्षगोचरोपि त्वागमानुमानगोचर इत्यर्थः। तदनेन व्युत्थानावस्थायां मूलकारणमविद्यां दर्शयता तद्धेतुकसंयोगो भोगहेतुः। स्वस्वामिभावोपि सूचित इति। तमुपपादयन्नाह। चित्तं स्वं भवति। पुरुषस्य स्वामिन इति सम्बन्धं। ननु चित्त-जनितमुपकारं भजमानो हि चेतनश्चित्तसेवितो। न चास्य तज्जनितोपकार-सम्भवस्तदसम्बन्धादनुपकार्यत्वात् तत्संयोगतदुकारभागित्वे परिणामप्रसङ्गादित्यत आह। अयस्कान्तमणिकल्पं सन्निधिमात्रोपकारिदृश्यत्वेनेति। न पुरुषसंयुक्तं चित्तमपितु तत्सन्निहितं सन्निधिश्च पुरुषस्य न देशतः कालतो वा तदसंयोगात् किन्तु योग्यता लक्षणोऽस्ति च पुरुषस्य भोक्तृशक्तिश्चित्तस्य भोग्यशक्तिः। तदुक्तं। दृश्यत्वेनेति। शब्दाद्याकारपरिणतस्य भोग्यत्वेनेत्यर्थः। भोगश्च क्वापि शब्दाद्या-कारवृत्तिश्चित्तस्य धर्मोक्तयापि। चित्तचैतन्ययोरभेदसमारोपाद्वृत्तिसारूप्यात् पुरुष-

ताः पुनर्निरोद्धव्या बहुत्वे सति चित्तस्य—

वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः ॥५॥

क्लेशहेतुकाः कर्माशयप्रचयक्षेत्रीभूताः क्लिष्टाः । ख्यातिविषया गुणाधिकारविरोधिन्योऽक्लिष्टाः क्लिष्टप्रवाहपतिता अप्यक्लिष्टाः ॥ क्लिष्टच्छिद्रेष्वप्यक्लिष्टा भवन्ति । अक्लिष्टच्छिद्रेषु क्लिष्टा इति । तथा जातीयकाः संस्काराः वृत्तिभिरेव क्लिश्यन्ते संस्कारैश्च वृत्तय इति एवं वृत्तिसंस्कारचक्रमनिशमावर्त्तते तदेवभूतं चित्तमवसिताधिकारमात्मकल्पेन व्यवतिष्ठते ॥

स्येत्युक्तं । तच्चाविद्यानासंयोगेपि तच्चनितोपकारभागिता पुरुषस्यापरिणामिता चेति सिद्धं । ननु स्वस्वामिसम्बन्धो भोगहेतुरविद्यानिमित्तोऽविद्या तु किन्निमित्ता न खलु निर्निमित्तं कार्यमुत्पद्यते । यदाहुः । स्वप्नादिवदविद्यायाः प्रवृत्तिः तत्र किं कृतेति श्रद्धामुपसंस्कारव्याजेनोद्धरति । तस्मात् चित्तवृत्तिबोधे शान्तघोरमूढाकारचित्तवृत्त्युपभोगे अनाद्यविद्यानिमित्तत्वादनादिसंयोगः हेतुः अविद्यावासनयोश्च सन्तानी बीजाङ्कुरसन्तानवदनादिरिति भावः ॥ ४ ॥

स्यादेतत् पुरुषो हि शक्त्यै उपदिश्यते । न च वृत्तिनिरोधे वृत्तेरविज्ञाय शक्तौ । न च सङ्ख्येयापि पुरुषायुषे रत्नभिमाः क्वचित् परिगणयितुमसंख्याताश्च कथं निरोधव्या इत्याशङ्क्य तासामियत्ता स्वरूपप्रतिपादनपरं सूत्रमवतारयति ताः पुनर्निरोद्धव्या बहुत्वे सति चित्तस्य । वृत्तयःपञ्चतय्यः क्लिष्टाऽक्लिष्टाः । वृत्तिरूपीऽवयवो यस्य कः । . तस्य प्रमाणादयोऽवयवा पञ्च ततस्तदवयवा पञ्चतय्यः पञ्चावयवा वृत्तिर्भवति ताश्च वृत्तयश्चैव नैवाहि चित्तभेदात् बहु इति बहुवचनमुपपन्नं एतदुक्तं

प्रलयं गच्छति इति। ताः क्लिष्टाश्च पञ्चधा वृत्तयः ॥५॥

प्रमाण विपर्य्यय विकल्प निद्रा स्मृतयः ॥६॥

तत्र। प्रत्यक्षानुमानागमाः प्रमाणानि ॥ ७ ॥

इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात् तद्विषयासामान्यविशेषात्मनोऽर्थस्य विशेषावधारणं प्रधानावृत्तिः प्रत्यक्षं प्रमाणं फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः

भवति चैतीवा मैतीवा कश्चित्सर्वेषामेव तेषां वृत्तयः पञ्चतय्यः एवनाधिकाइति चिनस्येतिचैक वचनं जात्यभिप्रायं चित्तनामिति तु द्रष्टव्यं तासामवान्तरविशेष मनुष्ठानोपयोगिनं दर्शयति। क्लिष्टाऽक्लिष्टा इति। अक्लिष्टा उपादयः क्लिष्टा निरीड्व्याला अपि परेण वैराग्येनेति। अस्य व्याख्यानम्। क्लेशहेतुका इति क्लेशा। अस्मितादयो हेतवः प्रवृत्तिकारणं यासां वृत्तीनान्ताखथीक्ताः। यद्वा पुरुषार्थप्रधानस्य रजस्तमोमयीनां हि वृत्तिनां क्लेशकारित्वेन क्लेशयैव प्रवृत्तिः क्लेशक्लिष्टम्। तदासामस्तीति क्लिष्टा इति। यत एव क्लेशोपार्जनार्थमसूषां प्रवृत्तीरतएव कर्म्माशय प्रचय चेचीभूताः प्रमाणादिना खल्वयं प्रतिपत्तार्थमवसाय तच सत्तीदिष्टो वा कर्म्माशयमाचिनोतीति भवन्ति धर्म्माधर्म्म प्रचय प्रसव भूमयो वृत्तयः क्लिष्टा इतिह्यक्लिष्टा व्याचष्टे। ख्यातिविषया इति। विधूतरजस्तमसो वृद्धिसत्वस्य प्रशान्त वाहिनः प्रज्ञाप्रसादः ख्यातितया विषयिख्यातद्विषयं सत्वपुरुषविवेकमुपजनयति तेनसत्व पुरुष विवेक विषया यती अतएव गुणाधिकार विरोधिन्यः कार्य्यारणं हि गुणानामविकारो विवेकख्याति पर्य्यवसानश्च तदिति चरिताधिकाराणां गुणानामधिकारं विरुन्धति इति अतस्ता अक्लिष्टाः प्रमाणप्रभृतयो वृत्तयः।

स्यादेतत् वीतरागजन्मादर्शनात् क्लिष्ट वृत्तय एव सर्व्वे प्राणभृतो न च क्लिष्ट वृत्तप्रवाहे भवितुमर्हन्त्याक्लिष्टवृत्तयो। नचासूषां भावेपि कार्य्यकारिता विरोधिमध्यपातित्वात्। तस्मात् क्लिष्टानामक्लिष्टाभिर्निरोधस्तासां च वैराग्येण परेणेति

बुद्धेः प्रतिसंवेदी पुरुष इत्युपरिष्टात् उपपादयिष्यामः। अनुमेयस्य तुल्यजातीयेभ्योव्यावृत्तः सम्बन्धोयस्तद्विषया सामान्यावधारणप्रधाना वृत्तिरनुमानम्। यथा देशान्तर प्राप्तेर्गतिमच्चन्द्रतारकं चैत्रवत् विन्ध्यस्याप्राप्तिरगतिः आग्नेन

मनीरथ मावमित्यत आह। क्लिष्टप्रवाहेति। आगमानुमानाचार्योपदेश परिशीलन लब्धजन्मनी अभ्यासवैराग्ये क्लिष्टक्लिष्टमन्तरे तत्र पतिताः स्वयमक्लिष्टाएव यद्यपि क्लिष्टप्रवाह पतिताः। न खलु शालयामे किरातशतशङ्कीर्णे प्रतिवसन्नपि ब्राह्मणः किराती भवति। अक्लिष्टक्लिष्टे त्यिति निदर्शनम्। क्लिष्टास्तैस्तिता च क्लिष्टाभिरनभिभूता अक्लिष्टाः स्व संस्कार परिपाकक्रममेवक्लिष्टा एव तावदभि भवन्तीत्याह तथा अतीयका इति। अक्लिष्टाभिवृत्तिभिरक्लिष्टाः संस्कारा इत्यर्थः। तदिदं वृत्ति संस्कार चक्रमनिश मावर्त्तते। आनिरोध समाधेः तदेवं भूतचित्तं निरोधानस्थं संस्कारशेषं भूत्वात्मकल्पेनावतिष्ठत इत्यापातनः। प्रलयं वा गच्छतीति परमार्थतः। पिण्डीकृत्य सूत्रार्थमाह। ता इति पञ्चधेत्यर्थः। कथन न तु शब्द वृत्ति व्याख्यानं तयप्रकारेऽस्मरणात्। ताः स्वसंज्ञाभिरुद्दिशति। प्रमाणविपर्ययविकल्पनिद्रास्मृतयः। निर्देशे यथा वचनं विग्रहार्थे इन्द्रसमास इतरेतर योगः। यथाऽनित्याऽशुचिदुःखानात्मसु नित्यशुचि सुखात्मख्यातिरविद्या तत्रापि न दिग्मोहानात चक्रादि विभ्रमा व्युदस्यन्ते। एवमिहापि प्रधानादिभिधानेपि वस्त्वन्तरसद्भावशङ्कानव्युदस्येति। तन्निरासाय वक्तव्यं पञ्चत्व इति एतावत्य एव वृत्तयोन्यापराः सन्तीति दर्शितं भवति।

तत्र प्रमाण वृत्तिं विभजन समान्य लक्षणमाह। प्रत्यक्षानुमानागमा प्रमाणानि। अनधिगत तत्वबोधः पौरुषेयो व्यवहारहेतुः प्रमातत् करणं प्रमाणम्। विभाग वचनं न्यूनाधिकसङ्ख्याव्यवच्छेदार्थम्। तत्र सकल प्रमाण मूलत्वात् प्रथमतः प्रत्यक्षं लक्षयति। इन्द्रियेति अर्थस्येति समारोपितत्वं निषेधयति। तद्विषयेति। बाह्यगोचरतया ज्ञानाकारगोचरत्वं चित्तवत्तिनो ज्ञानाकारस्य बाह्य ज्ञेयसम्बन्धं दर्शयति। बाह्यवस्तुपरागादिति। व्यवहितस्य तदुपरागे हेतुमाह।

दृष्टानुमितोवार्थः परत्र स्वबोधसंक्रान्तये शब्देनोपदिश्यते। शब्दात्तदर्थविषयावृत्तिः श्रोतुरागमः यस्यागमस्याश्रद्धेयार्थो वक्ता न दृष्टानुमितार्थः स आगमः प्लवते। मूलवक्तरि तु दृष्टानुमितार्थे निर्विप्लवः स्यात् ॥ ७ ॥

इन्द्रियप्रणालिकयेति सामान्यमात्रमर्थम् इत्येके। विशेषा एव इत्यन्ये। सामान्य विशेष तदात्मा इत्यपरे वादिनः प्रतिपन्नास्तन्निराशायाह। सामान्यविशेषात्मन इति न तदात्मा किन्तु तादात्म्यमर्थस्य। एतच्चैकान्तानभ्युपगम इत्यत्र प्रतिपादयिष्यते। अनुमानागमविषयात् प्रत्यक्ष विषयं व्यवच्छिनत्ति विशेषावधारणं प्रधानेति। यद्यपि सामान्यमपि प्रत्यक्षे प्रतिभाषते। तथापि विशेषं प्रत्युपसर्जनीभूतम् इत्यर्थः एतच्च साक्षात्कारीपलक्षणपरम्। विवेकख्यातिरपि लक्षिता भवति। फलविप्रतिपत्तिं निराकरोति। फलं पौरुषेयश्चित्तवृत्तिः बोध इति। ननु पुरुष वर्त्ती बोध कथं चित्तगताया वृत्तेः फलं न हि खदिर गोचर व्यापारेण परशुना पलाशे छिदा क्रियते इत्यतआह। अविशिष्ट इति। न हि पुरुषगतो बोधोजन्यते अपि तु चैतन्यमेव बुद्धिदर्पण प्रतिविम्बितं बुद्धिवृत्त्या अर्थाकारतया तदाकारता मापद्यमानं फलम्। तच्च तथाभूतं बुद्धेरविशिष्टं बुद्ध्यात्मक वृत्तिश्च वृत्तिश्च बुद्ध्यात्मिकेति समानाधिकरण्यायुक्तः प्रमाण फलभाव इत्यर्थः। एतच्चोपपादयिष्याम इत्याह। प्रतिसंवेदीति। प्रत्यक्षानन्तरम्। प्रवृत्त्यादि लिङ्गक श्रोतु बुद्ध्यनुमान प्रभवसम्बन्ध दर्शन समुत्थतयागमस्यानुमानजन्यत्वादनुमितस्य चागमेनाव्याख्यानादागमात् प्राग्नुमानं लक्षयति अनुमीयतेति। जिज्ञासित धर्मविशिष्टो धर्म्यनुमेयस्तस्य तुल्यजातीयाः साध्यधर्मे सामान्येन समानार्थः सपक्षः तस्मिन्नेवानुवृत्तत्वनेन विरुद्धत्वमसाधारणत्वञ्च साधनधर्मस्य निराकरोति। भिन्नजातीया असपक्षास्तेभ्य सपक्षादन्ये तद्विरुद्धात्तदभाववतश्च तेभ्योव्यावृत्तस्तदनेन साधारणानैकान्तिकत्व मपाकरोति संबध्यत इति सम्बन्धो लिङ्गस्यनेन पक्षधर्मतां दर्शयन्नसिद्धतां निवारयति तद्विषया तन्निबन्धना षिञ् बन्धन इत्यस्माद्विषयपद व्युत्पत्तेः सामान्यावधारणेति। प्रत्यक्ष विषयात् व्यवच्छिनत्ति सम्बन्ध संवेदनाधीन जन्मानु-

विपर्य्ययोमिथ्याज्ञानमतद्रूपप्रतिष्ठम्॥ ८॥

स कस्मान्नप्रमाणं। यतः प्रमाणेन बाध्यते भूतार्थ विषयत्वात्प्रमाणस्य। तत्र प्रमाणेन बाधनमप्रमाणस्य दृष्टं।

मानं विशेषेषु सम्बन्ध ग्रहणाभावेन। सामान्यमेव सुकरसम्बन्धग्रहणं गोचरयतीति उदाहरणमाह।

यथेति। चोदितार्थो विद्वीगतिर्यतस्तस्मात् तस्माऽप्राप्तिरती गतिनिवृत्ति देशान्तरप्राप्ते गतिमच्चन्द्रतारकं चैववदिति सिद्धं। आगमस्य वृत्तं लक्षणमाह। आप्तेनेति। तत्वदर्शन कारुण्य करण पाटवाभिः सम्बन्ध आप्तिस्तया सह वर्त्तत इत्यात्तेन दृष्टानुमितोवार्थः। श्रुतस्य पृथगनुपादानं तस्य दृष्टानुमित मूलत्वेन ताभ्यामेव चरितार्थत्वात् आप्तचित्तवर्त्ति ज्ञानसदृशस्य ज्ञानस्य श्रोतृचित्ते समुत्पादः स्वबोध संक्रान्तिरूपे अर्थउपदिश्यते श्रोतृहिताहित प्राप्तिपरिहारोपायतया प्रभाष्यते शेषं सुगम्। यस्यागमस्याप्तेयार्थोवक्ता यथा यामेव दशदाभिमानि षट् पूपा भवियन्ति इति नदृष्टानुमितार्थो यथा चैत्यं वन्देत स्वर्गकामइति। नन्वेवं मन्वादि नामप्यागमः प्रवते। न हि तेपि दृष्टानुमितार्था यथाहः। यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्त्तितः। स सर्वोवाभिहितो वेदे सर्व ज्ञानमयो हि सः। इत्यत आहः। मूलवक्तरिति। मूलवक्ता हि तत्वेश्वरो दृष्टानुमितार्थः। विपर्य्ययोमिथ्याज्ञानमतद्रूपप्रतिष्ठं। विपर्य्यय इति लक्ष्य निर्देशो मिथ्याज्ञानमित्यादि लक्षणं यज्ज्ञानं प्रतिभासिरूपं तद्रूपा प्रतिष्ठमेवाह अतद्रूपप्रतिष्ठं यथा अग्नाद्बिभीतीति। अतः संशयोपि गृहीतः। एतावांस्तु विशेषः। तत्र ज्ञानरूढ़े वा प्रतिष्ठितादि चन्द्रादिसु बाधज्ञानेन। नन्वेवं विकल्पोपि तद्रूपा प्रतिष्ठानाद्विचारती विपर्य्ययः प्रसज्येतेत्यत आह। मिथ्याज्ञानमिति। अनेन हि सर्व्वजनीनाऽनुभव सिद्धो बाध उक्तः सचास्ति विपर्य्यये न तु विकल्पे येन व्यवहारार्थं पण्डितरूपाणा मेव तु विचारयतां तत्र बाध बुद्धेरिति चोदयति। स कस्मान्न प्रमाणं नौत्तरेणोपजातं विरोधिना ज्ञानेन पूर्व्वं बाधनीयमपि तु पूर्व्वेणैव प्रथमनुपजाते नानुपजात विरोधिना परमिति भावः परिहरति। यतः प्रमाणेनेति।

तद्यथा द्विचन्द्रदर्शनं सद्विषयेनैकचन्द्रदर्शनेन बाध्यते इति सेयं पञ्चपर्व्वा भवत्यविद्याऽस्मितारागद्वेषाऽभिनिवेशा क्लेशाः इति अतएव स्वसंज्ञाभिस्तमोमोहो महामोहस्तामिस्रोऽन्धतामिस्र इति एते चित्तमनप्रसङ्गेनाभिधास्यन्ते ॥ ८ ॥

शब्दज्ञानानुपाती वस्तुशून्योविकल्पः ॥९॥

स न प्रमाणोपारोही न विपर्य्ययोपारोही वस्तुशून्यत्वेपि शब्दज्ञानमाहात्म्य निवन्धनो व्यवहारो दृश्यते। तद्यथा चैतन्यं पुरुषस्य स्वरूप मिति यदा चितिरेव

यत्र हि पूर्व्वापेक्षा परोत्पत्ति स्तत्रैवं इह तु स्वकारणादन्योत्पानपेक्षे ज्ञाने जायते तेनोत्तरस्य पूर्व्वमनुपमृद्योदय मनासादयत स्वदपबाधात्मैवोदयो न तु पूर्व्वस्योत्तर बाधात्मा तस्य तदानी मप्रसक्तेः स्वस्मादनुपजात विरोधिता बाध्यत्वे हेतुरूपजातविरोधिता च बाधकत्वे तस्माद्भूतार्थ विषयत्वात् प्रमाणे नाप्रमाणस्य बाधन सिद्धं। उदाहरणमाह।

तत्र प्रमाणेति। अस्य कुत्सितत्वं हानाय दर्शयति। सेयं पञ्चेति। अविद्या सामान्यमविद्याऽस्मितादिषु पञ्चसु पर्व्वस्वित्यर्थः। अव्यक्त महदहङ्कार पञ्च तन्मात्रेष्वष्टसनात्मस्वात्म बुद्धिरविद्या तमः एवं योगिनामष्टस्वनिमादिकेष्वैश्वर्य्येष्वयेयःसु श्रेयो बुद्धिरष्टविधो मोहः पूर्व्वस्माज्जघन्यः स चाऽस्मितीच्यते। तथा योगेनाष्टविधं ऐश्वर्य्यमुपादाय सिद्धीभूत्वा दृष्टानुश्रविकान् शब्दादीन् दशविषयान् भोक्ष्य इत्येव मात्मिका प्रतिपत्तिर्महामोहो रागः एवमेतेनैवाभिसन्धिना प्रवर्त्तमानस्य केनचित् प्रतिवद्धत्वादनिमादीनामनु त्पत्तिस्तन्निबन्धनश्च दृष्टानुश्रविक विषयोपभोगस्याप्सिद्धेः प्रतिवन्धक विषयः क्रोधः सतामिस्राख्योद्वेषः। एवमणिमादि गुण सम्पत्तौ दृष्टानुश्रविक विषय प्रत्युपस्थाने च कल्पान्ते सर्व्वमेततर्त्य यातीति

पुरुषः तदा किमत्र केन व्यपदिश्यते भवति च व्यपदेशी वृत्तिः यथा चैतस्य गौरिति। यथा प्रतिषिद्धवस्तुधर्म्मा निष्क्रियः पुरुषः तिष्ठति वाणः स्थास्यति स्थित इति गतिनिवृत्तौ धात्वर्थमात्रं गम्यते॥ तथानुत्पत्तिधर्म्मा पुरुष इति उत्पत्तिधर्म्मस्याभावमात्रमवगम्यते न पुरुषान्वयी धर्म्मः तस्माद्विकल्पितः स धर्म्मस्तेन चास्ति व्यवहार इति॥ ८॥

यस्यासः सोभिनिवेशोऽयतामिस्रः। तदुक्तं। भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्र इति। अशब्दज्ञानानुपाती वस्तुशून्यो विकल्पः। ननु शब्दज्ञानानुपाती चेदागमप्रमाणान्तर्गतो विकल्पः प्रसज्येत निर्व्यस्तुकत्वे वा विपर्ययः स्यादित्यत आह। सन्नेति। न प्रमाणविपर्ययान्तर्गतः कस्मात् यतो वस्तुशून्यत्वमेवेति प्रमाणान्तर्गतं निषेधयति। अशब्दज्ञानमात्मात्मनिबन्धन इति। विपर्ययान्तर्गतिं। तदुक्तं भवति क्वचिदभेदे भेदमारोपयति। क्वचित् पुनर्भिन्नानामभेदं ततो भेदस्याभेदस्य च वस्तुतोऽभावात् तदाभासो विकल्पो न प्रमाणं नापि विपर्ययो व्यवहारविसंवादादिति शास्त्रप्रसिद्धमुदाहरणमाह। तदयथेति। किं विशेष्यं केन व्यपदिश्यते विशेषणेनाभेदे विशेष्यविशेषणभावो न हि गवा गौर्विशेष्यते। किन्तु भिन्नेनैवेत्यतदिदमाह। भवति च व्यपदेशवृत्तिः। व्यपदेश्यव्यपदेशकयोर्भावो व्यपदेशः विशेषणविशेष्यभाव इति यावत्। तस्मिन् वृत्तिर्वाक्यस्य यथा चैतस्य गौरिति। शास्त्रीयमेवोदाहरणान्तरं समुच्चिनोति। तथेति। प्रतिषिद्धं वस्तुनः पृथिव्यादेः धर्म्मः परिस्पन्दो यस्य स तथोक्तः कोसौ निष्क्रियः पुरुषः। न खलु साङ्ख्ये राद्धान्तेऽभावो नाम कश्चिदस्ति वस्तुधर्म्मो येन पुरुषो विशेष्यतेत्यर्थः। क्वचित्पाठः प्रतिषिद्धा वस्तु धर्म्मा इति तस्यार्थः। प्रतिषेध व्याप्या प्रतिषिद्धा। ननु धर्म्माणां तदात्मता भावा भावयोरसम्बन्धादथ च तथा प्रतीतिरिति लौकिक-

अभावप्रत्ययालम्बना वृत्तिर्निद्रा ॥ १० ॥

सा च सम्प्रबोधे प्रत्यवमर्शात्प्रत्ययविशेषः कथं सुखमहमस्वाप्सं प्रसन्नं मे मनः प्रज्ञां मे विशारदीकरोति। दुःखमहमस्वाप्सं स्त्यानं मे मनोभ्रमत्यनवस्थितं। गाढं मूढोऽहमस्वाप्सं गुरुणि मे गात्राणि क्लान्तं मे चित्तमलसं मुषितमिव तिष्ठतीति। स खल्वयं प्रबुद्धस्य प्रत्यवमर्शो न स्यात् असति प्रत्ययानुभवे तदाश्रिताः स्मृतयश्च तद्विषया न स्युः। तस्मात्प्रत्ययविशेषो निद्रा। सा च समाधावितरप्रत्ययवन्निरोद्धव्येति ॥ १० ॥

सुप्ताहरणमाह। तिष्ठतिवाणइति। यथा हि पठति भिनत्तीत्यत्र पूर्वापरीभूतयानत्यादि क्रियया वाक्यान्विन्यया वाक्यस्य व्यपदेश इत्यत आह। गतिनिवृत्तौ धात्वर्थमात्रं गम्यते। गतिनिवृत्तिरेव तावत् कल्पिता तस्या अपि भाव रूपत्वं। तथापि पूर्वापरीभाव इत्यही कल्पना परंपरेत्यर्थः। अभाव कल्पिती भावश्च चानुरागश्च सर्व्वं पुरुषेषु गम्यते न पुरुषो व्यतिरिक्तो धर्म्मः कश्चिदित्युदाहरणान्तरमाह। तथानुपपत्तिधर्म्मेति। प्रमाण विपर्य्ययाभावमात्रा न विकल्प इत्तिरिति वादिनो बहवः प्रतिपेदिरे तत्प्रतिबोधनायोदाहरण प्रपञ्च इति मन्तव्यं। अभावप्रत्ययालम्बना वृत्तिर्निद्रा। अधिकृतं हि वृत्तिपदमनुवादकं प्रमाणे विपर्य्यय विकल्प स्मृतीनां वृत्तित्वं प्रति परीचकानामपि प्रतिपत्तेरतत्तदनुवदते विशेष विधानाय निद्रायास्तु वृत्तित्वे परीचकाणामविप्रतिपत्तेरिति वृत्तित्वं विधेयं। न च प्रकृति मनुवादकं विधानाय कल्पत इति पुनर्वृत्ति ग्रहणं जायत् स्वप्नवृत्तीनामभाव तस्य प्रत्यय कारणं बुद्धिसत्वाच्छादकं तमस्तदेवालम्बनं विषयो यस्याः सा तथोक्ता वृत्तिर्निद्रा बुद्धिसत्वे हि चिगुणे यदा सत्वरजसी अभिभूय समस्त कारणावरकमाविरक्ति तमस्तदा बुद्धेर्विषयाकार परिणामाभावादद्भूत तमोमयी

अनुभूतविषयाऽसंप्रमोषः स्मृतिः ॥ ११ ॥

किं प्रत्ययस्य चित्तं स्मरति। आहोस्वित् विषयस्येति। ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासः। तथा जातीयकं संस्कारमारभते स संस्कारः स्वव्यञ्जका-

नुद्रिक्तवृद्ध्यमानः पुरुषः सुषुप्तीत्थं इत्युच्यते। कस्मात्पुनः निरुद्धे कैवल्ययोरिव हेत्वभाव एव न निरोत्स्यत आह। सा च सम्प्रबोधे प्रत्यवमर्शात्मोपपत्तिकात् स्मरणात्प्रत्यय विशेषः। कथं यदाहि सत्त्वं सचिवत्तम आविरस्ति तदेदृशः प्रत्यवमर्शः सुप्तोत्थितस्य भवति। सुखमहमस्वाप्सम्प्रसन्नं मनः प्रज्ञा मे विशारदी करोति स्वच्छीकरोति इति यदातु रजः सचिवत्तमः आविरस्ति तदेदृशः प्रत्यवमर्श इत्याह। दुःखमहमस्वापं स्वानं अकर्मण्यं मे मनः कस्मात् यतो भ्रमत्यनवस्थितं। तिरोभूतरजः सत्त्वं तमः समुल्लासि स्वापे प्रबुद्धस्य प्रत्यवमर्शमाह। गाढं मूढोऽहमस्वाप्सं गुरुणि मे गात्राणि ग्लानं मे चित्त मलसम्भुषितमिव तिष्ठतीति। साध्य व्यतिरेके हेतु व्यतिरेकमाह। स खल्वयमिति। प्रबुद्धस्य प्रबुद्धमात्रस्य तदाश्रितार्थेति बोधकाले प्रत्ययानुद्रेकभावे कारणानुभव इत्यर्थः ननु प्रमाणादयो व्युत्थानचित्तवृत्तिकरणा निरुध्यन्तां समाधिप्रतिपत्तवान्निद्रायाश्चैकाग्र्यवृत्ति तुल्यायाः कथं समाधि प्रतिपत्तेत्यत आह। स च समाधिरिति। एकाग्रतुल्यापि तामसत्वेन निद्रा सबीज निर्बीज समाधि प्रतिपत्त इति सापि निरोद्धव्येत्यर्थः॥ १० ॥

अनुभूत विषयाऽसम्प्रमोषः स्मृतिः। प्रमाणादिभिरनुभूते विषये योऽसम्प्रमोषः सा स्मृतिः संस्कारभाव अन्यस्य हि ज्ञानस्य संस्कार कारणानुभव भाषितो विषय आत्मीयस्तदधिक विषयपरिग्रहस्तु सम्प्रमोषः स्मृतेः कस्मात्सादृश्यात्। सुखस्मृतेः इत्यस्यात्सम्प्रमोषपदव्युत्पत्तेः। एतदुक्तं भवति। सर्वे प्रमाणादयो नाधिगतमर्थं नामाच्यतः प्रकारतो बाधितमर्थन्ति स्मृतिः। पुनर्न पूर्व्वानुभव मर्य्यादामतिक्रामति तद्विषयातदूनविषया वा न तु तदधिक विषया सेयं ह्रस्वत्वादिविशेषः स्मृतेरिति। विवृणोति किंप्रत्ययस्येति ग्राह्य प्रवणत्वात् अनुभवस्य

ज्ञानं तदाकारामेव याद्यग्रहणोभयात्मिकां स्मृतिज्ञनयति। तत्र ग्रहणाकारपूर्व्वबुद्धिः ग्राह्याकारपूर्व्वा स्मृतिः। सा च द्वयीभावितस्मर्त्तव्या चाभावितस्मर्त्तव्या च। स्वप्नेभावितस्मर्त्तव्या। जाग्रत्समये त्वभावितस्मर्त्तव्येति। सर्व्वाः स्मृतयः प्रमाणविपर्य्ययविकल्पनिद्रास्मृतीनामनुभावात्य, भवन्ति। सर्व्वाश्चैता वृत्तयः सुखदुःखमोहात्मिकाः सुखदुःखमोहाश्च क्लेशेषु व्याख्येयाः सुखानुशयी रागः दुःखानुशयी द्वेषः मोहः पुनरविद्येति एताः सर्व्वा वृत्तयो निरोद्धव्याः आसां निरोधे सम्प्रज्ञातो वा समाधिर्भवति। असम्प्रज्ञातोवेति ॥ ११ ॥

स्वानुभवाभावात्तज्ज्ञः संस्कारी याद्यमेव स्मारयतीति। प्रतिभाति अनुभव माव जनितत्वाच्चानुभवमेवेति विषयीश्रपत्तित उभय स्मरणमवधारयति। याद्यप्रवण तया ग्राह्योपरक्तः परमार्थतस्तु ग्राह्य ग्रहणे एव उभयं तयीराकारं स्वरूपं निर्भासयति प्रकाशयति। स्वव्यञ्जकं कारण मङ्गनमाकारो यस्य स तथोक्तः। स्वकारणाकार इत्यर्थः व्यञ्जकमुद्दीपकं तेनाङ्गनं फणाभिमुखीकरणं यस्येति वेत्यर्थः। ननु यदि कारण विचारेण बुद्धि स्मरणयोः सारूप्यं कस्माद्धि भिद इत्यत आह। तत्र ग्रहणेति। ग्रहणमुपादानं न च गृहीतस्योपादानं सम्भति तदनेनानधिगत बोधनं बुद्धिरित्युक्तं ग्रहणाकारो ग्रहणरूपं पूर्व्वं प्रधानं यस्याः सा तथोक्ता धिकल्पित श्रयम् अभेदेपि गुण प्रधानभाव इति ग्राह्याकारः पूर्व्वः प्रथमो यस्याः सातथोक्ता इदमेवच ग्राह्याकारस्य ग्राह्यस्य पूर्व्वत्वं यद्यन्तर विषयीकृतत्वमर्थस्य तदनेन वृत्त्यन्तरविषयीकृत गोचरास्मृतिरित्युक्तं भवति सोयममं प्रमीष इति। ननु अस्मिन्स्मृतेरपि संप्रमोषः दर्शयति हि पिचाद्यैरतीतस्य देशकालान्तरानुभूतस्यानुभूतचर देशकालान्तर सम्बन्धं स्वप्न इत्यत आह। सचाद्यैीति भावितः

अभ्यासवैराग्याभ्यां तन्निरोधः ॥ १२ ॥

अथासां निरोधे क उपाय इति—चित्त नदीनामो-भयतोवाहिनी वहति कल्याणाय । वहति पापाय च । या तु कैवल्यप्रागभाराविवेकविषय निम्ना सा कल्याण-वहा । संसारप्राग्भाराऽविवेकविषयनिम्ना पापवहा तत्र वैराग्येन विषयस्रोतःखिनो क्रियते विवेकदर्शनाभ्यासेन विवेकस्रोत उद्घाट्यते इत्युभयाधीनश्चित्तवृत्तिनिरोधः॥१२॥

तत्र स्थितौ यत्नोऽभ्यासः ॥१३॥

चित्तस्याहत्तिकस्य प्रशान्तवाहिता स्थितिः । तदर्थः प्रयत्नः वीर्य्यमुत्साहः तत्संपिपादयिषया तत्साधनानुष्ठान-मभ्यासः ॥ १३ ॥

कल्पितः अवर्त्तव्यीयया सा तयोक्ता। अभाविताऽकल्पितः पारमार्थिक इति यावत् । नेयं अतिरपितु विपर्ययतत्सलक्षणोपपन्नत्वात् अतिभासतया तु अति-रूक्ता प्रमाणाभासमिव प्रमाणमिति भावः । कस्मात् पुनरन्ते अतेरुपन्यास इत्यत आह । सर्व्वाः अतय इति अनुभवः प्राप्तिः प्राप्तिपूर्व्वा वृत्तिः अतिलक्षतः अतीनामुपजन इत्यर्थः ननु ये पुरुषं क्लिश्नन्ति तेषांनिरोद्धव्याः प्रेक्षावता क्लेशाश्च तथा न च वृत्तयः तत् किमर्थमासां निरोधः इत्यत आह। सर्व्वार्थैता इति सुगमम् ॥ ११॥

निरोधोपायं पृच्छति अथेति सूत्रेणोत्तरमाह। अभ्यास वैराग्याभ्यां तन्निरोधः। अभ्यासवैराग्ययोर्निरोधे जनितव्ये आन्तर व्यापार भेदेन समुच्चयो न तु विकल्प इत्याह। चित्त नदीति। प्राग्भाव: प्रवण: निम्नताऽधोवृत्तति यावत् ॥१२॥

सतुदीर्घकालनैरन्तर्यसत्कारासेवितोदृढभू मिः॥१४

दीर्घकालासेवितः निरन्तरासेवितः तपसा ब्रह्मचर्येण विद्यया श्रद्धया च संपादितः सत्कारवान् दृढ भूमिर्भवति । व्युत्थानसंस्कारेण द्रागित्येवानभिभूत विषय इत्यर्थः ॥ १४ ॥

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥१५॥

स्त्रियोन्नपानमैश्वर्य्यमिति दृष्टविषयवितृष्णस्य स्वर्ग-

अथाभ्यासस्य स्वरूप प्रयोजनाभ्यां लक्षणमाह । तत्र स्थितौ यत्नोऽभ्यासः । तत्राचष्टे चित्तस्यावृत्तिकस्य राजसतामस वृत्तिरहितस्य प्रशान्त वाहिता विमलता सात्विक वृत्तिवाहितैकाग्रता स्थितिः तदर्थ इति स्थितावितिं निमित्त सप्तमी व्याख्याता । यथा चर्म्मणि द्वीपिनं हन्तीति प्रयत्नमेव पर्य्यायाभ्यां विशदयति वीर्य्यमुत्साह इति तस्येच्छा योनितामाह । तत् संप्रिपादयिषया तदिति स्थितिं परामृशति । प्रयत्नस्य विषयमाह । तत्साधनेति स्थितिसाधनान्यन्तरङ्गबहिरङ्गानि यम नियमादीनि ध्यानगोचरः कृत्स्नव्यापारो न फलगोचर इति ॥ १३ ॥

ननु व्युत्थान संस्कारेणादि परिपन्थिना प्रतिबद्धोभ्यासः कथं स्थित्यै कल्पत इत्यत आह । स तु दीर्घकाल नैरन्तर्य सत्कारासेवितो दृढभूमिः सीयमभ्यासो विशेषेण एव सम्पन्नः सन्दृढावस्थो न सहसा व्युत्थान संस्कारैरभिभूत स्थितिरूपविषयी भवति यदि पुनरेवं भूतमप्यभ्यासं कृत्वोपरमेत ततः काषपरिवासिनाभिभवेत् तस्मान्नीपरन्तव्यमितिभावः ॥ १४ ॥

वैराग्यमाह । दृष्टानुश्रविक विषयवितृष्णस्य वशीकार संज्ञा वैराग्यं ।

वैदेहप्रकृतिलयत्वप्राप्तानुश्रविकविषये वितृष्णस्य दिव्यादिव्यविषयसंयोगेपि चित्तस्य विषयदोषदर्शिनः प्रसंख्यानबलादनाभोगात्मिका हेयोपादेयशून्या वशीकारसंज्ञा वैराग्यम्॥ १५ ॥

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं ॥ १६ ॥

दृष्टानुश्रविकविषयदोषदर्शी विरक्तः पुरुषदर्शनाभ्यासात्तच्छ्रद्धिप्रविवेकाप्यायितबुद्धिर्गुणेभ्योव्यक्ताव्यक्तधर्मकेभ्यो विरक्त इति तत् इयं वैराग्यम्। तत्र यदुत्तरं तत् ज्ञानप्रसादमात्रं यस्योदये प्रत्युदितख्यातिरेवं मन्यते प्राप्तं

चेतनाचेतनेषु दृष्टविषयेषु वितृष्णतामाह स्त्रिय इति ऐश्वर्यमाधिपत्यं। आनुश्रवो वेद स्मृतीतिहासा आनुश्रविकाः स्वर्गादयः तत्रापि वैतृष्णमाह स्वर्गेति देहरहिता विदेहाः करणेषु लीनाः तेषां भावी वैदेह्यं अन्ये तु प्रकृतिमेवात्मान मभिमन्यमानाः प्रकृत्युपासकाः प्रकृतौ साधिकारायामेव लीना स्तेषां भावः प्रकृतिलयत्वं। तत्प्राप्तिविषये वितृष्णस्य आनुश्रविक विषये वितृष्णो हि स्वर्गादि प्राप्तिविषये वितृष्ण उच्यते। ननु यदि वैतृष्ण्यमात्रं वैराग्यं हन्तविषवाप्राप्तावपि तदस्तीति वैराग्यं स्यादित्यत आह। दिव्यादिव्येति। न वैतृष्ण्यमात्रं वैराग्यं अपितु दिव्यादिव्यविषय संप्रयोगेपि चित्तस्य अनाभोगात्मिका ॥ १५ ॥

तामेव स्पष्टयति हेयोपादेय शून्या सङ्कल्पोपरहितायापेक्षा बुद्धि वशीकार संज्ञा। कुतः पुनरियमित्यत आह। प्रसङ्ख्यानबलादिति। त्रापत्रयपरीतता विषयाणां दोष तत्परिभावनया तत्साक्षात्कारः प्रसङ्ख्यानं तदबलादित्यर्थः यतमानसंज्ञा व्यतिरेक संज्ञा एकेन्द्रिय संज्ञा वशीकार संज्ञाचेति चतस्रः संज्ञा इत्यगमन्। रागादयः। चल कषायाश्रितवर्त्तिनस्तैरिन्द्रियाणि यथास्वं विषयेषु

प्रापणीयं चीणाः क्षेतव्याः क्लेशाः क्षिप्तः श्लिष्टपर्व्वा भव-

प्रवर्त्तते तन्त्रा प्रवर्त्तिषतेन्द्रियाणि तत्तद्विषयेष्विति तत्परिपाचनायारम्भः प्रयत्नः सा यतमानसंज्ञा। तदारम्भे सति केचित्कषायाः पक्वाः प्रक्ष्यन्ते पक्ष्यन्तेच केचित्—तत्र पक्ष्यमाणेभ्यः पक्वानां व्यतिरेकेणावधारणं व्यतिरेकसंज्ञा। इन्द्रियप्रवर्त्तनासमर्थतया पक्वानामौत्सुक्यमात्रेण मनसि व्यवस्थानमेकेन्द्रियसंज्ञा। औत्सुक्यमात्रस्यापि निवृत्तिरुपस्थितेष्वपि दिव्यादिव्यविषयेषूपेक्षाबुद्धिः संज्ञावस्थ्यात्परावश्यीकारसंज्ञा। एतयैवच पूर्व्वासां चरितार्थत्वान्न ताः पृथगुक्ताः—इति सर्व्वमवदातं।

अपरं वैराग्यमुक्त्वा परमाह—तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं। अपरवैराग्यस्य परवैराग्यं प्रति कारणत्वं। तच्च द्वारमादर्शयति—"दृष्टानुश्रविकविषयदोषदर्शी विरक्तः" इति, अनेनापरं वैराग्यं दर्शितं। पुरुषदर्शनाभ्यासादागमानुमानाचार्य्योपदेशसमधिगतस्य पुरुषस्य दर्शनं तस्याभ्यासः पौनःपुन्येन निवेषणं तस्मात् तस्य दर्शनस्यशुद्धीरजस्तमःपरिहारा सत्वैकतानतया यो गुणपुरुषयोः प्रकर्षेण विवेकः—पुरुषः शुद्धोऽनन्तः, तद्विपरीतगुणा—इति तेनाप्यायिता बुद्धिर्यस्य योगिनः स तथोक्तशब्देन धर्म्ममेघाख्यः समाधिरुक्तः। स तथाभूतो योगी सुखेभ्योव्यक्ताव्यक्तधर्म्मेभ्यः सर्व्वथा विरक्तः सत्वपुरुषान्यताख्यातावपि गुणात्मिकायां यावद्विरक्त—इति, तत्तस्मात् इयं वैराग्यं। पूर्व्वं हि वैराग्यं सत्वसमुद्रे कविधूततमसि रजःकणकलङ्कसंपृक्ते चित्तसत्वे तच्च सौष्टिकानामपि समानम् ते हिनैव प्रकृतिलया बभूवुः यथोक्तं—"वैराग्यात् प्रतिलय"—इति। तत्र तयोर्द्वयोर्मध्ये यदुत्तरं, तत् ज्ञानप्रसादमात्रं मात्रग्रहणेन निर्व्विषयतां सूचयति; तदेव हि तादृग्भं चित्तसत्वं रजोलेशमलिनापि अपरामृष्टमस्वार्थयो अतएव 'ज्ञानप्रसाद'—इत्युच्यते। चित्तसत्वं हि प्रसादस्वभावमपि रजस्तमःसम्सर्गात् मलिनतामनुभवति, वैराग्याभ्यासविमलवारिधाराधौतसमस्तरजस्तमोमलं अतिप्रसक्तं ज्ञानप्रसादमात्रपरिशेषं भवति। तस्य गुणानुपादेयत्वाय दर्शयति,—यस्योदये सति योगी प्रत्युदितख्यातिः ख्यातिविशेषे सति वर्त्तमानख्यातिमानित्यर्थः। प्रापणीयं कैवल्यं प्राप्तं, यथा वक्ष्यति,—"जीवन्नेवविद्वान्मुक्तो

संक्रमो—यस्याविच्छेदात् जनित्वा म्रियते, मृत्वाच जायत इति ज्ञानस्यैव पराकाष्ठा वैराग्यम्—एतस्यैव हि नान्तरीयकं कैवल्यमिति ॥ १६ ॥

अथोपायद्वयेन निरुद्धचित्तवृत्तेः कथमुच्यते सम्प्रज्ञातः समाधिरिति,—

वितर्कविचारानन्दास्मितानुगमात् सम्प्रज्ञातः ॥ १७ ॥

भवति" संस्कारमात्रस्य छिन्नमूलस्य सिद्धत्वादितिभावः। कुतः प्राप्तं ?—यतः क्लेशाः चेतव्याः, क्लेशाः अविद्यादयः सवासनाः। नन्वस्ति धर्म्माधर्म्मसमूहो भवस्य जन्ममरणप्रबन्धस्य संक्रमः प्राणिनां तत् कुतः कैवल्यं ?—इत्यत आह—छिन्न इति। श्लिष्टानि निःसन्धीनि पर्व्वाणि यस्य स तथोक्तः। धर्म्माधर्म्मसमूहस्य समूहिनः पर्व्वाणि, तानि श्लिष्टानि—न हि जातु जन्तुर्मरणजन्मप्रबन्धेन वियुज्यते। सीयं भवसंक्रमः क्लेशचये छिन्नः। यथा वक्ष्यति—"क्लेशमूलः कर्म्माशयः" "सतिमूले तद्विपाक"—इति। नन्वसङ्ख्यानपरिपाकं धर्म्ममेघस्य निरोधं अन्तरा किं तदस्ति ?—यत्प्रसादमात्र मित्यत आह—ज्ञानस्यैवेति। धर्म्ममेघभेदएव परं वैराग्यं नान्यत्। यथा वक्ष्यति—'प्रसङ्ख्यानेप्यकुसीदस्य सर्व्वथा विवेकख्यातेर्धर्म्ममेघसमाधिः' 'तदा सर्व्वावरणमलापेतस्य ज्ञानस्यानन्त्यात् ज्ञेयमल्पमिति' च। तस्मादेतस्य हि नान्तरीयकत्वेन विनाभावि कैवल्यमिति ॥ १६ ॥

उपायमभिधाय सम्प्रकारीपेयकथनाय पृच्छति—अथोपायद्वयेनेति। "वितर्कविचारानन्दास्मितारूपानुगमात् संप्रज्ञातः"। संप्रज्ञातपूर्व्वकत्वादसंप्रज्ञातस्य—इति प्रथमं संप्रज्ञातोपवर्णनम्। संप्रज्ञातसामान्यम् वितर्कविचारानन्दास्मितानां रूपैरनुगमात् प्रतिपत्तव्यम्।

वितर्कः = चित्तस्यालम्बने स्थूल आभोगः। सूक्ष्मोविचारः। आनन्दोल्लादः। एकात्मिका संविदस्मिता। तत्र प्रथमचतुष्टयानुगतः समाधिः सवितर्कः। द्वितीयोवितर्कविकलः सविचारः। तृतीयोविचारविकलः सानन्दः। चतुर्थस्तद्विकल अस्मितामात्र—इति। सर्व्व एते सालम्बनाः समाधयः ॥१७॥

अथासम्प्रज्ञातसमाधिः किमुपायः ? किं स्वभावोवेति,—

विरामप्रत्ययाभ्यासपूर्व्वः संस्कारशेषोऽन्यः ॥१८॥

वितर्कं विवृणोति—चित्तस्येति। स्वरूपसाक्षात्कारवती प्रज्ञा आभोगः, स च स्थूलविषयत्वात् स्थूलः। यथा हि प्राथमिकोधानुष्कः स्थूलमेव लक्ष्यं विध्यत्यथसूक्ष्मं; एवं प्राथमिकोयोगी स्थूलमेव पाञ्चभौतिकं चतुर्भुजादि ध्येयं साक्षात् करोति अथ सूक्ष्मिति। एवं चित्तस्यालम्बने सूक्ष्मे आभोगः स्थूलकारणभूतसूक्ष्मपञ्चतन्मात्रलिङ्गालिङ्गविषयी विचारः। तदेवं ग्राह्यविषयं दर्शयित्वा ग्रहणविषयं दर्शयति—आनन्द इति। इन्द्रिये स्थूलालम्बने चित्तस्याभोग ह्लादः आनन्दः। प्रकाशशीलतया खलु सत्वप्रधानादहङ्कारादिन्द्रियाण्युत्पन्नानि, सत्वं सुखमिति तान्यपि सुखानीति तन्निष्ठाभोग ह्लाद—इति। ग्रहीतृविषयं संप्रज्ञातमाह—एकात्मिकासंविदिति। अस्मिताप्रभवाणीन्द्रियाणि तेनैषामस्मिता सूक्ष्मं रूपं सा चात्मना ग्रहीत्रा सह बुद्धिरेकात्मिका संविदिति तस्माच्च ग्रहीतुरन्यभावात् भवति ग्रहीतृविषयः संप्रज्ञात—इति। चतुर्णामपरमप्यवान्तरविशेषमाह—तत्र प्रथम इति। कार्य्यं कारणानुप्रविष्टं न कारणं कार्य्येण—तदयं स्थूल आभोगः स्थूलसूक्ष्मेन्द्रियास्मिताकारणचतुष्टयानुगतीभवति। उत्तरे तु विदेहप्रकृतिलया भवन्ति। असंप्रज्ञाताद्विशिनष्टि—सर्व्वएत इति ॥ १७॥

क्रमप्राप्तमसंप्रज्ञातमवतारयितुं पृच्छति,—अथेति। 'विरामप्रत्ययाभ्यासपूर्व्वः संस्कारशेषोन्यः। पूर्व्वपदेनोपायकथनमुत्तराभ्याञ्च स्वरूपकथनं। मध्यमं पदं

सर्व्ववृत्तिप्रत्यस्तमये संस्कारशेषोनिरोधश्चित्तस्य समाधिरसम्प्रज्ञातः—तस्य परं वैराग्यमुपायः । सालम्बनोह्यभ्यासस्तत्साधनाय न कल्पते—इति विरामप्रत्ययोनिर्व्वस्तुकमालम्बनो क्रियते, स चार्थशून्यः = तदभ्यासपूर्व्वकं हि चित्तं निरालम्बनमभावप्राप्तमिव भवति—इत्येष निर्बीजः समाधिरसम्प्रज्ञातः ॥ १८ ॥

स खल्वयं द्विविधः = उपायप्रत्ययोभवप्रत्ययश्च, तत्रोपायप्रत्ययीयोगिनां भवति,—

भवप्रत्ययोविदेहप्रकृतिलयानाम् ॥ १९ ॥

विहरणीति—सर्व्ववृत्ति इति । प्रथमं पदं व्याचष्टे—तस्य परमिति । विरामो वृत्तीनामभावस्तस्य प्रत्ययः कारणं तस्याभ्यासः तदनुष्ठानपौनःपुन्यं तदेव पूर्वं यस्य स तथा । अथापरं वैराग्यं निरोधकारणं कस्मान्न भवतीत्यत आह—सालम्बनोहीति । कार्य्यस्वरूपं कारणं युज्यते न विरूपं, विरूपञ्चापरं वैराग्यं सालम्बनं निरालम्बनसमाधिना कार्य्येण । तस्मान्निरालम्बनादेव ज्ञानप्रसादमावात्तस्योत्पत्तिर्युक्ता धर्म्ममेघसमाधिरेव हि नितान्तविगलितरजस्तमोमलात् बुद्धिसत्त्वादुपजातस्तत्त्वविषयातिक्रमेण प्रवर्द्धमानोनन्तोविषयावद्यदर्शी समस्तविषयपरित्यागाच्च स्वरूपप्रतिष्ठः सन्निरालम्बनः संस्कारमात्रशेषश्च निरालम्बनस्य समाधेः कारणमुपपद्यते साकल्यादिति । आलम्बनीकरणमात्ययणमभावप्राप्तमित इत्तिरूपकार्य्यकरणात् निर्बीजोनिरालम्बनः । अथवा बीजं क्लेशकर्म्माशयास्तै निष्क्रान्ता यस्मात् स तथा ॥ १८ ॥

निरोधसमाधेरवान्तरभेदं ज्ञानोपादानाकमादर्शयति,—स खल्वयं, = निरोधसमाधिः । द्विविधः = उपायप्रत्ययीभवप्रत्ययश्च । उपायो वक्ष्यमाणः श्रद्धादिः

विदेहानां देवानां भवप्रत्ययः—ते हि स्वसंस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः स्वसंस्कारविपाकं तथाजातीयकमतिवाहयन्ति। तथा प्रकृतिलयाः = साधिकारे चेतसि प्रकृतौ लीने कैवल्यं पदमिवानुभवन्ति यावन्न पुनरावर्त्तते अधिकारवशाच्चित्तमिति ॥ १९ ॥

प्रत्ययःकारणं यस्य निरोधसमाधेः स तथोक्तः। भवन्ति जायन्तेऽस्यां जन्तव इति भवोऽविद्या—भूतेन्द्रियेषु वा विकारेषु प्रकृतिषु वाऽव्यक्तमहदहङ्कारपञ्चतन्मात्रेष्वनात्मस्वात्मख्यातिकलौष्टिकानां वैराग्यसम्पन्नानां।

स खल्वयं भव प्रत्ययः कारणं यस्य निरोधसमाधेः स भवप्रत्ययः, तच्च तयोर्भध्ये उपायप्रत्ययोयोगिनां मीक्षमाणानां भवति। विशेषविधानेन शेषस्य मुमुक्षुत्वम्बन्धं निषेधति—केषां तर्हि भवप्रत्ययः?—इत्यत्र सूत्रेणोत्तरमाह,—भवप्रत्ययोविदेहप्रकृतिलयानां। विदेहाश्च प्रकृतिलयाश्च तेषामित्यर्थः। तद्व्याचष्टे—विदेहानां देवानां भवप्रत्ययोभूतेन्द्रियाणामन्यतमदात्मत्वेन प्रतिपन्नास्तदुपासनया तदासनावासितान्तःकरणा पिण्डपातानन्तरमिन्द्रियेषु भूतेषु वा लीनाः—संस्कारमात्रावशेषमनसः, षाट्कौशिकशरीररहिता विदेहाः। ते हि संस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः प्राप्तवन्तः विदेहाः। अवस्तिकत्वञ्च कैवल्येन सारूप्यं। साधिकारसंस्कारशेषता च वैरूप्यं। संस्कारमात्रोपयोगेनेति क्वचित्पाठः, तस्यार्थः—संस्कारमात्रमेवोपभोगोयस्य न तु चित्तवृत्तिरित्यर्थः प्राप्तावधयः स्वसंस्कारविपाकं तथा जातीयकमतिवाहयन्ति अतिक्रामन्ति पुनरपि संसारे विशन्ति। तथाच वायुप्रोक्तं "दशमन्वन्तराण्येह तिष्ठन्तीन्द्रियचिन्तकाः। भौतिकास्तु शतं पूर्णमिति" तथा प्रकृतिलयाश्च अव्यक्तमहदहङ्कारपञ्चतन्मात्रेष्वन्यतमदात्मत्वेन प्रतिपन्नास्तदुपासनाय तदासनावासितान्तःकरणाः पिण्डपातानन्तरमव्यक्तादीनामन्यतमस्मिन् लीनाः साधिकारे ऽचरितार्थे—एवं हि चरितार्थः चेतःस्यात् यदि विवेकख्यातिमपि जनयेद्! अजनितसत्पुरुषान्यताख्यातेस्तु चेतसोऽचरितार्थस्यास्ति साधिकारतेति। साधिकारे चेतसि प्रकृतौ लीने कैवल्यपदमिव

उपायप्रत्ययोयोगिनां भवति—

श्रद्धावीर्य्यस्मृतिप्रज्ञापूर्वक इतरेषाम्॥ २०॥

श्रद्धा = चेतसः सम्प्रसादः। सा हि जननीव कल्याणी योगिनं पाति, तस्य हि श्रद्दधानस्य = विवेकार्थिनो वीर्य्यमुपजायते, समुपजातवीर्य्यस्य स्मृतिरुपतिष्ठते, स्मृत्युपस्थाने च चित्तमनाकुलं समाधीयते, समाहितचित्तस्य प्रज्ञा-

अनुभवन्ति यावन्न पुनरावर्त्तते अधिकारवशाच्चित्तमिति। प्रकृतिसामान्यमुपगतं अप्यबुद्धिं प्राप्य पुनरपि प्रादुर्भवति। ततो विविच्यते—यथा वर्षातिपाते स्वभावमुपगतीमख्भूकदेहः पुनरम्भोदवारिधारावसेकात् मख्भूकदेहभावमनुभवतीति। तथाच वायुप्रोक्तं—सहस्रं त्वाभिमानिकाः। बोद्धाः दशसहस्राणि तिष्ठन्ति विगतज्वराः। पूर्णं शतसहस्रन्तु तिष्ठन्त्यकल्पचिन्तकाः। पुरुषं निर्गुणं प्राप्य कालसङ्ख्या न विद्यते इति। तदस्य पुनर्भवप्राप्तिहेतुतया हेयत्वं दिक्षु॥ १९॥

योगिनान्तु समाधिरुपायक्रमसमाह—श्रद्धावीर्य्यस्मृतिसमाधिप्रज्ञापूर्वकइतरेषां"। नन्विन्द्रियादिचिन्तका अपि श्रद्धावन्त एवेत्यत आह—श्रद्धा—चेतसः संप्रसादः, सचागमानुमानाचार्य्योपदेशसमधिगततत्वविषयीभवति स हिचेतसः संप्रसादः—अभिरुचिमतीच्छा श्रद्धा, नेन्द्रियादिष्वात्माभिमानिनामभिरुचिरसंप्रसादोहि सः व्याजीहमूलत्वादित्यर्थः। कुतोऽसावेव श्रद्धेत्यत आह—'साहि जननीवकल्याणीयोगिनंपाति' विमार्गपातजन्मनोऽनर्थात्सीयमिच्छाविशेषः। इष्यमाणविषयंप्रयत्नं प्रसूतेइत्याह—"तस्यहिश्रद्दधानस्य"तस्यविवरणंविवेकार्थिनोवीर्य्यमुपजायते। स्मृतिर्ध्यानमनाकुलमविक्षिप्तंसमाधीयतेयोगाङ्गसमाधियुक्तंभवति। यमनियमादिनान्तरीयकसमाध्युपन्यासेनचयमनियमादयोपिसूचिताः। तदेवमखिलयोगाङ्गसम्पन्नस्यसंप्रज्ञातोजायते इत्याह— समाहितचित्तस्येति। प्रज्ञायाविवेकःप्रकर्षेउपजायते। संप्रज्ञातपूर्वंमसंप्रज्ञातोत्पादनमाह—तदभ्यासात्। तच्चैवतत्तद्भूमिप्राप्तौतत्तद्विषयाच्चवैराग्यादसं-

विवेक उपावर्त्तते—येन यथावद्वस्तु जानाति—तदभ्यासात् तद्विषयाच्च वैराग्यादसम्प्रज्ञातः समाधिर्भवति ॥ २० ॥

ते खलु नवयोगिनोमृदुमध्याधिमात्रोपाया भवन्ति। तद्यथा,—मृदुपायोमध्योपायोऽधिमात्रोपाय—इति। तत्र मृदुपायोऽपि त्रिविधः—मृदुसंवेगोमध्यसंवेगस्तीव्रसंवेग—इति। तथा मध्योपायस्तथाधिमात्रोपाय—इति,—तत्राधिमात्रोपायानां—

तीव्रसंवेगानामासन्नतमः ॥ २१ ॥

समाधिलाभः समाधिफलञ्च भवतीति ॥ २१ ॥

मृदुमध्याधिमात्रत्वात् ततोऽपिविशेषः॥२२॥

मृदुतीव्रोमध्यतीव्रोऽधिमात्रतीव्र—इति,ततोपि विशेषः = मृदुतीव्रसंवेगस्यासन्नः, ततोमध्यतीव्रसंवेगस्यासन्नतरः,

प्रज्ञातः समाधिर्भवतिसहिकैवल्यहेतुसत्वपुरुषान्यताख्यातिपूर्व्वोहिनिरोधश्चित्तमक्रियाकार्य्यकारणेनचरितार्थमधिकारादवसादयति ॥ २० ॥

ननुश्रद्धादयार्थे योगोपायास्तर्हिसर्व्वेषामविशेषेणसमाधितत्फलेस्यातांदृश्यतेतु-कस्यचित्सिद्धिः कस्यचिदसिद्धिः कस्यचिच्चिरेण सिद्धिः कस्यचिच्चिरतरेण सिद्धिः कस्यचित्त्वचिप्रमित्यतआह,— "तेखलुनवयोगिन" – इति। उपायाः श्रद्धादयोमृदु-मध्याधिमात्राः प्राग्भवीयसंस्कारादृष्टवशाद् येषां ते तथोक्ताः। संवेगोवैराग्यं तस्यापि मृदुमध्यतीव्रता प्राग्भवीयवासनादृष्टवशादेवेति तेषुयादृशां चेपीयसी सिद्धिस्ता दर्शयति सूत्रेण,– "तीव्रसंवेगानामासन्नः" इति सूत्रं। शेषं भाष्यं। समाधेः संप्रज्ञातस्य फलमसंप्रज्ञातं तस्यापि कैवल्यम् ॥२१॥

तस्मात् अधिमात्रतीव्रसंवेगस्याऽधिमात्रोपायस्याप्यासन्नतमः समाधिलाभः समाधिफलञ्चेति ॥ २२ ॥

किमेतस्मादेवासन्नतमः समाधिर्भवति ? अथास्य लाभे भवत्यन्योऽपि कश्चिदुपायो नवा ?—इति

ईश्वरप्रणिधानाद्वा ॥ २३ ॥

प्रणिधानाद्भक्तिविशेषाद्आवर्जितईश्वरस्तमनुगृह्णात्यभिध्यानमात्रेण—तदभिध्यानमात्रादपि योगिनः आसन्नतरः समाधिलाभः फलञ्च भवतीति ॥ २३ ॥

अथ प्रधानपुरुषव्यतिरिक्तः कोऽयमीश्वरोनामेति?,—

क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥ २४ ॥

स्तदुभयाधिमात्रत्वात्ततोपिविशेषः । निगदव्याख्यातेनभाष्येनव्याख्यातमिति॥२२॥

सूत्रान्तरव्याप्तयितुंविस्तृणाति—किमेतस्मादेवेति । नवाशब्दः संशयनिवर्त्तकः । ईश्वरप्रणिधानाद्वा । व्याचष्टे—प्रणिधानाद्भक्तिविशेषान्मानसाद्याधिकारिकाद्वा आवर्जितोऽभिमुखीकृतस्तमनुगृह्णातीति अभिध्यानमनागतेऽर्थेइच्छा—इदमस्याभिप्रेतमस्तिति तन्मात्रेण न व्यापारान्तरेण, शेषंसुगमम् ॥ २३ ॥

ननुचेतनाऽचेतनाथामेवव्यूढं नान्येन विश्वं, ईश्वरश्चेदचेतनस्तर्हिप्रधानं,पृथानविकाराणामपिप्रधानमध्यपातात्तथाच नतस्यावर्ज्जनमचेतनत्वादथचेतनस्तथापि चितिशक्तेरौदासीन्यादसंसारितयाचाक्षिप्तादिविरहात्कृतआवर्ज्जनं ?कृतश्चाभिध्यान? मित्याशङ्क्यवानाह,—अथप्रधानेति । अत्र सूत्रेशेषोत्तरमाह—"क्लेशकर्म्मविपाकाशयै-

अविद्यादयः क्लेशाः। कुशलाऽकुशलानि कर्म्माणि। तत्फलं विपाकः। तदनुगुणा वासना आशयाः। ते च मनसि वर्त्तमानाः पुरुषे व्यपदिश्यन्ते--स हि तत्फलस्य भोक्तेति। यथा जयः पराजयोवा योद्धृषु वर्त्तमानः स्वामिनि व्यपदिश्यते—योद्धृनेन भोगेनाऽपरामृष्टः स पुरुषविशेष ईश्वरः।

कैवल्यं प्राप्तास्तर्हि सन्ति च बहवः केवलिनः? ते हि त्रीणि बन्धनानि क्षित्वा कैवल्यं प्राप्ताः—ईश्वरस्य च तत्सम्बन्धो

रपरामृष्टःपुरुषविशेषईश्वरः"अविद्यादयः क्लेशाः,—क्लिश्यन्ति खल्वमी पुरुषं सांसारिकं विविधदुःखप्रहारेणेति। "कुशलाऽकुशलानीति"। धर्म्माधर्म्मास्तेभ्य कर्म्मजत्वादुपचारात् कर्म्मत्वं। विपाकोजात्यायुर्भोगाः। विपाकानुगुणा वासनास्तासाश्चित्तभूमौ आशेरत—इतिआशयाः नहिकरभजातिनिवर्त्तकं कर्म्म प्राग्भवीयकरभभोगभावितांभावनांनद्यादभिव्यनक्तितावत्करभोचितायभोगायकल्पते, तस्माद्भवतिकरभजात्यनुभवजन्माभावनाकरभविपाकानुगुणेति। नन्वमी क्लेशादयोबुद्धिधर्म्माणंकथञ्चिदपिपुरुषं परामृशन्ति तस्मात् पुरुषग्रहणादेव तदपरामर्शसिद्धेः कृतंक्लेशकर्म्मइत्यादिनेत्यतआह,— "तेचमनसिवर्त्तमानाः सांसारिके पुरुषे व्यपदिश्यन्ते—कस्मात्? "सहितत्फलस्यभोक्तृचेतयितेति"। तस्मात्पुरुषत्वादीश्वरस्यापितत्सम्बन्धः प्राप्त—इतितत्प्रतिषेधउपपद्यतेइत्याह,—योद्धृनेन बुद्धिस्थेनापिपुरुषमात्रसाधारणेन भोगेनापरामृष्टःसपुरुषविशेषईश्वरः। विशिष्यतेइति विशेषः पुरुषान्तराद्व्यपच्छिद्यते।

विशेषपदव्यावर्त्त्यं दर्शयितुकामः परिचोदनापूर्व्वं परिहरति—कैवल्यं प्राप्तास्तर्हि—इति। प्रकृतिलयानांप्राकृतोबन्धः, वैकारिकोविदेहानां, दक्षिणादिबन्धोदिव्यादिव्यविषयभोगभाजाम्। तान्यमूनित्रीणिबन्धनानिप्रकृतिभावनासंस्कृतमनसोद्विदेहपातानन्तरमेवप्रकृतिलयतामापन्नाइतीतरेषां पूर्व्वाबन्धकोटिः प्रज्ञायते तेनोत्तरकोटिविधानमात्रेणिहतुपूर्व्वापरकोटिनिषेध—इतिसंक्षिप्यविशेषं दर्शयति—

नभूतो न भावो=यथा मुक्तस्य पूर्वाबन्धकोटिः प्रज्ञायते नैवमीश्वरस्य, यथावा प्रकृतिलीनस्योत्तरा बन्धकोटिः संभाव्यते नैवमीश्वरस्य—स तु सदैव मुक्तः, सदैवेश्वर—इति।

योऽसौ प्रकृष्टसत्वोपादानादीश्वरस्य शाश्वतिकः उत्कर्षः—स किं सनिमित्तः? आहोस्विन्निर्निमित्त?

"सतुसदैवमुक्तः सदैवेश्वर" इति। ज्ञानक्रियाशक्तिसम्पदैश्वर्यः। अत्रपृच्छति—योऽसाविति। ज्ञानक्रिये हि न चिच्छक्तेरपरिणामित्वेसश्वत इति। रजस्तमोरहितविशुद्धचित्तसत्वाश्रयेवक्तव्ये।

नचेश्वरस्यसदामुक्तस्याविद्याप्रभवचित्तसत्वसमुत्कर्षेणसहस्वस्वामिभावसम्बन्धः सम्भवतीत्यतउक्तं, —प्रकृष्टसत्वोपादानादिति। नेश्वरस्यपृथक्जनस्येवाविद्यानिबन्धनचित्तसत्वेनस्वस्वामिभावः, किन्तुतापत्रयंपरीतान् प्रेत्यभावमहार्णवात् जन्तूनुद्धरिष्यामिज्ञानधर्मोपदेशेन। नचज्ञानक्रियासामर्थ्यातिशयसम्पत्तिमन्तरेणतदुपदेशो नचेयमपहतरजस्तमोमलविशुद्धसत्वोपादानंविनेत्यौचित्यसत्वप्रकर्षमुपादत्ते भगवान्-परामृष्टोऽप्यविद्याःविद्याभिमानोवाविद्यायास्तत्वमविद्वान्भवति नपुनरविद्यामविद्यात्वेनसेवमानः नखलुशैलूषोरामत्वमारोप्यतात्त्वार्थादर्शयन्भ्रान्तोभवति तद्विमाहात्म्यमस्यरूपन्नतात्विकमिति।

स्यादेतदुद्दिधीर्षयाभगवतासत्वमुपादेयंतदुपादानेनचतदुद्दिधीर्षाअस्यापिप्राक्तनत्वात्तथाचान्योन्यसंश्रयइत्यतउक्तं,—शाश्वतिकइति। भवेदेतदेवं यदीयं प्रथमता सर्गस्यभवेदनादीतुसर्गसंहारप्रबन्धे सर्गान्तरसमुत्पन्नसञ्जिहीर्षाविधिसमर्थेपूर्णेमयासत्वप्रकर्षउपादेयइतिप्रणिधानंकृत्वाभगवान्सगत्सञ्जहार, तदाचेश्वरचित्तसत्वंप्रणिधानवासनावासितप्रधानसाम्यमुपगतमपिपरिपूर्णेमहाप्रलयावधौप्रणिधानवासनावशात्तथैवेश्वरचित्तसत्वभावेनपरिणमतेयथावेचः स्वःप्रातरेवी त्यातव्यंमयेतिप्रणिधायसुप्तस्तदेवोत्तिष्ठति प्रणिधानसंस्कारात्, तस्मादनादित्वादीश्वरप्रणिधानसत्वोपादानयोः शाश्वतिकत्वे न नान्योन्यसंश्रयः। नचेश्वरस्य चित्तसत्वं महाप्रलयेपिन प्रकृतिसाम्यमुपैतीति वाच्यं? यस्य हि न कदाचिदपि प्रधानसाम्यं न तत्प्रधानिकं नापिचिति-

—इति तस्य शास्त्रं, शास्त्रं पुनः किं निमित्तं ? एतयोः शास्त्रोत्कर्षयोरीश्वरसत्वे वर्त्तमानयोरनादिः

शक्तिः अशक्तात्—इत्यर्थान्तरमप्रामाणिकमापद्येत। तन्नायुक्तं, प्रकृतिपुरुषव्यतिरेकेणार्थान्तराभावात्। सोऽयमीदृशईश्वरस्य शास्त्रातिशय उत्कर्षः किं सनिमित्तः—सप्रणायकः? आहोस्विन्निर्निमित्तः—निष्प्रणायकः?—इति। उत्तरम्—तस्य शास्त्रं निमित्तं—श्रुतिस्मृतीतिहासपुराणानि शास्त्रं। नोदयति—शास्त्रं पुनः किं निमित्तं? प्रत्यक्षानुमानपूर्व्वं हि शास्त्रम्? नचेश्वरस्य सत्वप्रकर्षे कस्यचित् प्रत्यक्षमनुमानं वास्ति। नचेश्वरप्रत्यक्षप्रभवं शास्त्रमितियुक्तं—कल्पयित्वापिह्ययं स्वयं ब्रूयादात्मैश्वर्यप्रकाशनायेतिभावः। परिहरति—प्रकृष्टसत्वनिमित्तम्। अयमभिसन्धिः—मन्वायुर्वेदेषु तावदीश्वरप्रणीतेषु प्रवृत्तिसामर्थ्यादर्थाव्यभिचारविनिश्चयात् प्रमाणं सिद्धम्। नचौषधिभेदानां तत्संयोगविशेषाणाञ्च मन्त्राणाञ्च तत्तद्वर्णावापोद्धारेषु महर्षिणापि पुरुषायुषैर्लौकिकप्रमाणव्यवहारी शक्तः कर्त्तुमन्वयव्यतिरेकौ, नचागमादन्वयव्यतिरेकौ, ताभ्यां चागमस्तत्सन्तानयोरनादित्वादिति प्रतिपादयितुं युक्तं; महाप्रलये तत्सन्तानयोर्विच्छेदात्—नच तद्भावे प्रमाणाभावः। अभिन्नं प्रधानविकारी जगदिति हि प्रतिपादयिष्यते। सदृशपरिणामस्य विसदृशपरिणामता दृष्टा। यथा क्षीरेश्वरसादेर्दधिगुड़ादिरूपं। विसदृशपरिणामस्य पूर्व्वसदृशपरिणामता च दृष्टा। तदिह प्रधानेनापि महदहङ्कारादिरूपविसदृशपरिणामेन सता भाव्यं। कदाचित् सदृशपरिणामेन सदृशपरिणामस्यास्य साम्यावस्था सच महाप्रलयस्तस्मान्मन्वायुर्व्वेदप्रणयनात् तावद्भगवता रजस्तमोमलावरणतया परितः प्रद्योतमानं बुद्धिसत्वमाश्रित्य तयाचाभ्युदयनिःश्रेयसोपदेशपरोपि वेदराशिरीश्वरप्रणीतस्तद्बुद्धिसत्वप्रकर्षादेव भवितुमर्हति। न च सत्वोत्कर्षे रजस्तमःप्रभवौ विभ्रमविप्रलम्भौ सम्भवतस्तत् प्रकृष्टसत्वनिमित्तं शास्त्रमिति। स्यादेतत् प्रकर्षकार्य्यतया प्रकर्षं बोधयच्छास्त्रम् धूमवदनुमानं भवेन्नत्वागम इत्यत आह,—एतयोरिति। न कार्य्यत्वेन बोधयति अपितु नादिवाच्यवाचकभावसम्बन्धेन बोधयतीत्यर्थः। ईश्वरस्यहि बुद्धिसत्वे प्रकर्षोवर्त्तते, शास्त्रमपि तद्वाचकत्वेन तत्र वर्त्तते—इति उपसंहरति,—

सम्बन्धः। एतस्मादेतद्भवति सदैवेश्वरः सदैव मुक्त—इति। तच्च तस्यैश्वर्यं साम्यातिशयविनिर्मुक्तं न तावदैश्वर्यान्तरेण तदतिशय्यते,—यदेवातिशयि स्यात्तदेव तत् स्यात्। तस्माद् यत्र काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वरः, न च तत्समानमैश्वर्यमस्ति। कस्मात्?—द्वयोरेकस्मिन् युगपत् कामितेऽर्थे नवमिदमस्तु पुराणमिदमस्त्विति एकस्य सिद्धावितरस्य प्राकाम्यविघातादूनत्वं प्रसक्तं, द्वयोश्च तुल्ययोर्युगपत्कामितार्थप्राप्तिर्नास्ति, अर्थस्य विरुद्धत्वात्; तस्माद् यस्य साम्यातिशयविनिर्मुक्तमैश्वर्यं सः ईश्वरः, स च पुरुषविशेषः—इति॥ २४॥

एतस्मात् ईश्वरबुद्धिसत्वप्रकर्षवाचकाच्छास्त्रादेतद्भवतिश्रूयते विषयेण विषयिनीलक्षणात्। सदैवेश्वरः सदैव मुक्तः—इति। तदेव पुरुषान्तराद्यावच्छिद्येश्वरान्तरादपि व्यवच्छिनत्ति—तच्च तस्येति। अतिशयविनिर्मुक्तिमाह—नतावदिति। कुतः?—यदेवेति। कस्मात् सर्व्वातिशयविनिर्मुक्तं तदैश्वर्यं?—इत्यत आह,—तस्मादयमेति। अतिशयनिष्ठामप्राप्तानामौपचारिकमैश्वर्यमित्यर्थः। साम्यविनिर्मुक्तिमाह—न च तत्समानमिति। प्राकाम्यमविहतेच्छता तद्विघातादूनत्वम्, अनूनत्वे वा द्वयोरपि प्राकाम्यविघातः कार्य्यानुत्पत्तिरुत्पत्तिर्वा विरुद्धधर्म्मसमालिङ्गितमेकदा कार्य्यमुपलभ्येतेत्याशयवानाह—द्वयोश्चेति। अविरुद्धाभिप्रायत्वे वा प्रत्येकमीश्वरत्वे कृतमन्यैरेकेनैवेप्सनायाः कृतत्वात्; सम्भूयकारित्वे वा न कश्चिदीश्वरः परिषद्वत्, नित्येप्सनायोगिनाच्च पर्य्यायायोगात्, कल्पनागौरवप्रसङ्गाच्चेति द्रष्टव्यं; तस्मात् सर्व्वमवदातम्॥ २४॥

किञ्च,—

तच्च निरतिशयं सर्व्वज्ञबीजम् ॥ २५ ॥

यदिदमतीतानागतप्रत्युत्पन्नप्रत्येकसमुच्चयातीन्द्रियग्रहणमल्पं बह्विति सर्व्वज्ञबीजमेतद्विवर्द्धमानं यत्र निरतिशयं स सर्व्वज्ञः—अस्ति काष्ठाप्राप्तिः सर्व्वज्ञबीजस्य, सातिशयत्वात्—परिमाणवदिति—यत्र काष्ठाप्राप्तिर्ज्ञानस्य स सर्व्वज्ञः स च पुरुष विशेष—इति। सामान्यमात्रोपसंहारे कृतोपचयमनुमानं न विशेषप्रतिपत्तौ समर्थमिति। तस्य संज्ञादिविशेषप्रतिपत्तिरागमतः पर्य्यन्वेष्या। तस्मात्मानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनं। ज्ञानधर्म्मोपदेशेन कल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति। तथा-

एवमस्य क्रियाज्ञानशक्ती शास्त्रं प्रमाणमभिधाय ज्ञानशक्तावनुमानं प्रमाणयति,—किञ्च—"तच्च निरतिशयं सर्व्वज्ञबीजं"। व्याचष्टे—यदिदमिति। बुद्धिसत्त्वावरकतमोपगमतारतम्ये च यदिदमतीतानागतप्रत्युत्पन्नानां प्रत्येकञ्च समुच्चयेन च वर्त्तमानानामतीन्द्रियाणां ग्रहणं—तस्य विशेषणमल्पं बह्विति सर्व्वज्ञबीजं कारणं, कस्मित् किञ्चिदेवातीतादि गृह्णाति, कस्मिंश्चदुत्तरं, कस्मिंश्चदुत्तममिति ग्राह्यापेक्षया ग्रहणस्याल्पं बहुत्वं कृतम्—एतद्विवर्द्धमानं यत्र निष्क्रान्तमतिशयात् स सर्व्वज्ञ—इति तदनेन प्रमेयमात्रं कथितं। अत्र प्रमाणयति—"अस्तिकाष्ठाप्राप्तिः सर्व्वज्ञबीजस्येति" साध्यनिर्द्देशः निरतिशयत्वं काष्ठा यतः परमतिशयवत्ता नास्तीति। तेन तावधिमात्रेण सिद्धसाधनं सातिशयत्वादितिहेतुः। यत्सातिशयं तत्तत्स्वल्पं निरतिशयं यथा कुवलामलकबिल्वेषु सातिशयं महत्त्वमात्मनि निरतिशयमिति व्याप्तिं दर्शयति—परिमाणवत्। न च गरिमादिगुणैर्व्यभिचारइति साम्प्रतं—न खल्ववयव-

उक्तम्—"आदिविद्वान्निर्माणचित्तमधिष्ठाय कारुण्याद्भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाचेति" ॥ २५ ॥

परिमाणवयविनः, किन्वापरमाणुभ्य आत्मावयविभ्यो यावन्तः केचन तेषामप्येकत्रसंघातिनो महिमानः समाकृत्य गरिमवर्धमानाभिमानः ज्ञानमनुप्रतिक्षेयं समाप्यत—इत्यैकविषयतया युक्तं सातिशयमिति न व्यभिचारः । उपसंहरति,—यत्र काष्ठा—इति । ननु सन्ति बहवस्तीर्थकरा बुद्धार्हतकपिलर्षिप्रभृतयस्तत् तस्मात् एव सर्व्वज्ञा न भवन्त्यस्मादनुमानादित्यत आह,—सामान्येति । कुतस्तर्हि तद्विशेषप्रतिपत्तिरित्यत आह,—तस्येति । बुद्धादिप्रणीत आगमाभासो नत्वागमः, सर्व्वप्रमाणबाधितत्वेन विप्रलम्भकत्वादितिभावः । तेन श्रुतिस्मृतीतिहासपुराणलक्षणादागमतः आगच्छन्ति बुद्धिमारोहन्ति । अस्मादभ्युदयनिःश्रेयसीप्राप्या—इत्यागमः । तस्मात्सर्व्वज्ञादिविशेषप्रतिपत्तिः संज्ञाविशेषः शिवेश्वरादिशब्दादिषु प्रसिद्धः । आदिपदेन षड्ऋतादयोऽव्ययते संगृह्यते । यथोक्तं वायुपुराणे—"सर्व्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अनन्तशक्तिश्च विभोर्विधिज्ञाः षड़ाहुरङ्गानि महेश्वरस्य । तथा ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः । स्वष्टृत्वमात्मसंज्ञीधीस्त्वधिष्ठातृत्वमेव च । अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे—इति । स्यादेतन्नित्यलक्षस्य भगवतोवैराग्यातिशयसम्पन्नस्य स्वार्थं कृत्यासम्भवात्, कारुणिकस्य च सुखैकतानजनसर्ज्जनपरस्य दुःखबहुलजीवलोकजननानुपपत्तेः प्रयोजनस्य च प्रेक्षावतः प्रवृत्त्यनुपपत्तेः—क्रियाशक्तिज्ञानिनोपि न जगत् क्रियेत्यत आह,—तस्यात्मानुग्रहाभावेपीति। भूतानां प्राणिनामनुग्रहः प्रयोजनं ब्रह्मादयुपभोगविवेकख्यातिरूपकार्यकरणात् किल,चरितार्थं चित्तं निवर्त्तते ततः पुरुषः केवली भवति अतस्तत्प्रयोजनाय कारुणिकोविवेकख्यात्युपायं कथयति नैनाचरितार्थत्वात् चित्तस्य जन्मनीश्वरः पुष्पापुष्पसहाय: सुखदुःखे भावयन्नपि नाकारुणिकः विवेकख्यात्युपायकथनाय भूतानुग्रहद्वारमाह—ज्ञानधर्म्मोपदेशेनेति । ज्ञानञ्च धर्म्मश्च ज्ञानधर्म्मौ तयोरुपदेशेन ज्ञानधर्म्मसङ्ग यथाज्ञविवेकख्यातिपरि-

स एषः—

पूर्वेषामपि गुरुः कालेनानवच्छेदात्॥२६॥

पूर्वे हि गुरवः कालेनावच्छिद्यन्ते यत्रावच्छेदार्थेन। कालेनोपावर्त्तते, स एष पूर्वेषामपि गुरुः यथास्य सर्गस्यादौ प्रकर्षगत्या सिद्धः तथातिक्रान्तसर्गादिष्वपि प्रत्येतव्यः॥ २६॥

पाकात्। कल्पप्रलये ब्रह्मणोदिनावसाने,यत्र सप्तलोकवर्जं जगदस्तमेति। महाप्रलये सप्तलोकस्य ब्रह्मणोऽपि निधने संसारिणः स्वकारणगामिनोऽतस्तदा मरणदुःखभाजः कल्पे त्वुपलक्षणं। अन्यदपि स्वार्जितकर्म्मपाकवसेन जन्ममरणादिभाजः पुरुषा तुद्धरिष्यामीति कैवल्यं प्राप्य पुरुषा उद्धृता भवन्तीत्यर्थः। एतच्च करुणाप्रयुक्तस्य ज्ञानधर्म्मोपदेशनं कपिलानामपि सिद्धमित्याह,—"तथाचोक्तं आदिविद्वान् कपिल" इति। आदिविद्वानिति पञ्चशिखाचार्यवचनं। आदिमुक्तस्वसन्तानादिगुरुविषयं नत्वनादिमुक्तपरमगुरुविषयं, आदिमुक्तेषु कदाचिन्मुक्तेषु विद्वत्सु कपिलोऽस्माकमादिविद्वान्मुक्तः स एवच गुरुरिति। कपिलस्यापि जायमानस्य महेश्वरानुग्रहादेव ज्ञानप्राप्तिः। श्रूयते हि कपिलोनाम विष्णोरवतारविशेषः प्रसिद्धः; स्वयम्भुस्तु हिरण्यगर्भः तस्यापि साङ्ख्ययोगप्राप्तिर्यदि श्रूयते—इति—स एवेश्वरः आदिविद्वान् कपिलोविष्णुः स्वयम्भूरितिभावः। स्वायम्भुवादीनामसौश्वर—इति भावः॥ २५॥

सम्प्रति भगवती ब्रह्मादिभ्योविशेषमाह,—स एष इति। पातनिका स एष इति। सूत्रं—"पूर्वेषामपिगुरुः कालेनावच्छेदात्"। व्याचष्टे,—पूर्वे हीति। कालसृष्टतवर्षादिः, अवच्छेदार्थेन अवच्छेदनप्रयोजनेन नोपावर्त्तते, न वर्त्तते प्रकर्षस्य गतिः प्राप्तिः प्रत्येतव्य आगमात्तदनेन प्रबन्धेन भगवानीश्वरोदर्शितः॥२६॥

तस्य वाचकः प्रणवः ॥२७॥

वाच्य ईश्वरः। प्रणवस्य किमस्य सङ्केतकृतं वाच्यवाचकत्वम्? अथ प्रदीपप्रकाशवदवस्थितमिति। स्थितोऽस्य वाच्यस्य वाचकेन सह सम्बन्धः सङ्केतस्त्वीश्वरस्य स्थितमेवार्थमभिनयति। यथावस्थितः पितापुत्रयोः सम्बन्धः सङ्केतेनाद्योत्यते अयमस्य पिता, अयमस्य पुत्र इति। सर्गान्तरेष्वपि वाच्यवाचकशक्त्यपेक्षस्तथैव सङ्केतः क्रियते, ॥ २७

सम्प्रतित्यृषिधानं दर्शयितुं तस्य वाचकमाह,—तस्य वाचकः प्रणवः। व्याचष्टे,—वाच्य इति। तत्र परेषां मतं विमर्षद्वारेणोपन्यस्यति,—किमस्येति वाचकत्वं प्रतिपादकत्वं इत्यर्थः। परे हि पश्यन्ति— यदि स्वाभाविकः शब्दार्थयोः सम्बन्धः सङ्केतेनाक्षाच्छब्दादयमर्थः प्रत्येतव्य इत्येवमात्मकेनाभिव्यज्येत ततोयच नास्ति स सम्बन्धस्तव सङ्केतशतेनापि न व्यज्येत—न हिप्रदीपव्यङ्ग्योघटोयव. नास्ति तव प्रदीपसहस्रेणापि शक्यो व्यक्तुं। कृतसङ्केतस्तु करभशब्दोवारणे वारणप्रतिपादकोदृष्टः सङ्केतं कृतमेव वाचकत्वमिति विस्रब्धाभिमतमवधारयति,—स्थितोऽस्येति। अयमभिप्रायः सर्व्वएव शब्दा सर्व्वाकारार्थाभिधानसमर्था— इति स्थित एवैषां सर्व्वाकारैरर्थैः स्वाभाविकः सम्बन्धः। ईश्वरसङ्केतस्तु प्रकाशकश्च नियामकश्च, तस्य ईश्वरसङ्केतासङ्केतकृतस्यास्य वाचकाभिधेयविभागस्तदिदमाह,—सङ्केतस्त्वीश्वरस्येति। निदर्शनमाह,—यथेति। ननु शब्दस्य प्राधानिकस्य महाप्रलयसमये प्रधानभावमुपगतस्य शक्तिरपि प्रलीना ततोमहदादिक्रमेणोत्पन्नस्य वाचकस्येव महेश्वरेण सङ्केतेन न शक्या वाचकशक्तिरभिव्यञ्जयितुं विनष्टशक्तित्वादित्यतआह,—सर्गान्तरेष्वपीति। यद्यपि सह शक्त्या प्रधान साम्यमुपगतः शब्दस्तथापि पुनराविर्भावं तच्छक्तियुक्त एवाविर्भवति. वर्षातिपातसमधिगतमहावटबीजोमेघविसृष्टवारिधारावसेकात्तेन पूर्व्वसम्बन्धसङ्केतानुसारेण सङ्केतः क्रियते भगवता—इति—

सम्प्रतिपत्तिनित्यतया नित्यः शब्दार्थसम्बन्ध इत्यागमिनः प्रतिजानते विज्ञातवाच्यवाचकत्वस्य योगिनः,—

तज्जपस्तदर्थभावनम्॥ २८॥

प्रणवस्य जपः। प्रणवाभिधेयस्य चेश्वरस्य भावनं। तदस्य योगिनः प्रणवं जपतः, प्रणवार्थञ्च भावयतश्चित्तमेकाग्र्यं सम्पद्यते। तथाचोक्तं।

स्वाध्यायाद् योगमासीत योगात् स्वाध्यायमामनेत्।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते इति ॥२८॥

किञ्चास्य भवति? —

ततः प्रत्यक् चेतनाधिगमोऽप्यन्तरायाभावश्च ॥ २९ ॥

तस्मात्सम्प्रतिपत्तेः सदृशव्यवहारपरम्परयानित्यतया नित्यःशब्दार्थयोः सम्बन्धः न कूटस्थनित्य—इत्यागमिकाः प्रतिजानते, न पुनरागमनिरपेक्षाः; सर्गान्तरेष्वपि तादृश एव सङ्केत—इति प्रतिपत्तुमीशत इति भावः॥ २७॥

वाचकमाख्याय प्रणिधानमाह,—तज्जपः तदर्थभावनम्। व्याचष्टे,—प्रणवस्येति। भावनं पुनःपुनश्चेतसि निवेशनम्। ततः किं सिद्धाति—इत्यत आह,—प्रणवमिति। एकस्मिन् भगवति आरमति चित्तम्। अत्रैव वैयासिकीं गाथामुदाहरति,—तस्या चेति। ततः ईश्वरः समाधितत्फलनाभेन तमनुगृह्णाति॥ २८॥

किञ्चापरमस्मात् —ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च। प्रतीपं विपरीतमञ्चति—विजानाति इति प्रत्यक् स चासौ चेतनश्चेति प्रत्यक्चेतनोऽविद्या-

ये तावत् अन्तरायाः व्याधिप्रभृतयः ते तावदीश्वर-प्रणिधानान्न भवन्ति, स्वरूपदर्शनमप्यस्य भवति। यथैवेश्वरः पुरुषः शुद्धः प्रसन्नः केवलोऽनुपसर्गः। तथायमपि बुद्धेः प्रतिसंवेदी यः पुरुष एव अधिगच्छति ॥ २९ ॥

अथ केऽन्तरायाः ? ये चित्तस्य विक्षेपकाः ? के पुनस्ते, कियन्तोवेति—

व्याधिस्त्यानसंशयप्रमादालस्याऽविरतिभ्रान्ति-दर्शनाऽलब्धभूमिकत्वाऽनवस्थितत्वानि चित्तविक्षे-पास्तेऽन्तरायाः ॥ ३० ॥

नवान्तरायाश्चित्तस्य विक्षेपाः। सहेते चित्तवृत्तिभि

वान् पुरुषः तदनेनेश्वरात् शाश्वतिकसत्वोत कर्षसम्पन्नात् विद्यावतीनिवर्त्तयति। प्रतीचश्चेतनस्याधिगमोज्ञानं स्वरूपतोऽस्य भवति। अन्तराया वक्ष्यमानास्तद् भावश्च। अस्यविवरणं ये—तावदिति। स्वमात्मातस्य रूपं रूपयहणेनाविद्या-प्रसारीपितान् धर्म्मान्निषेधति। नन्वीश्वरप्रणिधानमीश्वरविषयं, कथमिव प्रत्यक्-चेतनं साक्षात् करोत्यतिप्रसङ्गादित्यत आह,—यथैवेश्वर इति। शुद्धः कूटस्थनि-त्यतयोदयव्ययरहितः प्रसन्नः क्लेशवर्ज्जितः केवलोधर्म्माधर्म्मापेतः, अतएवानुपसर्गः उपसर्गाःनात्यायुर्भोगाः। सादृश्यस्य किञ्चिद्वैदाधिष्ठानत्वादीश्वरात् भिनत्ति,—बुद्धेः प्रतिसंवेदीति। तदनेन प्रत्यक्यहणं व्याख्यातं अत्यन्तविधर्म्मिणीरन्यतरार्था-नुचिन्तनं न तदितरस्य साक्षात्काराय कल्पते; सदृशार्थानुचिन्तनन्तु सादृश्या-न्तरसाक्षात्कारोपयोगितामनुभवति, एकशास्त्राभ्यास इव तत् सदृशार्थशास्त्रान्तु ज्ञानोपयोगितां। प्रत्यासत्तिस्तु स्वात्मनिसाक्षात्कारहेतुर्न परात्मनी सर्व्व-मुवदातम् ॥ २९ ॥

भवन्तिएतेषामभावे न भवन्ति पूर्वोक्ताश्चित्तवृत्तयः। व्याधिर्धातुरसकरणवैषम्यं। स्त्यानं अकर्मण्यता चित्तस्य। संशयः—उभयकोटिस्पृग्विज्ञानं=स्यादिदं एवं, नैवं स्यादिति। प्रमादः—समाधिसाधनानामभावनं। आलस्यं—कायस्य चित्तस्य च गुरुत्वादप्रवृत्तिः। अविरतिः—चित्तस्य विषयसंप्रयोगात्मा गर्द्धः। भ्रान्तिदर्शनं—विपर्ययज्ञानं। अलब्धभूमिकत्वं—समाधिभूमेरलाभः। अनवस्थितत्वं—यल्लब्धायां भूमौ चित्तस्याप्रतिष्ठा=समाधिप्रतिलम्भे हि सति तदवस्थितं स्यादिति—एते चित्तविक्षेपाः नव योगमलाः योगप्रतिपक्षा—योगान्तराया इत्यभिधीयन्ते॥३०॥

पृच्छति—अथकइति। सामान्योत्तरं—य इति। विशेषसंख्यं पृच्छति—क इति। उत्तरं—व्याधीत्यादि सूत्रम्। अन्तराया: नव, एताश्चित्तवृत्तयोयोगान्तराया:—योगविरोधिनश्चित्तस्य विक्षेपकाः। चित्तं खलमी व्याध्यादयोयोगादिक्षिपन्ति अपनयन्तीति विक्षेपाः। योगप्रतिपक्षत्वे हेतुमाह,—सहैत इति। संशयभ्रान्तिदर्शने तावद्वृत्तितया वृत्तिनिरोधप्रतिपक्षौ येपि न वृत्तयोव्याधिप्रभृतयस्तेपि वृत्तिसाहचर्यात्तत्प्रतिपक्षा इत्यर्थः। पदार्थान् व्याष्टे,—व्याधिरिति। धातवोवातपित्त श्लेष्माणः शरीरधारणात्। अशितपीताहारपरिणामविशेषोरसः। करणानीन्द्रियाणि। तेषां वैषम्यं न्यूनाधिकभाव इति। अकर्मण्यता कर्म्मानर्हता। संशय उभयकोटिस्पृग्विज्ञानं सत्यप्यतद्रूपप्रतिष्ठत्वेनसंशयविपर्य्यासयोरभेदे उभयकोटिस्पर्शास्पर्शरूपाऽवान्तरविशेषविवक्षयाच्च भेदोपन्यासः। अभावनमकरणं तत्राप्रयत्नइति यावत्। कायस्य गुरुत्वं कफादिना चित्तस्य गुरुत्वं तमसा। गृद्धिस् तृष्णा। मधुमत्यादयः समाधिभूमयः लब्धभूमेर्य्यदि तावतैव सुस्थितं मन्यस्य समाधिभेदः स्यात्ततस्तस्या अपि भूमेरपायः स्यात्। तस्मात् समाधिप्रतिलम्भे तदवस्थितं स्यात्तस्मात्तत्र प्रयतितव्यमिति॥३०॥

दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासाः विक्षेपसहभुवः ॥ ३१ ॥

दुःखमाध्यात्मिकं आधिभौतिकं आधिदैविकञ्च । येनाभिहताः प्राणिनस्तदुपघाताय प्रयतन्ते तत् दुखं । दौर्मनस्यं इच्छाविघाताच्चेतसः क्षोभः । यदङ्गान्येजयति—कम्पयति, तदङ्गमेजयत्वं । प्राणीयद्वाह्यं वायुमाचामति स श्वासः । यत्कौष्ठ्यं वायुं निःसारयति स प्रश्वासः । एते विक्षेपसहभुवः—विक्षिप्तचित्तस्यैते भवन्ति, समाहितचित्तस्यैते न भवन्ति ॥ ३१ ॥

अथैते विक्षेपाः समाधिप्रतिपक्षाः, ताभ्यामेवाभ्यासवैराग्याभ्यांनिरोद्धव्याः—तत्राभ्यासस्य विषयमुपसंहरन्निदमाह,—

तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥ ३२ ॥

न केवलः नवान्तरायाः दुःखादयोऽप्यस्य तत्सहभुवोभवन्तीत्याह दुःख इत्यादि । प्रतिकूलवेदनीयं दुःखं आध्यात्मिकं, शारीरं व्याधिवशात्, मानसञ्च कामादिवशात्, आधिभौतिकं । व्याघ्रादिजनितं, आधिदैविकं ग्रहपीड़ादिजनितं । तच्चेदं दुःखं प्राणिमात्रस्य प्रतीकूलवेदनीयतया हेयमित्याह,—येनाभिहता इति । अनिच्छतः प्राणीयद्वाह्यं वायुमाचामति पिवति प्रवेशयतीति यावत् स श्वासः समाध्यङ्गरेचकविरोधी । अनिच्छतोपि प्राणीयत् कौष्ठ्यं वायुं निःसारयति स प्रश्वासः समाध्यङ्गपूरकविरोधी ॥ ३१ ॥

विक्षेपप्रतिषेधार्थमेकतत्त्वावलम्बनं चित्तमभ्यसेत्। यस्य तु प्रत्यर्थनियतं प्रत्ययं क्षणिकञ्च चित्तं, तस्य सर्व्वमेव चित्तं एकाग्रं, नास्त्येव विक्षिप्तं। यदि पुनरिदं सर्व्वतः प्रत्याहृत्य एकस्मिन्नर्थे समाधीयते! तदा भवत्येकाग्रमित्यतो न प्रत्यर्थनियतं। योऽपि सदृशप्रत्ययप्रवाहेन चित्तमेकाग्रं मन्यते—तस्यैकाग्रता यदि प्रवाहचित्तस्य धर्म्मः तदेकं नास्ति, प्रवाहचित्तं, क्षणिकत्वात्। अथ प्रवाहांशस्यैव प्रत्ययस्य धर्म्मः? स सर्व्वं सदृशप्रत्ययप्रवाहो वा विसदृशप्रत्ययप्रवाहो वा? प्रत्यर्थनियतत्वादेकाग्र एवेति विक्षिप्तचित्तानुपपत्तिः; तस्मादेकमनेकार्थमवस्थितं चित्तमिति। यदि च चित्तेनैकेनानन्विताः स्वभावभिन्नाः प्रत्यया जायेरन् अथ कथमन्यप्रत्ययदृष्टस्यान्यः स्मर्त्ता भवेत्! अन्यप्रत्ययोपचितस्य कर्म्माशयस्यान्यः प्रत्यय उपभोक्ता भवेत्! कथञ्चित् समाधीयमानमप्येतन्नीमयपायसीयं न्यायमाक्षिपति।

किञ्च स्वात्मानुभवापह्नवः चित्तस्यान्यत्वे प्राप्नोति, कथं यदहमद्राक्षं तत् स्मरामि, यच्चास्मार्षं तत्पश्यामीति—अहमिति प्रत्ययः सर्व्वस्य प्रत्ययस्य भेदे सति प्रत्ययिन्यभेदेनोपस्थितः एकप्रत्ययविषयोयं अभेदात्मा अहमिति प्रत्ययः—कथं अत्यन्तभिन्नेषु चित्तेषु वर्त्तमानः सामान्यमेकं प्रत्ययिनमाश्रयेत्!—स्वानुभवग्राह्यश्चायं अभेदात्मा अहमिति प्रत्ययः। न च प्रत्यक्षस्य माहात्म्यं प्रमा-

यान्तरेणाभिभूयते—प्रमाणान्तरञ्च प्रत्यक्षबलेनैव व्यवहारं लभते ; तस्मादेकमनेकार्थमवस्थितञ्च चित्तं ॥ ३२ ॥

उक्तार्थोपसंहारसूत्रमवतारयति,—अथेत इति। अथोक्तार्थानन्तरमुपसंहरन्निदं सूचमाहेति सम्बन्धनिरोद्धव्यत्वे हेतुरुक्तः। समाधिप्रतिपत्ता इति। यद्यपीश्वर प्रणिधानादित्यभ्यासमात्रमुक्तं तथापि वैराग्यमिह तत्सहकारितया याह्यमित्याह,—ताभ्यां उक्तलक्षणाभ्यामेवाभ्यासवैराग्याभ्यां निरोद्धव्यः। तच्च—तयोरभ्यासवैराग्ययोर्मध्ये अभ्यासस्यानन्तरोक्तस्येति तत्प्रतिषेधार्थमित्यादि। एकं तत्त्वमीश्वरः प्रकृतत्वादि, वैनाशिकानां तत्सर्व्वमेकायमेव चित्तं नास्ति किञ्चिद्भिन्नमिति। तदुपदेशानां तदर्थानाञ्च प्रवृत्तीनां वैयर्थ्यमिति। यस्यैति—यस्य मते प्रत्यये अर्थभासे एकस्मिन्ननेकस्मिन् वा नियतं यावदर्थाभासमुत्पन्नं तत्रैव समाप्तमनन्यगामि। अर्थान्तरं तावत्यूर्वं गृहीत्वार्थान्तरमपि पश्चात् कस्मान्नगृह्णातीत्यत आह,—

"क्षणिकत्वं"। क्षणस्याभेद्यत्वेन पूर्व्वपश्चाद्भावस्याप्यभावः। अस्मन्मतेऽप्यक्षणिकं चित्तं—स्वविषये एकस्मिन्ननेकस्मिन्वानवस्थितं प्रतिक्षणं तत्तद्विषयोपादानपरित्यागाभ्यां विषयाणि यतः विक्षिप्तमतोविक्षेपपरिणाममपनीय शून्यैकाग्रताधातुमिति तदुपदेशप्रवृत्त्योर्नानर्थक्यमित्याह,—यदिपुनरिदमिति। उपसंहरति। अतीनेति। वैनाशिकमुत्थापयति—योपीति। मामूदेकस्मिन् क्षणिकेचित्ते एकाग्रताधानप्रयत्नः, चित्तसन्तानेत्वनादावक्षणिके विक्षेपमपनीय एकाग्रता धास्यत इत्यर्थः। तदेतद्विकल्प्य दूषयति,—तस्य दर्शने एकाग्रता यदि प्रवाहचित्तस्य चित्तसन्तानस्य वा धर्म्मः? तत्रैकं क्रमवदुत्पादेषु प्रत्ययेष्वनुगतं नास्ति प्रवाहचित्तम्। कुतो यदि यावदस्ति तस्य सर्व्वस्य क्षणिकत्वादक्षणिकस्य चासत्त्वाङ्गवतां दर्शन—इति भावः। द्वितीयं कल्पं गृह्णाति—अथेति। सांक्षत्तस्य प्रवाहस्यांशः प्रत्ययः परमार्थसन् तस्य प्रत्ययस्यैकाग्रता प्रयत्नसाध्योधर्म्मः। दूषयति—स सर्व्वः सांक्षत्तप्रवाहापेक्षया सदृशः प्रवाही वा विसदृशप्रवाही वा?—अतः परमार्थसता रूपेण प्रत्ययनियतत्वात् यदार्थाभास उत्पन्नस्तत्र समाप्तत्वादेकाग्र एवेति विक्षिप्तचित्तानुपपत्तिः। यदपनयेनैकाग्रता प्रतीयते—इति। उपसंहरति,—तस्मादिति। इतोऽपि चित्तमेकमनेकार्थ-

नवस्थितं चेत्याह,—यदिचेति। यथाहि मैत्रेणाधीतस्य न चैत्रः स्मरति, यथा मैत्रेणोपचितस्य पापस्य वा कर्म्माशयस्य फलं तदसम्बन्धी चैत्रो न भुङ्क्ते। एवं प्रत्यक्षान्तरदृष्टस्य प्रत्ययान्तरं न स्मरेत्, प्रत्ययान्तरोपचितस्य वा कर्म्माशयस्य फलं न प्रत्ययान्तरमुपभुञ्जीतेत्यर्थः। ननु नातिप्रसज्यते कार्य्यकारणभावे सतीति विशेषणात् आम्रबीजान्नारीयेष्टादावकर्तृमातृपितृपुत्रादिगामिफलदर्शनात् मधुररसभावितानां वा आम्रबीजादीनां परम्परया फलमाधुर्य्यनियमादित्यत आह,—समाधीयमानमप्येतदिति। अयमभिसन्धिः—कः खल्वेकसन्तानवर्त्तिनां प्रत्ययानां सन्तानान्तरवर्त्तिभ्यः प्रत्ययेभ्योविशेषो येनैकसन्तानवर्त्तिना प्रत्ययेनानुभूतस्योपचितस्य च कर्म्माशयस्य तत्सन्तानवर्त्तीव प्रत्ययः स्मर्त्ता भोक्ता च स्यात् नान्यसन्तानवर्त्ती — नहि सन्तानो नाम कश्चिदस्ति वस्तुसत् यएनं सन्तानिनं सन्तानान्तरवर्त्तिभ्यो भिन्द्यात्। नच काल्पनिकोभेदः क्रियायामापद्यते--नखलुकल्पिताग्निभावोमाणवकः पचति। न च कार्य्यकारणसम्बन्धोपि वास्तवः सहभूवोसव्येतरविषाणयोरिवाभावात् असहभुवोरपि प्रत्युत्पन्नाश्रयत्वायोगात्—नष्टातीतानागतीव्यासज्य प्रत्युत्पन्नं वर्त्तितुमर्हतः। तस्माद् सन्तानेन वा कार्य्यकारणभावेन वा स्वाभाविकेनानुपहिताः परमार्थसन्तः प्रत्ययाः परस्परासंस्पर्शित्वेन स्वसन्तानवर्त्तिभ्यः परसन्तानवर्त्तिभ्योवा प्रत्ययान्तरेभ्यो न भिद्यन्ते—सीयं गौनयश्च पायसश्चाधिकृत्य प्रवृत्तोन्यायोगीमयं पायसं मन्यत्वादुभयसिद्धपायसवदिति तमाक्षिपति। न्यायाभासत्वेन ततोप्यधिकत्वादिति—नचाच कृतनाशाकृताभ्यागमं चोद्यं—यतश्चित्तमेव कर्म्मणां कर्त्र—तदेव तत्फलितायां सुखदुःखाप्त्यां युज्यते; सुखदुःखैश्च चितिच्छायापन्नं चित्तं भुङ्क्त—इति पुरुषे भोगाभिमानः चितिचित्तयोरभेदग्रहादिति। स्वप्रत्ययं प्रतीत्य समुत्पन्नानां स्वभावएवैषां तादृशो यत्त एव स्मरन्ति, फलं चोपभुञ्जते—नत्वन्ये। नच स्वभावा नियोगपर्य्यनुयोगावर्हन्ति एवं भवतुमैवभूत इति वा कस्मान्नैवमिति चेति यः पूर्व्वोक्तं न परितुष्यति तंप्रत्याह,—किञ्चस्यादिति। उदयव्ययधर्म्माणामनुभवस्मृतीनाञ्च नानात्वेपि तदाश्रयमभिन्नं चित्तमस्मिति प्रत्ययः प्रतिसन्धानः कथमत्यन्तभिन्नान् प्रत्ययानालम्बते। ननुग्रहणस्मरणरूपकारणभेदात् पारोचापारोचारूपविरुद्धधर्म्म संसर्गाद्वा न प्रत्यभिज्ञानं नामैकःप्रत्ययः—यतः प्रत्ययिनश्चित्तस्यैकता व्याहन्यत आह,—स्वानुभवेति। ननु कारणभेद विरुद्धधर्म्मसंसर्गावेववाधकावुक्ता-

यस्य चित्तस्यावस्थितस्येदं शास्त्रेण परिकर्म्म निर्द्दिश्यते, तत्कथं ?—

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्या-पुण्यविषयाणां भावनातश्चित्तप्रसादनम् ॥ ३३ ॥

तत्र सर्व्वप्राणिषु सुखसम्भोगापन्नेषु मैत्रीं भावयेत्। दुःखितेषु करुणां। पुण्यात्मकेषु मुदितां। अपुण्यशीलेषु-पेक्षाम्:—एवमस्य भावयतो शुक्लोधर्म्मउपजायते—ततश्चित्तं प्रसीदति प्रसन्नमेकाग्रं स्थितिपदं लभते ॥३३॥

प्रच्छर्द्दनविधारणाभ्यां वा प्राणस्य ॥३४॥

कौष्ठ्यस्य वायोर्नासिकापुटाभ्यां प्रयत्नविशेषात् वमनं प्रच्छर्द्दनं विधारणं प्राणायामः ताभ्यां वा मनसः स्थितिः संप्रसादयेत् ॥ ३४ ॥

विस्तर आह,—नच प्रत्यचेति। प्रत्यचानुसारतएवसामग्र्यभेदः पारीच्या-पारीच्यधर्म्माविरोधिनी पयादितोन्याय कणिकायां अचणिकस्यचार्थक्रियान्यायक-णिका ब्रह्मतलसमीचाभ्यामुपपादितेति सर्व्वमवदातम् ॥३२॥

अपरिकर्म्मितमनसोसूयादिमतसमाधितदुपायसम्पत्त्यनुत्पादात् चित्तप्रसादनोपा-यानसूयादिविरोधिनः प्रतिपादयितुमुपक्रमते—यस्य,—चित्तस्या वस्थितस्येदमिति। मैत्रीकरुणेत्यादि प्रसादनान्तम्। सुखितेषु मैत्री सौहार्द्दं भावयेत ईर्षाकालुष्यं निवर्त्तते चित्तस्य। दुःखितेषुच करुणामात्मनीव परस्मिन दुःख प्रहाणेच्छां

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी ॥ ३५ ॥

नासिकाग्रे धारयतोऽस्य या दिव्यगन्धसंवित्सा गन्धप्रवृत्तिः जिह्वाग्रे रससंवित् तालुनि रूपसंवित् जिह्वामध्ये स्पर्शसंवित् जिह्वामूले शब्दसंवित् इत्येताः प्रवृत्तय उत्पन्नाः मनसः स्थितिनिबन्धनीः भवन्ति। विषयवत्यः इत्यनुवर्तते। ताश्च प्रवृत्तयः प्रत्येकं मनसः स्थितिं निबध्नन्ति। कथं पुनरेकैकविषया प्रवृत्तिः सती मनसः स्थितिं निबध्नाति। उच्यते—

भावयतः परापकारचिकीर्षाकालुष्यं चेतसो निवर्तते। पुण्यशीलेषु प्राणिषु मुदितां हर्षं भावयतः असूयाकालुष्यं चेतसो निवर्तते। अपुण्यशीलेषु क्लेशेषु माध्यस्थं भावयतोऽमर्षकालुष्यं चेतसो निवर्तते। ततश्चास्य राजसतामसधर्मनिवृत्तौ सात्विकः शुक्लोधर्मो उपजायते। सत्वोत्कर्षसम्पन्नः सम्भवति। वृत्तिविरोधपटुं तस्य प्रसादख्याभाव्यात्चित्तं प्रसीदति प्रसन्नस्य वक्ष्यमाणेभ्य उपायेभ्यः एकाग्रं स्थितिपदं लभते। अस्त्यां पुनर्मैत्र्यादिभावनायां सतेउपायाः स्थित्यै कल्पन्ते—तानिदानीं स्थित्युपायानाह ॥ ३२ ॥

वाशब्दो वक्ष्यमाणोपायान्तरापेक्षो विकल्पार्थेन मैत्र्यादिभावनापेक्षया तया सह समुच्चयात्। प्रच्छर्दनं विवृणोति—कौष्ठ्यस्येति। प्रयत्नविशेषात् योगशास्त्रविहितात् येन कौष्ठ्यो वायुर्नासिकापुटाभ्यां शनैरेचयते। विधारणं विवृणोति विधारणं प्राणायामः रेचितस्य कौष्ठ्यस्य वायोर्यदायामी बहिरेव स्थापनं न तु सह सामवेशनं तदेताभ्यां प्रच्छर्दनविधारणाभ्यां वायोर्लघुकृतशरीरस्य मनः स्थितिपदं लभते। अत्रचोत्तरसूत्रगतात्स्थितिनिबन्धनीतिपदात् स्थितिग्रहणमाकृष्य सम्बन्धयेदित्यर्थः प्राक्ते न सम्बन्धनीयः ॥ ३४ ॥ स्थित्युपायान्तरमाह

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी। व्याचष्टे—नासिकाग्रे धारयत इति। धारणाध्यानसमाधीन् कुर्वतस्तज्जयात् या दिव्यगन्धसंवित् सा साक्षात्कारः एवमन्यास्वपि प्रवृत्तिषु योज्यं। एतच्चागमात् प्रत्येतव्यं नोपपत्तितः। स्यादेतत् किमेतादृग्भिः वृत्तिभिः कैवल्यं प्रत्यनुपयोगिभिरित्यत आह। एतावत्तयोऽस्यैव कालेनोत्पन्नाश्चित्तमीश्वरविषयां वा विवेकख्यातिविषयां वा स्थितिं निबध्नन्ति

वाश्चित्तं स्थितौ निबध्नन्ति संशयंविधमन्ति समाधिप्रज्ञायाञ्च द्वारीभवन्तीति। एतेन चन्द्रादित्यग्रहमणिप्रदीपरश्मादिषु प्रवृत्तिरुत्पन्ना विषयवत्त्वे व वेदितव्या। यद्यपि हि तत्तच्छास्त्रानुमानाचार्य्योपदेशैरवगतमथतत्वं सङ्गृहीतमेव भवति एतेषां यथाभूतार्थप्रतिपादनसामर्थ्यात्तथापि यावदेकदेशोपि कश्चित् न स्वकरणसंवेद्यो भवति तावत् सर्व्वं परोक्षमिव अपवर्गादिषु सूक्ष्मेष्वर्थेषु न दृढ़ां बुद्धिमुत्पादयति तच्छास्त्रानुमानाचार्य्योपदेशोपोद्बलनार्थमेवावश्यं कश्चित् विशेषः प्रत्यक्षीकर्त्तव्यः, तत्र तदुपदेष्टार्थैकदेशप्रत्यक्षत्वे सति सर्व्वं सुसूक्ष्मविषयमप्यापवर्गात् श्रद्धीयते। एतदर्थमेवेदं चित्तपरिकर्म्म निर्दिश्यते। अनियतासु वृत्तिषु तद्विषयायां वशीकारसंज्ञायां उपजातायां समर्थं स्यात् तस्य तस्यार्थस्य प्रत्यक्षीकरणायेति। तथाच सति श्रद्धावीर्य्यस्मृतिसमाधयोऽस्याः प्रतिबन्धेन भविष्यन्तीति॥

नन्वस्य विषयावृत्तिः कथमन्यचस्थितं निबध्नातीत्यत आह—संशयं विधयन्ति अपसारयन्ति अतएव समाधिप्रज्ञायां इतिवृत्यन्तराणामप्यागमसिद्धानां विषयवत्वमतिदर्शयति। एतेनेति। नन्वागमादिभिरवगतेष्वर्थेषु कुतः संशय इत्यत आह।

यद्यपीहीति। श्रद्धामूलोहि योग उपदिष्टार्थैकदेशप्रत्यक्षीकरणे च श्रद्धातिशयी जायते तन्मूलाश्च ध्यानादयोस्याप्रत्यूहं भवन्तीत्यर्थः। विशोका वा ज्योतिष्मती। विगतशोका दुःखरहिता ज्योतिष्मती ज्योतिरस्या अस्तीति ज्योतिष्मती प्रकाशरूपा हृदयपुण्डरीक इति। उदरउरसीमध्ये यत्पद्ममधोमुखं तिष्ठति अष्टदलं रेचकप्राणायामेन तदूर्द्धमुखं कृत्वा तत्र चित्तं धारयेत् तन्मध्ये सूर्यमण्डलं अकारो जागरितस्थानं तस्योपरि चन्द्रमण्डलं उकारः स्वप्नस्थानं तस्योपरि वह्निमण्डलं मकारःसुषुप्तिस्थानं तस्योपरि परं ज्योतीरूपकं ब्रह्मनादं तुरीयस्थानं अर्द्धमात्र

विशोका वा ज्योतिष्मती ॥ ३६ ॥

प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनीति अनुवर्तते हृदयपुण्डरीके धारयतो या बुद्धिसंवित् बुद्धिसत्वं हि भास्वरमाकाशकल्पं तत्र स्थितिवैशारद्यात् प्रवृत्तिः सूर्येन्दुग्रहमणिप्रभारूपाकारेण विकल्पते। तथास्मितायां समापन्नं चित्तं निस्तरङ्गं महोदधिकल्पं शान्तमनं तमस्मितामात्रं भवति। यत्तदुक्तं—तमनुमात्रमात्मानमनुविद्यास्मीति एवं तावत् प्रतिजानीते इत्येषद्वयी विशोका विषयवती अस्मिता मात्रा च प्रवृत्तिर्ज्योतिष्मतीत्युच्यतेऽत आह। [illegible] योगिनश्चित्तं स्थितिपदं लभते इति ॥ ३६ ॥

उदाहरन्ति ब्रह्मवादिनः। तत्कर्णिकायामुर्ध्वमुखी सूर्यादिमण्डलमध्यगा ब्रह्मनाड़ी तत्तीर्थ्वं प्रवृत्ता सुषुम्ना नाम नाड़ी तया खलु वाय्वाद्यपि सूर्यादीनि मण्डलानि प्रीतानि सन्ति चित्तस्थानं तस्यां धारयतो योगिनश्चित्तसंवित् उपजायते ॥ उपपत्तिपूर्वकं बुद्धिसंविदः आकारमादर्शयति। बुद्धिसत्वं हीति आकाशकल्पमिति व्यापितामाह।

सूर्यादीनां प्रभास्वरं रूपं तदाकारेण विकल्पते नानारूपा भवति। मनसश्चात्र बुद्धिरभिमता न तु महत्तत्वं तस्य च सुषुम्नास्थस्य वैकारिकाहङ्कारजन्मनः सत्वबहुलतया ज्योतीरूपता विवक्षिता तत्तद्विषयगोचरतया च व्यापित्वमपि सिद्धं ॥ अस्मिता कार्ये मनसि समापत्तिं दर्शयित्वाऽस्मितासमापत्तेः स्वरूपमाह।

तथेति। शान्तमपगतरजस्तमस्तरङ्गं अनन्तं व्यापि अस्मितामात्रं न पुनर्नानाप्रभारूपं आगमान्तरेण स्वमतं समीकरोति। यत्तदुक्तं पञ्चशिखेन तमस्तु दुरधिगमत्वादात्मानमहङ्कारास्पदमनुविद्यानुचिन्त्यास्मीत्येवं तावज्जानीत इति

वीतरागविषयं वा चित्तम् ॥ ३७ ॥

स्वप्ननिद्राज्ञानालम्बनं वा ॥ ३८ ॥

यथाभिमतध्यानाद्वा ॥ ३९ ॥

वीतरागचित्तालम्बनोपरक्तं वा योगिनश्चित्तं स्थितिपदं लभते इति ॥ ३७ ॥

स्वप्नज्ञानालम्बनं निद्राज्ञानालम्बनं वा तदाकारं योगिनश्चित्तं स्थितिपदं लभते इति ॥ ३८ ॥

यदेवाभिमतं तदेव ध्यायेत् तत्र लब्धस्थितिकमन्यत्रापि स्थितिपदं लभत इति ॥ ३९ ॥

स्यादेतत् नानाप्रभारूपी भवतु ज्योतीष्यती कथं अस्मितामात्ररूपा ज्योतिष्मतीत्यत आह ।

एषाऽपीति । विधूतरजस्तमोमलास्मितैव सत्त्वमयी ज्योतिरितिभावः । द्विविधाया अपि ज्योतिष्मत्याः फलमाह ।

यथेति । वीतरागविषयं वा चित्तं । वीतरागाः कृष्णद्वैपायनप्रभृतयः तेषां चित्तं तदेवालम्बनं तेनोपरक्तमिति । स्वप्ननिद्राज्ञानावलम्बनं वा । यदा स्वल्पं स्वपेर्विविक्तवसनसन्निवेशश्वत्रिनीसुतकीर्णमिव चन्द्रमण्डलात् क्षीरलवणालशकुलानुकारिभिरङ्गप्रत्यङ्गैरुपेतामभिजाय चन्द्रकालमणिमयीमतिसुरभिमालतीमल्लिकामालाहारिणीं मनोहरां भगवतीं महेश्वरस्य प्रतिमामाराधयन्नेव प्रबुद्धप्रसन्नमनास्तदा तामेव स्वप्नज्ञानालम्बनीभूतामनुचिन्तयतस्तस्य तदेकाकार मनसस्तत्रैव चित्तं स्थितिपदं लभते । निद्रा चेद्द्रालिकीयद्दीतव्या यस्यां प्रबुद्धस्य सुखमहमस्वाप्समिति प्रत्यवमर्शो भवति । एकार्थं हि तस्यां मनीभवति तावन्मात्रेण चीर्णं । एतदेव ब्रह्मविदो ब्रह्मणोरूपमुदाहरन्ति ।

परमाणुपरममहत्वान्तोऽस्य वशीकारः॥४०॥

सूक्ष्मे निविशमानस्य परमाणुत्वं स्थितिपदं लभतइति स्थूले निविशमानस्य परममहत्वान्तं स्थितिपदं चित्तस्य एवं तामुभयीं कोटिमनुधावतोयोस्याप्रतिघातः सपरोवशीकारः तद्वशीकारात् परिपूर्णं योगिनश्चित्तं न पुनरभ्यासकृतं परिकर्म्मापेक्षत इति ॥ ४० ॥

अथ लब्धस्थितिकस्य चेतसः किं स्वरूपा किं विषया वा समापत्तिरिति,तदुच्यते—

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहण ग्राह्येषु तत्स्थतदञ्जनता समापत्तिः॥ ४१ ॥

क्षीणवृत्तेरिति प्रत्यस्तमितप्रत्ययस्येत्यर्थः अभिजातस्येव मणेरिति दृष्टान्तोपादानं। यथा—स्फटिक उपाश्रयभेदात्

सुषुप्तावस्थेति। ज्ञानञ्च ज्ञेयरहितं न शक्यं गोचरयितुमिति ज्ञेयमपि गोचरीक्रियते ॥ ३९ ॥

किं बहुना यदेवाभिमतं तत्तद्देवतारूपमिति कथं पुनः स्थितिपदमात्मीभावेनगन्तव्य इत्यत आह।

परमाणु परममहत्वान्तोऽस्यवशीकारः। व्याचष्टे। सूक्ष्म इति उक्तमर्थं पिण्डीकृत्य वशीकारपदार्थमाह—एवं तामुभयीमिति। वशीकारस्यावान्तरफलमाह।

तद्वशीकारादिति। तदेवं चित्तस्थितेरुपाया दर्शिताः। लब्धस्थितिकस्यवशीकारोपि दर्शितः। सम्प्रति लब्धस्थितिकस्य चेतसः किं विषयः किं रूपश्च सम्प्राप्तो भवतीति पृच्छति—अथेति। अनोत्तरं सूत्रमवतारयति तदुच्यत इति॥ ४० ॥

तत्तद्रूपोपरक्त उपाश्रयरूपाकारेण निर्भासते । तथा ग्राह्यालम्बनोपरक्तं चित्तं ग्राह्यसमापन्नं ग्राह्यस्वरूपाकारेण निर्भासते । तथा भूतसूक्ष्मोपरक्तं भूतसूक्ष्मसमापन्नं भूतसूक्ष्मस्वरूपाभासं भवति । तथा स्थूलालम्बनोपरक्तं स्थूलरूपसमापन्नं स्थूलरूपाभासं भवति । तथा विश्वभेदोपरक्तं विश्वभेदसमापन्नं विश्वरूपाभासं भवति । तथा ग्रहणेष्वपीन्द्रियेष्वपि द्रष्टव्यं । ग्रहणालम्बनोपरक्तं ग्रहणसमापन्नं ग्रहणस्वरूपाकारेण निर्भासते । तथा गृहीतृपुरुषालम्बनोपरक्तं गृहीतृपुरुषसमापन्नं गृहीतृपुरुषस्वरूपाकारेण निर्भासते । तथा मुक्तपुरुषालम्बनोपरक्तं मुक्तपुरुषसमापन्नं मुक्तपुरुषस्वरूपाकारेण निर्भासते । तदेवमभिजात-

सूत्रं पठति—क्षीणवृत्तेरित्यादि समापत्त्यादनम् । तद्व्याचष्टे क्षीणेति । अभ्यासवैराग्याभ्यांक्षीणराजसतामसप्रमाणादिवृत्तेश्चित्तस्य व्याख्यानं प्रत्यस्तमितप्रत्ययस्येति । तदनेन चित्तसत्वस्य स्वभावस्वच्छस्य रजस्तमोभ्यामनभिभव उक्तः दृष्टान्तं स्पष्टयति । यथेति । उपाश्रय उपाधिःजपाकुसुमादिः उपरक्तस्वच्छायापन्नः उपाश्रयस्य यदात्मीयं रूपं लोहितनीलादि तदेवाकारस्तेन लक्षितो निर्भासते । दार्ष्टान्तिके योजयति । तथाग्राह्येति । ग्राह्यश्च तदालम्बनश्च तेनोपरक्तं तदनुविद्धं तदनेन ग्रहीतृग्रहणाभ्यां व्यवच्छिनत्ति । आत्मीयमनः करणरूपमपिधाय ग्राह्यसमापन्नं ग्राह्यतामिव प्राप्तमिति यावत् अतोग्राह्यस्वरूपाकारेण निर्भासते ग्राह्योपरागमेव स्थूलसूक्ष्मताभ्यां विभजते । भूतसूक्ष्मेति विश्वभेदश्चेतनाचेतनसंघातो गवादि घंटादिश्च द्रष्टव्यः तदनेन वितर्क विचारानुगतौ समाधी दर्शितौ तथा ग्रहणेष्वपीन्द्रियेष्विति ग्रहणे एभिरर्था इति ग्रहणानीन्द्रियाणि एतदेव स्पष्टयति । ग्रहणालम्बनेति । ग्रहणञ्चालम्बनञ्च तदिति ग्रहणालम्बनं । तेनोपरक्तमनुविद्धमात्मीयमनःकरणरूपमपिधाय ग्रहणमिव बहिः करणमिवापन्नमिति । तदनेनानन्दानु-

मणिकल्पस्य चेतसो ग्रहीतृग्रहण-ग्राह्येषु पुरुषेन्द्रियभूतेषु या तत्स्थतदञ्जनता, तेषु स्थितस्य तदाकारापत्तिः सा समापत्तिरित्युच्यते ॥ ४२ ॥

तत्र शब्दार्थज्ञान विकल्पैः संकीर्णा सवितर्का समापत्तिः ॥ ४३ ॥

तद्यथा—गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञान मित्यविभागेन विभक्तानामपि ग्रहणं दृष्टं—विभज्यमाना

गतमुक्ताखिलतानुगतमाह तथा ग्रहीतृ पुरुषेति। अखिलास्यदं हि ग्रहीता पुरुषइति भावः। पुरुषत्वाविशेषादनेनैवमुक्तोपि पुरुषः शुक्लप्रह्लादादिः समाधिविषयतया संग्रहीतव्य इत्याह। तथासु क्तेति उपसंहरणतत्स्थ तदञ्जनता पदं व्याचष्टे। तदेवमिति। तेषु ग्रहीतृ ग्रहण ग्राह्येषु स्थितस्य धारितस्य ध्यानपरिपाकवशाद-पहतरजस्तमोमलस्य चित्तसत्वस्य या तदञ्जनता तदाकारता सा समापत्तिःसम्प्रज्ञात-लक्षणो योगउच्यते। तत्र च ग्रहीतृग्रहणग्राह्येष्विति सौत्रः पाठक्रमोर्थक्रम-विरोधान्नादर्त्तव्यः एवं भाष्येपि प्रथमं भूतसूक्ष्मोपन्यासोयनादरणीय इति सर्व्वं रमणीयम्।

सामान्यतः समापत्तिरुक्ता सैयमवान्तरभेदाच्चतुर्व्विधा भवति। तद्यथा सवितर्का निर्व्वितर्का सविचारा निर्व्विचारेति। तत्र सवितर्कायाः समापत्ते-र्लक्षणमाह। तत्रेत्यादि। तासु समापत्तिषु मध्ये सवितर्का समापत्तिः प्रतिप-त्तव्या कीदृशी शब्दस्य अर्थस्य ज्ञानस्य च तेषां विकल्पः वस्तुतो भिन्नानामपि शब्दादी-नामितरेतराध्यासात् विकल्पोर्थेकस्मिन् भेदमादर्शयति भिन्नेषु चाभेदं तेन शब्दार्थज्ञानविकल्पैः सङ्कीर्णा व्याप्तेत्यर्थः। तद्यथा गौरिति शब्द इति। गौरित्युपात्तयोः अर्थज्ञानयोः शब्दाभेदविकल्पितदग्नितगौरित्यर्थं इति गौरित्यु-

स्यान्ये शब्दधर्मा अन्येऽर्थधर्मा अन्येविज्ञानधर्मा इत्येतेषां विभक्ताः पन्थाः, तत्र समापन्नस्य योगिनोयोगवाद्यर्थः समाधिप्रज्ञायां समारूढः सचेत्यशब्दज्ञानविकल्पानुविद्ध उपावर्त्तते सा संकीर्णा समापत्तिः=सवितर्केत्युच्यते। यदा पुनः शब्दसङ्केतस्मृतिपरिशुद्धौ श्रुतानुमानज्ञानविकल्पशून्यायां समाधिप्रज्ञायां स्वरूपमात्रेणावस्थितोऽर्थस्तत्स्वरूपाकारमात्रतयैवावच्छिद्यते सा च निर्वितर्का समापत्तिः

पात्तयोः शब्दज्ञानयोरर्थाभेदविकल्पगौरितिज्ञानमिति गौरित्युपात्तयोः शब्दार्थयोर्ज्ञानाभेदविकल्पन्तदेव विनिर्भागेन विभक्तानामपि शब्दार्थज्ञानानां ग्रहणं लोके दृष्टं द्रष्टव्यम्। यद्यविभागेन ग्रहणं। कुतस्तर्हिविभाग इत्यत आह। विभाज्यमानान्वयव्यतिरेकाभ्यां परिच्छेदेन्ये शब्दधर्मा ध्वनिपरिणाममात्रस्य शब्दोदात्तादयो धर्माः अन्ये अर्थस्य जड़त्वमूर्त्तादयः अन्ये प्रकाशमूर्त्तिविरहादयो ज्ञानस्य धर्माः इति तस्मादेतेषां विभक्तःपन्थाः स्वरूपभेदोन्नयनमार्गः। तत्र विकल्पिते गवाद्यर्थे समापन्नस्येति तदनेन योगिनो परं प्रत्यक्षमुक्तं शेषं सुगमम्। सूत्रं योजयितुं प्रथमतस्सावन्निर्वितर्कां व्यावष्टे—यदापुनरिति। परिशुद्धिरपनयः शब्दसङ्केतः स्मरणम्। पूर्वं खल्वागमानुमाने प्रवर्त्तते। सङ्केतश्चायं गौरिति शब्दार्थज्ञानानामितरेतराध्यासात्मा ततश्चागमानुमानविकल्पौ भवतः। तेन तत्पूर्व्वा समाधिप्रज्ञा सवितर्का। यदा पुनरर्थमात्रप्रवणेन चेतसार्थमात्राहतेन तदभ्यासान्तरीयकतामुपगता सङ्केतस्मृतिस्त्यक्ता तत् त्यागे च श्रुतानुमानज्ञानविकल्पौ तत् मूलौ त्यक्तौ तदा तच्छून्यायां समाधिप्रज्ञायां स्वरूपमात्रेणावस्थितोऽर्थ तत् स्वरूपमात्रतयैव नतुविकल्पितेनाकारेण परिच्छिद्यते, सा निर्वितर्का समापत्तिरिति तदयोगिनां परं प्रत्यक्षम् असदारोपगन्धस्याप्यभावात्। स्यादेतत्—परेण प्रत्यक्षेणार्थतत्वं गृहीत्वा योगिन उपपादयन्ति उपदिशन्ति च कथं अतद्विषयाभ्यामागमपरार्थानुमानाभ्यां सोऽर्थ उपदिश्यते उपपाद्यते च तस्मादागमानुमाने तद्वि-

तत् परं प्रत्यक्षं, तच्च श्रुतानुमानयोर्बीजं ततः श्रुतानुमाने प्रभवतः। नच श्रुतानुमानज्ञानसहभूतं तद्दर्शनं तस्मादसङ्कीर्णं प्रमाणान्तरेण योगिनो निर्वितर्कसमाधिजं दर्शनमिति ॥४३॥ निर्वितर्कायाः समापत्तेरस्याः सूत्रेण लक्षणं द्योत्यते—

स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥ ४४ ॥

या शब्दसङ्केतश्रुतानुमानज्ञानविकल्पस्मृतिपरिशुद्धौ याह्यस्वरूपोपरक्ता प्रज्ञा स्वमिव प्रज्ञारूपं ग्रहणात्मकं

षये तेच विकल्पाविति परमपि प्रत्यक्षं विकल्प एवेत्यत आह—तच्च श्रुतेति। यदि हि सवितर्कमितिश्रुतानुमानसहभूतं तदनुषक्तं स्यात्भवेत् सङ्कीर्णं तयोस्तु बीजमेवेतत् ततोहि श्रुतानुमाने प्रभवतः। नच यद्यस्य कारणं तत्तद्विषयं भवति। न हि धूमज्ञानं वह्निज्ञानकारणमिति वह्निविषयं। तस्मादविकल्पेन प्रत्यक्षेण गृहित्वा विकल्पोपदिशति च उपसंहरति—तस्मादिति ॥ ४३ ॥

व्याख्येयसूत्रं योजयति निर्वितर्कायाइति।

स्मृतिपरिशुद्धावित्यादि सूत्रं। शब्दसङ्केतश्च श्रुतञ्चानुमानं च तेषां ज्ञानमेव विकल्पः तस्मात् स्मृतिः तस्याः परिशुद्धिरपगमः तस्यां। अत्र च सङ्केतस्मृतिपरिशुद्धिर्हेतुः श्रुतादिज्ञानस्मृतिपरिशुद्धिश्च हेतुमती अनुमानशब्दश्च कर्मसाधनोनुमेयवाचकः। स्वमिवेति। इवकारः भिन्नक्रमः। त्यक्त्वेति पदान्तरं। द्रष्टव्यविषयविप्रतिपत्तिं निराकरोति—तस्या एकेति। एकां बुद्धिमुपक्रमते आरभत इत्येकबुद्ध्युपक्रमं तदनेन परमाणवो नानात्मनो न वितर्कविषया इति उक्तं

त्यक्ता पदार्थमात्रस्वरूपा ग्राह्यस्वरूपापन्नेव भवति, सा निर्वितर्का समापत्तिः। तथाच व्याख्यातं। तस्या एकबुध्युपक्रमोह्यर्थात्मा अनुप्रचयविशेषात्मा गवादिर्घटादिर्वा लोकः सच संस्थानविशेषो भूतसूक्ष्माणां साधारणोधर्म्म आत्मभूतफलेन व्यक्तेनानुमितः स्वव्यञ्जकाञ्जनः प्रादुर्भवति। धर्म्मान्तरोदये च तिरोभवति— सएषधर्म्मो अवयवीत्युच्यते

भवति योग्यत्वेऽपि तेषां परमसूक्ष्माणां नानाभूतानां महत्त्वैकार्थसमवेतैकत्व निर्भासप्रत्ययविशेषत्वायोगात्। असुतर्हि परमार्थसत्सु परमाणुषु सा इत्तिः प्रतिभासधर्म्मः स्थौल्यादिमत्यत आह। अर्थात्मेति। नासति बाधके स्थूलत्वमनुभवसिद्धं शक्यापह्नवमिति भावः। तच्च ये पश्यन्ति द्व्यणुकादिक्रमेण गोघटादयस्तप जायन्ते इति तान् प्रत्याह। अणुप्रचयेति। अणूनां प्रचयः स्थूलरूपपरिणामः स च विशिष्यतेऽन्यस्मात् परिणामान्तरात् सएवात्मा स्वरूपं यस्य स तथोक्तःगवादिर्भोगायतनं घटादिर्विषयः तच्चैतदुभयमपि लोक्यते इति लोकः। नन्वेषभूतसूक्ष्मेभ्योभिन्नोऽभिन्नः वाद्यात् भिन्नश्चेत् कथं तदाश्रयः कथञ्चतदाकारः नहि घटः पटादन्यःतदाकारः तदाश्रयो वा—अभिन्नश्चेत् तदेव सूक्ष्मसाधारणञ्च स्यात् अत आह सचेति। अयमभिप्रायः नैकान्ततः परमाणुभ्योभिन्नघटादिरभिन्नो वा भिन्नत्वे गवाश्वदृश्यधर्म्मिभावानुपपत्तेः अभिन्नत्वे धर्म्मिरूपवत्तदनुपपत्तेः तस्मात् कथञ्चिद्भिन्नः कथञ्चिदभिन्नश्चास्येयं तथाच सर्व्वमुपपद्यते भूतसूक्ष्माणामिति षष्ठ्या कथञ्चिदेवं फलेन व्यक्तेन तदनुभवलक्षणेन तद्व्यवहारलक्षणेन च व्यक्तेन विप्रतिपन्नप्रत्यनुमापितकारणाभेदेन कारणाकारतोपपत्तेश्चात्। स्वव्यञ्जकाञ्जन इति। स किं तदाश्रयभूतो धर्म्मीनित्यो?—नेत्याह धर्म्मान्तरस्य कपालादेरुदय इति। तस्यावयविनः परमाणुभ्यो व्यावृत्तं रूपमादर्शयति सएष इति। परमाणुसाध्यायाः क्रियाया अन्यक्रियामधूदकादिधारणलक्षणा तद्धर्म्मक इति न केवलमनुभवात् अपि तु व्यवहारतोपि तन्निबन्धनत्वाल्लोकयात्राया इत्याह। तेनेति। अदेतात्

योऽसावेकश्च महांश्च अणीयांश्च सर्ववांश्च क्रियाधर्मकश्च अनित्यश्च तेनावयविना व्यवहाराः क्रियन्ते। यस्य पुनरवस्तुकः स प्रचयविशेषः सूक्ष्मश्च कारणमनुपलभ्यं तस्यावयव्यभावात् अतद्रूपप्रतिष्ठं मिथ्याज्ञानमिति प्रायेन सर्वमेवप्राप्तं मिथ्याज्ञानमिति। तदाच सम्यक् ज्ञानमपि किं स्यात् विषयाभावात्। यद्यदुपलभ्यते तत्त-

असति बाधके अनुभवो अवयविनं व्यवस्थापयेत्—अस्ति च बाधकं यत् सत्तत् धर्म्यनवयवं यथा विज्ञानं सङ्घीघटादीति स्वभावहेतुः सत्वं हि विरुद्धधर्मसंसर्ग रहितत्वेन व्याप्तं तद्विरुद्धस्य विरुद्धधर्मसंसर्गः सावयवे उपलभ्यमानो व्यापक विरुद्धोपलब्ध्या सत्वमपि निवर्त्तयति अस्तिचावयविनि तद्दृश्यत्वा तद्दृश्यत्वानावृतत्व रक्तारक्तत्वचलाचलत्वलक्षणो विरुद्धधर्मसंसर्ग इत्यत आह। यस्य पुनरिति। अयमभिप्रायः अनुभवसिद्धं सत्वं हेतुः क्रियते यत् किलपांसुलपादुकीहालिकीपि प्रतिपद्यते अन्यथा अनुभवसिद्धात् तत्वान्यदसिद्धत्वादहेतुः अनुभवसिद्धन्तु घटादीनां सत्वमर्थक्रियाकारित्वरूपं न स्थूलाद्यन्यं सीयं हेतुः स्थूलाद्यन्यं सीयं हेतुः स्थूलत्वं मपाकुर्वन्नात्मानमेवव्याहन्ति। ननु नस्थूलत्वमेव सत्वं अपिलसती व्यावृत्तिःअस्थौल्य व्यावृत्तिश्च स्थौल्यं व्यावर्त्त्यं भेदाच्च व्यावृत्तयो भिद्यन्ते अतः स्थौल्याभावेपि न सत्वव्याहतिः अन्यत्वाद्वतु व्यावर्त्त्यभेदादवसाय विषयभेदः यत् पूर्वकस्त्ववसाया त्मानुभवस्याविकल्पस्य प्रमाणस्य को विषय इति निरूपयतु भवान् रूप परमाणवो निरन्तरोत्पादा गृहीतपरमसूक्ष्मतला इति चेत् हन्तैते गन्धरसस्पर्शपरमाणु भिरन्तरितान् निरन्तरा: तस्मादन्तराणायद्वे एकघनवनप्रत्ययवत् परमाणुालम्बन: सन्नयं विकल्पो मिथ्येतितत्प्रभवा विकल्पानापरंपर्य्येणापि वस्तुप्रतिबद्धा इति कुतस्तदवसितस्य सत्वस्यानवयवत्वसाधकत्वं तस्मादविकल्पस्य प्रत्यक्षस्य प्रमाण्य मिच्छता तदनुभूयमानस्थौल्यस्यैव सत्वमविकल्पावसेयमकामयताप्यभ्युपेयम्। तथाच यत्तद्बाधमानं सत्वमात्मानमेवाप्रबाध्येत। परमसूक्ष्माः परमाणवो विजातीय परमाण्वनन्तरिता अनुभवविषया इति व्याहतमङ्गीकरणं तदिदमुक्तं यस्यपुनरवस्तुक

द्रव्यविशेषेनाघ्रातं तस्माद्द्रव्यवयवी योमहत्वादिव्यावहारा-पन्नः समापत्तेर्निर्वितर्काया विषयोभवति ॥ ४४ ॥

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥ ४५ ॥

तत्र भूतसूक्ष्मेष्वभिव्यक्तधर्मकेषु देशकालनिमित्तानु-भवावच्छिन्नेषु या समापत्तिः सा सविचारेत्युच्यते। तत्रा-प्येकवृद्धिनिर्ग्राह्यमेवोदितधर्मविशिष्टं भूतसूक्ष्ममालम्बनी-भूतं समाधिप्रज्ञायामुपतिष्ठते। या पुनः सर्व्वथा सर्व्वतः

सम्प्रत्ययविशेषो निर्विकल्पविषयः सन्तु तर्हि सूक्ष्माः परमाणवो निर्विकल्पविषया इत्यत आह। सूक्ष्मत्व कारणमनुपलभ्यमविकल्प्येति तस्यावयव्यभावाद्वितीरतद्रूप प्रतिष्ठं मिथ्याज्ञानमिति लक्षणेन सर्व्वमेव प्रातं मिथ्याज्ञानं यत् स्थौल्यालम्बनं यच्च तदधिष्ठानं सत्यालम्बनमित्यर्थः। नन्वेतावतापि न ज्ञानमात्मनि मिथ्या भवति तस्यावयवित्वेना प्रकाशादित्यत आह। प्रायेणेति ननु किमेतावतापीत्यत आह। तदाचेति। सत्यादिज्ञानं चेन्मिथ्यातदासत्यादिहेतुकमनवयवित्वादि ज्ञानमपि मिथ्यैव तस्यापि हि निर्विकल्पगोचरस्थूलमेवावसेयतया विषयः सचनास्तीति तात्पर्य्यार्थः। विषयाभाव एव कुत इत्यत आह। यदयदिति। विरोधश्च परिणामवैचित्र्येण भेदाभेदेन चोक्तोपपत्त्यनुसारेण उद्धर्तव्यः इति सर्व्वं रमणीयं। ४४ ॥

एतयैव सविचारानिर्विचाराचसूक्ष्मविषया व्याख्याता। अभिव्यक्तीघटादिधर्म्मो यैस्ते तथोक्ताः घटादिधर्म्मोपगृहीता इति यावत् देशउपर्य्यधः पार्श्वादिः कालोवर्त्तमानः निमित्तं पार्थिवस्य परमाणोर्गन्धतन्मात्रप्रधानेभ्यः पञ्चतन्मात्रेभ्यः उत्पत्तिः। एवमापस्यपरमाणोर्गन्धतन्मात्रवर्जितेभ्योरसतन्मात्रप्रधानेभ्यःचतुभ्यः। एवं तैजसस्य गन्धरसतन्मात्र रहितेभ्यो रूपतन्मात्रप्रधानेभ्य स्त्रिभ्यः एवं वायवीयस्य गन्धादितन्मा

शान्तोदिताव्यपदेश्यधर्म्मानवच्छिन्नेषु सर्व्वधर्म्मानुपातिषु सर्व्वधर्म्मात्मकेषु समापत्तिः सानिर्व्विचारेत्युच्यते एवं स्वरूपं हि तत् भूतसूक्ष्मं एतेनैव स्वरूपेणालम्बनीभूतमेव समाधि प्रज्ञास्वरूपमुपरञ्जयति प्रज्ञाच स्वरूपशून्येव अर्थमात्रा यदा भवति तदा निर्व्विचारेत्युच्यते। तत्र महद्वस्तुविषया सवितर्का निर्व्वितर्काच सूक्ष्मविषया सविचारा निर्व्वि चाराच। एवमुभयोरेतयैव निर्व्वितर्काया विकल्पहानिर्व्या-ख्यातेति ॥ ४५ ॥

यहीनाभ्यांस्यर्थं प्रधानाभ्यां स्यर्थशब्दतन्मात्राभ्यां। एवं लाभमस्य शब्दतन्मात्रादेवैकजा तदिदंनिमित्तं भूतसूक्ष्माणामेतेषां देशकालनिमित्तानु मनुभवः तेनावच्छिन्नेषु नानु भूतविशेषाविशेषेबुद्धिरुपजायत इत्यर्थः। ननु सवितर्कया सह किं सारूप्यं सवि-चारायां इत्यत आह। तत्रापीति। पार्थिवोहि परमाणुः पञ्चतन्मात्र प्रचयात्मा एक बुद्धि निर्ग्राह्यः एवमाप्यादयोपि चतुस्त्रिद्वेक तन्मात्रात्मान एकबुद्धिनिर्ग्राह्या वेदितव्याः तदितीवर्त्तमानो धर्म्मस्तेनविशिष्टं एतावता चाचसङ्केतस्मृत्यागमानुमान विकल्पानुवेधः सूचितः नहि प्रत्यक्षेण स्थूले दृश्यमाने परमाणवः प्रकाशन्ते अपित्वा-गमानुमानाभ्यां तस्मादुपपन्नमस्याः सङ्कीर्णत्वमिति। निर्व्विचारामाह। या पुन-रिति। सर्व्वथा सर्व्वेण नीलपीतादिना प्रकारेण। सर्व्वत इति सार्व्वविभक्तिक स्तसि सर्व्वैर्देशकालनिमित्तानुभवैरित्यर्थः तदनेन स्वरूपेण कालानवच्छिद परमा-णूनामिति दर्शितं नापि तदारब्धधर्म्मद्वारेण इत्याह। शान्ता अतीता यदिता वर्त्तमाना अव्यपदेश्या भविष्यन्तो धर्म्मास्तैरनवच्छिन्नेषु अनवच्छिन्ना धर्म्मैः परमाणवः किमसं वद्धा एव तैरित्यतआह। *सर्व्वधर्म्मानुपातिषिति कतमेन सम्बन्धेन धर्म्मा-नुपतन्ति परमाणव इत्यत आह। सर्व्वधर्म्मात्मकेषु कथञ्चिद्भेदः कथञ्चिदभेदः धर्म्माणां परमाणुभ्य इत्यर्थः कस्मात् पुनरियं समापत्तिरेतद्विषयेत्यत आह। एवं स्वरूपं

सूक्ष्मविषयत्वं चालिङ्गपर्य्यवसानम्॥ ४६॥

पार्थिवस्याणो गन्धतन्मात्रं सूक्ष्मोविषयः आप्यस्य रसतन्मात्रं तैजसस्य रूपतन्मात्रं वायवीयस्य स्पर्शतन्मात्रं आकाशस्य शब्दतन्मात्रमिति तेषामहङ्कारः अस्यापि लिङ्गतन्मात्रं सूक्ष्मोविषयः लिङ्गमात्रस्याप्यलिङ्गं सूक्ष्मो विषयः न चालिङ्गात् परं सूक्ष्ममस्ति नन्वस्ति पुरुषः सूक्ष्म इति। सत्यं यथा लिङ्गात् परमलिङ्गस्य सौक्ष्म्यं नचैवं पुरुषस्य किन्तु लिङ्गस्यान्वयिकारणं पुरुषो न भवति हेतुस्तु भवतीति अतः प्रधाने सौक्ष्म्यं निरतिशयं व्याख्यातम्॥ ४६॥

होति वस्तुतत्व ग्राहिणीनातत्वं प्रवर्त्तत इत्यर्थः। विषयमभिधायाऽस्याः स्वरूपमाह। प्रज्ञाचेति सङ्गत्य स्वरूपभेदोपयोगि विषयमाह तत्रेति। उपसंहरति तस्मिन्निति। उभयीरात्मनश्चेति॥ ४५॥

किञ्चूतसूक्ष्मएवयाह्यविषया समापत्तिः समाप्यते न किन्तु सूक्ष्मविषयत्वञ्चालिङ्गपर्य्यवसानं। पार्थिवस्य परमाणोः सम्बन्धिनी या गन्धतन्मात्रा सा समापत्तेः सूक्ष्मोविषयः एवमुत्तरत्रापि योज्यं लिङ्गमात्रं महत्तत्वं तद्धि लयं गच्छति प्रधानइति अलिङ्गं प्रधानं तदि न कश्चिल्लयं गच्छतीत्यर्थः। अलिङ्ग पर्य्यवसानत्वमाह। नचालिङ्गात् परमिति। चोदयति ननु पुरुषोपि सूक्ष्मो नालिङ्गमेवेत्यर्थः। परिहरति सत्यमिति उपादानतया सौक्ष्म्यमलिङ्गमेव नान्यत्रेत्यर्थः तत्र पुरुषार्थनिमित्तत्वान् महदहङ्कारादेः पुरुषोपि कारणलिङ्गत्वदिति कृत एवं लक्षणमलिङ्गस्यैव सौक्ष्म्यमित्याशयवान् पृच्छति किन्विति। उत्तरमाह लिङ्गस्येति सत्यं कारणं ननूपादानं यथाहि प्रधानं महदादिभावेन परिणमते न तथा पुरुषः तद्धेतुरपीत्यर्थः उपसंहरति। अतः प्रधानं एव सौक्ष्म्यं निरतिशयं व्याख्यातं॥४६॥

ता एव सबीजः समाधिः ॥ ४७॥
निर्विचारवैशारद्येऽध्यात्मप्रसादः ॥ ४८ ॥

तास्चतस्रः समापत्तयो बहिर्व्वस्तुबीज इति समाधिरपि सबीजः तत्र स्थूलेऽर्थे सवितर्को निर्व्वितर्कः सूक्ष्मेऽर्थे सविचारो निर्व्विचार इति चतुर्द्वोपसङ्ख्यातः समाधिरिति ॥ ४७ ॥

अशुद्धावरणमलापेतस्य प्रकाशात्मनो बुद्धिसत्वस्य रजस्तमोभ्यामनभिभूतः स्वच्छः स्थितिप्रवाहो वैशारद्यं यदा निर्व्विचारस्य समाधेर्वैशारद्यमिदं जायते तदा योगिनोभवति अध्यात्मप्रसादः भूतार्थविषयः क्रमाननुरोधी स्फुटप्रज्ञालोकः। तथाचोक्तं—"प्रज्ञाप्रासादमारुह्य अशोच्यः शोचतोजनान्। भूमिष्ठानिव शैलस्थः सर्व्वान् प्राज्ञोनुपश्यति ॥ ४८ ॥

चतस्रूणामपि समापत्तीनां ग्राह्यविषयाणां सम्प्रज्ञातत्वमाह ताएव सबीजः समाधिः एवकारोभिन्नक्रमः सबीजे इत्यस्यानन्तरं द्रष्टव्यः ततश्चतस्रः समापत्तयो ग्राह्यविषया सबीजतया नियम्यन्ते सबीजताच्च नियता ग्रहीतृग्रहणगोचरायामपि समापत्तौ विकल्पाविकल्पभेदेनानिर्दिष्टा व्यवतिष्ठते तेन ग्राह्ये चतस्रः समापत्तयो ग्रहीतृग्रहणयोश्च चतस्रः इत्यष्टौ ते भवन्ति इति निगद व्याख्यातं भाष्यं चतसृषु समापत्तिषु ग्राह्यविषयासु निर्व्विचारायाः शोभनत्वमाह ॥ ४७ ॥

निर्व्विचारवैशारद्येऽध्यात्मप्रसादः। वैशारद्यपदार्थमाह। अशुद्धीति रजस्तमसोरुपचयो मूढिः सैवावरणत्ववणीमलत्वात्तदपेतस्य प्रकाशात्मनः प्रकाशस्वभावस्य बुद्धिएतस्य अतएवानभिभूत इति। स्यादेतत् ग्राह्यविषया चेत् समापत्तिः कथमात्म

ऋतम्भरा तत्र प्रज्ञा ॥ ४८ ॥

तस्मिन् समाहितचित्तस्य या प्रज्ञा जायते तस्या ऋतम्भरेति संज्ञा भवति अन्वर्था च सा सत्यमेव बिभर्त्ति न तत्र विपर्य्यासज्ञानगन्धोप्यस्तीति। तथाचोक्तम्—"आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति" ॥ ४८ ॥

सा पुनः—

श्रुतानुमानप्रज्ञाभ्यामन्यविषयाविशेषार्थत्वात् ॥ ५० ॥

श्रुतमागमविज्ञानं तत् सामान्यविषयं न ह्यागमेन शक्योविशेषोभिधातुं कस्मात् नहिविशेषेण कृतसङ्केतः शब्द

विषयप्रसादं इत्यत आह। भूतार्थविषय इति नात्मविषयः किन्तु तदाधार इत्यर्थः क्रमानुरोधी युगपदित्यर्थः। अत्रैव पारमर्षीं गाथामुदाहरति। तथा चेति। ज्ञानालोकप्रकर्षेणात्मानं सर्व्वेषामुपरि पश्यन् दुःखक्षयपरीतान् शोचतोऽजनान् जानाति ॥ ४८ ॥

अथैव योगिजनप्रसिद्धान्वर्थसंज्ञाकथनेन योगिसंमतिमाह। ऋतम्भरा तत्र प्रज्ञा। सुगमं भाष्यं। आगमेनेति। वेदविहितं श्रवणमुक्तं। अनुमानेनेति मननं ध्यानं चिन्ता तयोरभ्यासः पौनःपुन्येनानुष्ठानं तस्मिन् रस आदरः तदनेन निदिध्यासनमुक्तं ॥ ४९ ॥

स्यादेतत् आगमानुमान गृहीतार्थं विषय भावना प्रकर्षं लभ्यजन्मा

इति। तथानुमानं सामान्यविषयमेव यत्र प्राप्तिस्तत्र गतिः यत्राप्राप्तिस्तत्र न भवति गतिरित्युक्तम् अनुमानेन च सामान्येनोपसंहारः तस्मात् श्रुतानुमानविषयो न विशेषः कश्चिदस्तीति न चास्य सूक्ष्मव्यवहितविप्रकृष्टस्य वस्तुनोलोकप्रत्यक्षेण ग्रहणं। न चास्य विशेषस्याप्रमाणकस्याभावोस्तीति समाधिप्रज्ञानिर्ग्राह्यएव सविशेषो

निर्व्विचारा आगमानुमान विषयमेव गोचरयेत् नखल्वन्यविषयानु भव जन्मा संस्कारः शक्नोत्यन्य ज्ञान जनयितुं अतिप्रसङ्गात् तस्मान्निर्व्विचारावेद्यत भरा आगमानुमानयोरपि तत् प्रसङ्ग इत्यत आह। श्रुतानुमानेत्यादि। बुद्धि सत्वं हि प्रकाश स्वभावं सर्व्वार्थदर्शनसमर्थमपि तमसावृतं यदैव रजसोद्घाट्यते तदैव गृह्णाति यदात्वभ्यासवैराग्याभ्यामपास्तरजस्तमो मल मनवद्य वैशारद्यमुद्भवति तदास्यातिपतित समस्त मानमेयसीमः प्रकाशानन्त्ये सति किं नाम यन्नगोचर इति भावः। व्याचष्टे श्रुतमागमज्ञान तत्सामान्यविषयं कस्मात् नह्यागमेन शक्योविशेषोभिधातुं कुतः यस्मादानन्त्याद्व्यभिचाराच्च न विशेषेण कृतसङ्केतः शब्दः यस्मादस्य विशेषेण सह वाच्यवाचक सम्बन्धः प्रतीयेत नचवाक्यार्थोपीदृशी विशेषः सम्भवति। अनुमानेपि लिङ्गलिङ्गि सम्बन्ध ग्रहणाधीन जन्मनि गतिरेषैवेत्याह तथानुमानमिति। यत्राप्राप्तिरित्यत्र यत्रतत्र शब्दयोः स्थान परिवर्त्तनेन व्याप्य-व्यापकभावो गमयितव्यः अतोऽत्रानुमानेन सामान्येनोप संहारः। उपसंहरति तस्मादिति। अस्तुतर्हि सम्बन्धग्रहणपेक्षं लोकप्रत्यक्षं न तत् सामान्य विषय मित्यत आह। नचास्येत्यादि माभूत् सम्बन्धग्रहाधीनं लोकप्रत्यक्षमिन्द्रियाधीनन्तु स्यात् नचेन्द्रियाणामसन्निकृष्टे योग्यतेत्यर्थः ननु च यदागमानुमान प्रत्यक्ष गोचरः विशेषः तर्हि नास्ति प्रमाण विरहादित्यत आह नचेति। नहि प्रमाणं व्यापकं कारणं वा प्रमेयस्यैव तन्निवृत्तौ निवर्त्तेत। नोखलु कलावतश्चन्द्रस्य परभाग-वर्त्ति हरिण सद्भावं प्रति नसन्दिह्यते प्रामाणिका इत्यर्थः इति तस्मात् समाधि प्रज्ञानिर्ग्राह्य एवेति। अत्र च विवादाध्यासिताः परमाणवः आत्मानश्च प्रतिक्षिप्त

भवति। भूतसूक्ष्मागतो वा पुरुषगतोवा तस्मात् श्रुतानुमानप्रज्ञाभ्यामन्यविषया सा प्रज्ञा विशेषार्थत्वादिति।

समाधिप्रज्ञाप्रतिलम्भे योगिनः प्रज्ञाकृतः संस्कारो नवो नवोजायते ॥ ५० ॥

समाधिप्रज्ञाभवः संस्कारोव्युत्थानसंस्काराशयं बाधते व्युत्थानसंस्काराभिभवात् तत्प्रभवाः प्रत्यया न भवन्ति।

तज्जः संस्कारोऽन्यसंस्कारः प्रतिबन्धी ॥५१॥

प्रत्ययनिरोधे समाधिरुपतिष्ठते। ततः समाधिजा प्रज्ञा ततः प्रज्ञाकृताः संस्कारा इति नवीनवः संस्कारा-

विशेषशालिनः द्रव्यत्वेसति परस्परं व्यावर्त्तमानत्वात् ये द्रव्यत्वसति परस्परं व्यावर्त्तन्ते ते प्रातिस्विकविशेषशालिनः यथा खण्डमण्डादय इत्यनुमानेनागमेच ऋतंभरप्रज्ञोपदेशपरेच यद्यपि विशेषो निरूप्यते तदनिरूपणे संशयः स्यात् न्याय-प्राप्तत्वात् तथाप्यदूरविप्रकर्षेण तत्त्वं क्रमशिक्षोचरयतः श्रुतानुमानेन तु साचा-त्सार्थमिव समुच्चयादि पदानि खिङ्ग संख्यायोगितया तस्मात् सिद्धं श्रुतानुमान प्रज्ञाभ्यामन्यविषयेति स्यादेतत् भवतु परमार्थे विषयः सन्प्रज्ञाती यथोक्तोपाया-भ्यासात् भवादिनातु व्युत्थान संस्कारेण निगूढ़ निविड़तया प्रतिबन्धनीया ॥५०॥

समाधिप्रज्ञाँसा बाह्यावर्त्तमध्यवर्त्ति प्रदीप परमाणुरिवेति शङ्कामपनेतुं सूत्रमव-तारयति समाधि प्रज्ञेति सूत्रं पठति। तज्जःसंस्कारोऽन्यसंस्कारप्रतिबन्धी। तदिति निर्विचारा समापत्तिं परामृशति अन्येति। व्युत्थानमाह। भूतार्थ पक्षपातो हि धियां स्वभावः तावदेवेयं भवस्थिताभास्यति न यावत् तत्त्वं प्रतिलभते तत् प्रति-लब्धे तत्स्थितपदा सती संस्कारबुद्धिः संस्कारबुद्धिचक्रक्रमेणावर्त्तमानानादिमप्य-तत्त्वसंस्कारबुद्धिक्रमं बाधत एवेति तथाच वाह्या आहुः—निरुपद्रवभूतार्थ स्वभा-

श्रयो जायते ततः प्रज्ञा ततश्च संस्कारा इति। कथमस्य संस्कारातिशयश्चित्तं साधिकारं न करिष्यतीति न ते प्रज्ञाकृताः संस्काराः क्लेशक्षयहेतुत्वात् चित्तमधिकारविशिष्टं कुर्व्वन्ति चित्तं हि ते स्वकार्य्यादवसादयन्ति। ख्यातिपर्य्यवसानं हि चित्तचेष्टितमिति ॥ ५१ ॥

किञ्चास्य भवति?—

तस्यापि निरोधे सर्व्वनिरोधान्निर्बीजः समाधिः॥५२

स न केवलं समाधिप्रज्ञाविरोधी प्रज्ञाकृतानां

संस्कारविपर्य्ययैः। न बाधीत्यादिसत्वेपि बुद्धितत्पचपाततइति॥ स्यादेतत् समाधिप्रज्ञातोऽनुव्युत्थानजन्यः संस्कारस्य निरोधः समाधिजस्तु संस्कारातिशयः समाधि प्रज्ञा प्रसवे हेतुरस्यऽविकल इति तदवस्थं एव चित्तस्य साधिकारतेति। चोदयति कथमसाविति। परिहरति तत इति। चित्तस्य हि कार्य्यद्वयं शब्दाद्युपभोगः विवेकख्यातिश्चेति तत्रक्लेशकर्म्माशय सहितं शब्दाद्युपभोगे वर्त्तते प्रज्ञाप्रभव संस्कारोन्मूलित निखिल क्लेशकर्म्माशयस्य तु चेतसोवसित प्रायाधिकार भावस्य विवेकख्यातिमात्रमवशिष्यते कार्य्यं तस्मात् समाधिसंस्काराक्षिप्तस्य न भोगाधिकारहेतवः प्रत्युत तत् परिपन्थिन इति स्वकार्य्याङ्गीगलत्वणादवसादयन्ति असमर्थं कुर्व्वन्ति इत्यर्थः। कस्मात् ख्याति पर्य्यवसानं हि चित्त चेष्टितं। तावद्धि भोगाय चित्तं चेष्टते यावद्विवेकख्यातिमनुभवति सम्प्रतिविवेकख्यातिमस्य क्लेश निहत्तौ न भोगाधिकार इत्यर्थः। तदेव भोगाधिकार प्रशान्तिः प्रयोजनं प्रज्ञा संस्काराक्षिप्तमित्युक्तं पृच्छतिकिञ्चेति ॥ ५१ ॥

• किञ्चास्य भवति प्रज्ञासंस्कार वञ्चितं प्रज्ञा संस्कार प्रवाहजनकतया तथैव साधिकार मित्यधिकारापनुत्तये ऽस्यदपि किञ्चिदपेक्षणीयमस्तीत्यर्थः। चोदयतस्माह।

संस्काराणामपि प्रतिबन्धी भवति। कस्मान्निरोधजः संस्कारः समाधिजान् संस्कारान् बाधत इति निरोधस्थिति कालक्रमानुभवेन निरोधचित्तकृतसंस्कारास्तित्वमनुमेयम्। व्युत्थाननिरोधसमाधिप्रभवैः सहः कैवल्यभागीयैः संस्कारैश्चित्तं स्वस्यां प्रकृतावस्थितायां प्रविलीयते तस्मात्ते संस्काराश्चित्तस्याधिकारविरोधिनो न स्थितिहेतवो भवन्तीति यस्मादवसिताधिकारं सह कैवल्यभागीयैः संस्कारैश्चित्तं

तस्यापि निरोधे सर्व्वनिरोधात्निर्बीजः समाधिः। परेण वैराग्येण ज्ञानप्रसादमात्र लक्षणेन संस्कारोपजननद्वारा तस्यापि प्रज्ञाकृतस्य संस्कारस्य निरोधे न केवलं प्रज्ञाया इत्यपि शब्दार्थः सर्व्वस्योत्पाद्यमानस्य संस्कार प्रज्ञा प्रवाहस्य निरोधात् कारणाभावेन कार्य्यानुत्पादनात् सोऽयं निर्बीजः समाधिः। व्याचष्टे सनिर्व्वीजः समाधिः समाधिप्रज्ञातिरोधिनः परस्मात् वैराग्यात् उपजायमान स्वकारणद्वारेण न केवलं समाधिप्रज्ञाविरोधी प्रज्ञाकृतानामप्यसौ संस्काराणां परिपन्थी भवति। ननु वैराग्यजं विज्ञानं सद्विज्ञानं प्रज्ञामात्रं बाधतां संस्कारन्त्वविज्ञानं कथं बाधते दृष्टाहि स्वप्न दृष्टार्थैस्मृतिरित्याशयवान् पृच्छति। कस्मादिति उत्तरं निरोधज इति निरुध्यतेऽनेन प्रज्ञेति निरोधः परं वैराग्यं ततोजातो निरोधजः संस्कारःसंस्कारादेव दीर्घकाल नैरन्तर्य सत्कारासेवित परवैराग्यजन्मनः प्रज्ञासंस्कारबाधो ननु विज्ञानादित्यर्थःस्यादेतन्निरोधज संस्कार सद्भावे किं प्रमाणं सहि प्रत्यक्षेण वानुमानेन वा स्मृत्वा कार्य्येणानुमीयेत नच सर्व्वहृत्ति निरोधे प्रत्यक्षमस्ति योगिनः नापिस्मृति तस्य वृत्ति मात्र निरोधतया स्मृतिजनकत्वा सम्भवादित्यत आह। निरोधेति। निरोधेस्थितिः चित्तस्य निरुद्धावस्थेत्यर्थः। तस्याः कालक्रमोमुहूर्त्ताद्यायामयामाहोरात्रादिस्वदनुभवेन एतदुक्तं भवति वैराग्याभ्यासप्रकर्षानुरोधी निरोधप्रकर्षोमुहूर्त्ताद्यायामादिव्यापितयानुभूयते योगिना नच वैराग्यक्षणाक्रम नियततया परस्परमसम्भवन्त सन्तत् काल व्यापितया सातिशयं

विनिवर्त्तते तस्मिन्निवृत्ते पुरुषः स्वरूपप्रतिष्ठः अतः शुद्धो-मुक्त इत्युच्यते ॥ ५२ ॥

इति पातञ्जले साङ्ख्यप्रवचने योगशास्त्रे
समाधिपादः प्रथमः समाप्तः।

निरोधं कर्त्तुमीश्वर इति तत्तद्वैराग्यवश प्रचयजन्यः स्थायी संस्कारप्रचयत् षितस्य इति भावः। ननु क्रियतां प्रज्ञासंस्कारात्तु निरोध संस्कारात्तु कुतः समुद्भि यत्ते अनुच्छिदे वा साधिकारत्वमेव इत्यत आह।

व्युत्थानेति। व्युत्थानश्च तस्य निरोधसमाधिश्च सम्प्रज्ञातः तत्प्रभवाः संस्काराः कैवल्यभागी या निरोधजाः संस्कारा इत्यर्थः। व्युत्थानप्रज्ञासंस्काराश्चित्ते प्रलीना इति भवति चित्तं व्युत्थानप्रज्ञासंस्कारवत् निरोध संस्कारस्तु प्रत्युदित एवास्ते चित्ते। निरोधसंस्कारे सत्यपि चित्तमनधिकारवत् पुरुषार्थजनकं हि चित्तं साधिकारं शब्दाद्युपभोग विवेक ख्याती च पुरुषार्थौ संस्कारशेषतायां तु न द्वौ प्रतिसंवेदी पुरुष इति नासौ पुरुषार्थः विदेहप्रकृतिलयानां न निरोधभागितया साधिकारं चित्तं अपितु क्लेशवासिततयेत्याशयवानाह यस्मादिति। शेषं सुगमं ॥५२॥

योगस्योद्देशनिर्देशौ तदर्थं वृत्तिलक्षणं।
योगोपायाः प्रभेदाश्च पादेऽस्मिन्नुपवर्णिताः। ॥ १ ॥

श्रीवाचस्पतिमिश्रविरचितायां पातञ्जलभाष्यव्याख्यायां प्रथमः
समाधिपादः समाप्तः ॥

—०—

साधनपादः ।

तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥ १॥

उद्दिष्टः समाहितचित्तस्य योगः कथं व्युत्थितचित्तोपि योगयुक्तः स्यादित्येतदारभ्यते । नातपस्विनोयोगः सिद्ध्यति अनादिकर्मक्लेशवासना चित्रा प्रत्युपस्थितविषयजाला चाशुद्धिः नान्तरेण तपःसम्भेदमापद्यते इति तपस-

नंतु प्रसुमपादेनैव सोपायः सावान्तरप्रभेदः सफलोयोग उक्तस्तत किमपरमवशिष्यते यदर्थं द्वितीयः पादः प्रारभ्यतेत्यत आह । उद्दिष्ट इति । अभ्यास वैराग्यौ हि योगोपायौ प्रथमे पादे उक्तौ न च तौ व्युत्थितस्य द्वागित्थं व सम्भवत इति द्वितीयपादोपाद ध्यानुपायाना पचते सत्व शुद्ध्यर्थं ततो हि विशुद्धसत्वः कृतरत्वा सन्निधानोभ्यासवैराग्ये प्रत्यहं भावयति । समाहितत्वमविच्छिन्नत्वं कथं व्युत्थानचित्तोप्युपदिश्यमाणे क्रियायोगे युक्तः सन् योगीस्यादित्यर्थः.तच्च वक्ष्यमाणेषु नियमेषु आकृष्य प्रायशिकं प्रत्युपयुक्ततरतया प्रथमतः क्रियायोगमुपदिशति सूत्रकारः ॥ तपः स्वाध्यायेत्यादि । क्रियैव योगः क्रियायोगी योगसाधनात्वात् ॥ अतएव विष्णुपुराणे खाण्डिक्य केशिध्वज सम्वादे । योगयुक् प्रथमं योगी युञ्जानोभिधीयत इत्युपक्रम्य तपः स्वाध्यायादयी दर्शिताः । व्यतिरेक मुखेन तपस उपायत्वमाह । नातपस्विन इति तपसीवान्तरव्यापारमुपायतोपयोगिनां दर्शयति । अनादीति । अनादिभ्यां कर्मक्लेशवासनाभ्यां चित्रा अतएव प्रत्युपस्थित मुपनतं विषय यस्यां सा तथोक्ता । अशुद्धीरजस्तमःसयुद्रेकी नान्तरेण तपःसम्भेदमापद्यते सांद्रस्य नितान्त विरलता सम्भेदः ननूपादीयमानमपि तपोधातु वैषम्य हेतुतया

उपादानं तच्चित्तप्रसादनमबाधमानमनेनासेव्यमिति मन्यते स्वाध्यायः प्रणवादिपवित्राणां जपोमोक्षशास्त्राध्ययनं वा । ईश्वरप्रणिधानं सर्वक्रियाणां परमगुरावर्पणं तत् फलसन्न्यासोवा ॥ १ ॥

स हि क्रियायोगः—

समाधिभावनार्थः क्लेशतनूकरणार्थश्च ॥ २ ॥

स हि आसेव्यमानः समाधिं भावयति क्लेशांश्च प्रतनूकरोति प्रतनूकृतान् क्लेशान् प्रसंख्यानाग्निना दग्धबीजकल्पानप्रसवधर्मिणः करिष्यतीति तेषां तनूकरणात् पुनः क्लेशैरपरामृष्टसत्वपुरुषान्यतामात्रख्यातिः सूक्ष्मा प्रज्ञा समाप्तधिकारा प्रतिप्रसवाय कल्पिष्यते इति ॥ २ ॥

त्रोगप्रतिपच्च इति कथं तदुपाय इति । अत आह । तच्चेति तावन्मात्रमेव तपश्चरणीयं न यावता धातुवैषम्यमापद्यत इत्यर्थः ।

प्रणवादयः पुरुषसूक्त रुद्रमन्यल ब्राह्मणादयो वैदिकाः पौराणिकाश्च ब्रह्मपारादयः परमगुरुर्भगवानीश्वरस्तस्मिन्नावेदयितृत्वं । कामतोकामतोवापि यत् करोमि शुभाशुभं तत्सर्वं त्वयि सन्न्यस्तं त्वत्प्युक्तः करोम्यहं । इति तत्फलसन्न्यासोवा फलानभिसन्धानेन कार्यकरणं यच्चेदमुक्तं कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते सङ्गोस्त्वकर्मणि ॥ १ ॥

तस्य प्रयोजनाभिधानाय सूत्रमवतारयति स हि इति सूत्रं । समाधिभावनार्थः क्लेशतनूकरणार्थश्च । ननु क्रियायोग एव चेत् क्लेशान् प्रतनूकरोति कृतं तर्हि प्रसङ्ख्यानेनेत्यत आह । प्रतनूकृतानिति क्रियायोगस्य प्रतनूकरणमात्रे व्यापारो न तु बन्धत्वे क्लेशानां प्रसक्ता नश्यतु तद्बन्धत्वे दग्धबीजकल्पानिति बन्धत्वेन

अथ के क्लेशाः कियन्तोवेति—

अविद्याऽस्मितारागद्वेषाऽभिनिवेशाःपञ्चक्लेशाः॥३

इति पञ्चविपर्ययया इत्यर्थः । ते स्यन्दमानागुणाधिकारं दृढ़यन्ति परिणाममवस्थापयन्ति कार्य्यकारणस्रोतउन्नमयन्ति परस्परानुग्रहतन्त्रीभूत्वा कर्म्मविपाकं चाभिनिर्हरन्ति इति ॥ ३ ॥

दग्धकल्पबीज सारूप्यमुक्तं स्यादेतत्सङ्ख्या न मेव चेत् क्लेशान् अप्रसवधर्मिणः करिष्यति कृतमेषां प्रतनूकरणेनेत्यत आह । तेषामिति । क्लेशानाम तानवेहि बलवद्विरोधिगृद्धा सत्पुरुषान्यता ख्यातेरुदेतु मेव योत्सहते प्रागेव तदभावं कर्तुं प्रविलीकृतेषु तु क्लेशेषु दुर्बलेषु तद्विरोधिन्यपि वैराग्याभ्यासाभ्यामुपजायते उपजाता च तैरपराम्रष्टा अनभिभूतानेव यावत् पराम्रश्यते सत्पुरुषान्यतामाचख्याति सूक्ष्माप्रज्ञातन्द्रियता सूक्ष्मोसाविषय इति सूक्ष्मा प्रज्ञा प्रतिप्रसवाय प्रविलयाय कल्पिष्यते कृतः समाप्ताधिकारा कार्यारम्भं गुणानां यया हेतुभूतया सा तथोक्तिं ॥ २ ॥

पृच्छति ॥ अथेति अविद्येति सूत्रेण परिहारः । अविद्याः क्लेशाः व्याचष्टे । पञ्चविपर्ययया इति । अविद्या तावद्विपर्यय एव अस्मितादयोप्यविद्योपादानस्तद्विनिर्भागवर्त्तिन इति विपर्ययया: ततश्चाविद्या समुच्छेदे तेषामपि समुच्छेदोयुक्त इतिभावः तेषामुच्छेदे तथतांहेतुं संसारकारणत्वमाह ते स्यन्दमानाः समुदाचरन्तो गुणानामधिकारं दृढ़यन्ति बलवन्तं कुर्व्वन्ति अतएवपरिणाममवस्थापयन्ति अव्यक्त महदहङ्कार परम्परया हि कार्य्यकारण स्रोत उन्नमयन्ति उद्भावयन्ति यदर्थं सर्व्वमेतत् कुर्व्वन्ति तद्दर्शयति । परस्परेति कर्म्मणां विपाको जात्यायुर्भोगलक्षणः पुरुषार्थ तममीक्लेशा अभिनिर्हरन्ति निष्पादयन्ति किं प्रत्येकं नेत्याह परस्परानुग्रहेति कर्म्मभिः क्लेशाःक्लेशैश्चकर्म्माणीति ॥ ३ ॥

अविद्यात्वेवमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ॥ ४ ॥

अत्राऽविद्यात्वेवं प्रसवभूमिरुत्तरेषामस्मितादीनां चतुर्विधक्लेशितानां प्रसुप्ततनुविच्छिन्नोदाराणां । तत्र का प्रसुप्तिः चेतसि शक्तिमात्रप्रतिष्ठानां बीजभावोपगमः तस्य प्रबोध आलम्बने संमुखीभावः प्रसंख्यानवतो दग्धक्लेशबीजस्य संमुखीभूतेष्वालम्बनेनाऽसौ पुनरस्ति दग्धबीजस्य कुतः प्ररोह इति । अतः क्षीणक्लेशः कुशलश्चरमदेह इत्युच्यते तत्रैव सा दग्धबीजभावा पञ्चमी क्लेशावस्था नान्यत्रेति सतां क्लेशानां तदा बीजसामर्थ्यं दग्धमिति विषयस्य संमुखीभावेपि सति न भवत्येषां प्रबोध इत्युक्ता प्रसुप्तिर्दग्धबीजानां अप्ररोहश्च । तनुत्वमुच्यते प्रतिपक्षभावनोपहताः क्लेशास्त-

ईयानां क्लेशानामविद्यामूलत्वं दर्शयति अविद्यात्वेवमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणां तत्र का प्रसुप्तिरिति स्वोचितामर्थक्रियां अकुर्वतां क्लेशानां सद्भावेन प्रमाणमसौत्यभिप्रायः । पृच्छतः उत्तरं चेतसीति सा नामार्थक्रियां कार्षुः क्लेशाः विदेहप्रकृतिलयानां बीजभावं प्राप्तास्तु ते शक्तिमात्रेण सन्ति चौर इव दधिनाऽविवेकख्यातेरन्यदस्ति कारणं तदभ्यासतायां अतीविदेह प्रकृतिलयाविवेकख्याति विरहिणः प्रसुप्तक्लेशा न यावदधिकालं प्राप्नुवन्ति ततः प्राप्तौ तु पुनराहताः सन्तः क्लेशस्तेषुतेषु विषयेषु संमुखीभवन्ति । शक्तिमात्रेण प्रतिष्ठा येषां ते तथोक्ताः तदनेनोत्पत्तिशक्तिरुक्ता बीजभावोपगम इति च कार्यशक्तिरिति । ननु विवेकख्यातिमतोपि क्लेशाः कस्मान्न प्रसुप्ता इत्यत आह प्रसंख्यानवत इति । चरमदेहो न तस्य देहान्तरमुत्पत्स्यते यदपेक्षयास्य देहः पूर्व इत्यर्थः नान्यत्र विदेहादित्यर्थः

नवो भवन्ति। तथा विच्छिद्य विच्छिद्य तेन तेनात्मना पुनः पुनः समुदाचरन्तीति विच्छिन्नाः कथं रागकाले क्रोधस्यादर्शनात् न हि रागकाले क्रोधः समुदाचरति रागश्च क्वचित् दृश्यमानो न विषयान्तरे नास्ति नैकस्यां स्त्रियां चैत्रोरक्त इति अन्यासु स्त्रीषु विरक्तः किन्तु तत्र रागोलब्धवृत्तिः अन्यत्र भविष्यद्वृत्तिरिति। स हि तदा प्रसुप्ततनुविच्छिन्नोभवति। विषये यो लब्धवृत्तिः स उदारः सर्व्वत्र वैते क्लेशविषयत्वं नातिक्रामन्ति। कस्तर्हि विच्छिन्नः प्रसुप्तस्तनुरुदारोवा क्लेश इति उच्यते सत्यमेवैतत् किन्तु विशिष्टानामेवैतेषां विच्छिन्नादित्वं यथैव प्रतिपक्षभाव-

अनु सती नात्यन्त विनाश इति किमिति तदीय योगर्द्धि बलेन विषय संसर्गीभावेन क्लेशाः प्रबुध्यन्ते इत्यत आह सतामिति। सन्तु क्लेशाः दग्धक्लेषांप्रसङ्ख्यानाग्निना बीजभाव इत्यर्थः क्लेश प्रतिपक्षः क्रियायोगस्तस्य भावन मनुष्ठानं तेनोपहतास्तनवः अथवा सम्यक् ज्ञानमविद्याया: प्रतिपक्षः भेददर्शन सख्याताया माध्यस्थं रागद्वेषयो रनुबन्धबुद्धिनिवृत्तिरभिनिवेशक्षेति। विच्छित्ति माह तथेति। क्लेशानामन्यतमेन समुदाचरताभिभवाद्वात्यन्त विषयसेवया वा विच्छिद्यविच्छिद्यतेन तेनात्मना समुदाचरन्ति आविर्भावन्ति वाजीकरणाद्युपयोगेन वाभिभावदौर्ब्बल्येन वेति बीप्सया वा विच्छेदसमुदाचारयोः बीप्सः पुनर्दर्शयता यथोक्तात् प्रसुप्तात् भेद उक्तः। रागेण वा समुदाचरता विजातीय क्रोधोभिभूयते सजातीयेन वा विषयान्तरवर्त्तिना रागेणैव विषयान्तरवर्त्ती रागोभिभूयत इत्याह रागेति भविष्यद्वृत्तिस्त्रियो मतिः यथायोग वेदितव्येत्याह। सहीति भविष्यद्वृत्तिक्लेशभाव परामर्शि सर्व्वनीम न चैवराज परामर्शि तस्य विच्छिन्नत्वादेवेति। उदारमाह विषय इति। ननु उदार एव पुरुषान् क्रियातीति भवतु क्लेशोचित्वकिञ्चनः कथं क्लेशा इत्यत आह। सर्व्वेष एवैतेइति क्लेशविषयत्वं क्लेशपदवाच्यत्वं नातिक्रामन्ति उदारतामापद्यमाना अतएव

नातोनिवृत्तस्तथैव स्वव्यञ्जकाञ्जनेनाभिव्यक्त इति सर्व्व एवामी क्लेशा अविद्याभेदाः कस्मात् सर्व्वेषु अविद्यैवाभिप्लवते यदविद्यया वस्त्वा कार्य्यते तदेवानुशेरते क्लेशा विपर्य्यास प्रत्ययकाले उपलभ्यन्ते क्षीयमाणां चाविद्यामनुक्षीयन्त इति ॥ ४ ॥

तत्राविद्यास्वरूपमुच्यते।—

अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥ ५ ॥

अनित्ये कार्य्ये नित्यख्यातिः। तद्यथा— ध्रुवा पृथिवी ध्रुवा सचन्द्रतारका द्यौः अमृतादिवौकस इति तथाशुचौ परमबीभत्से काये उत्क्व--स्थानाद्बीजादुपष्टम्भान्निःस्यन्दान्निधना-

तेपि इयाइति भावः क्लेशवेनैकतां मन्यमानश्चोदयति कस्तर्हीति। क्लेशवेन समानत्वेपि यथोक्तावस्थाभेदादिशेष इति परिहरति उच्यते सत्यमिति। स्यादेतदविद्यातो भवन्तु क्लेशाः तथाप्यविद्या निवृत्तौ कस्मान्निवर्त्तन्ते न खलुपटः कुविन्दनिवृत्तौ निवर्त्तते इत्यत आह सर्व्वएवेति भेदादव भेदास्तदविनिर्भागवर्त्तिन इति भावत् कस्मात् उत्तरं सर्वेष्विति तदेव स्फुटयति यदीति आकार्य्यते समारोप्यते शेषं सुगमं "प्रसुप्ततनुविच्छिन्नोदाराणां तत्त्वदर्शिनां। विच्छिन्नोदारूपाश्च क्लेशाविषय सङ्गिनामिति" संग्रहः ॥ ४ ॥

अनित्याशुचिरविद्या। अनित्यत्वोपयोगि विशेषणं कार्य्य इति केचित् किञ्च भूतानि नित्यत्वेनाभिमन्यमानास्तद्रूपमभीप्सवस्तान्येवोपासते एवं यमादि मार्गानु

दपि । कायमाधेयशौचत्वात् पण्डिता ह्यशुचिं विदुः ॥ इत्य-
शुचौ शुचिख्यातिर्दृश्यते नवेव शशाङ्कलेखा कामनीयेयं कन्या
मध्वमृतावयवनिर्म्मितेव चन्द्रं भित्वा निःसृतेव ज्ञायते नीलो-
त्पलपत्रायताक्षी हावगर्भाभ्यां लोचनाभ्यां जीवलोकमाक्षा-
सयन्तीवेति कस्य केनाभिसम्बन्धः भवति चैवमशुचौ शुचि
विपर्य्यासप्रत्यय इति । एतेनापुण्ये पुण्यप्रत्ययस्तथेत्यनर्थे
चार्थप्रत्ययोव्याख्यातः । तद्यथा—दुःखे सुखख्यातिर्वेत्यति
परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्व्वं

पासते चन्द्र सूर्य तारकाद्युल्लोकान्नित्यानऽभिमन्यमानास्तत्प्राप्तये एवं दिवौकसो देवानऽस्तानऽभिमन्यमानस्तद्भावाय सोमं पिबन्ति आम्नायते हि "अपामसोममम-मृता अभूमेति" सेयमनित्येषु नित्यख्यातिरविद्या तथाऽशुचौ परमबीभत्सकायेऽर्धोक्त एव कायबीभत्सतायां वैयासिकीं गाथां पठति स्नानादिति मातुरुदरं सुचाद्यपहृतं स्नानं पिबोलोहितरेतसी बीजं अशितपीताहाररसादिभाव उपष्टम्भेन शरीरं धार्य्यते निःस्यन्दः प्रस्वेदःनिधनञ्च श्रोत्रियशरीरमपवित्रमिति तत्स्यर्थं स्नानविधानात् । ननु यदि शरीर मशुचि कृतं तर्हि मृज्जलादिक्षालनेनेत्यत आह आधेयशौचत्वा-दिति । भावेनाशुचेरपि शरीरस्य शौचमाधेयं सुगन्धितेव कामिनीनामङ्गरागा-दिति अर्धोक्तं पूरयति द्वयुक्तिभ्योहेतुभ्यो अशुचौ शरीर इति शुचिख्यातिमाह नवेति हावः भ्रूक्षेपजा स्त्रीलोकस्य स्त्रीकायस्य परमबीभत्सस्य केन मन्दतमसाऽप्यंशेन शशाङ्कलेखादिना सम्बन्धः । एतेनाशुचौ स्त्रीकाये शुचिख्याति प्रदर्शनेन अपुण्ये हिंसादौ संसार मोचकादीनां पुण्यप्रत्ययः एवमर्ज्जन रक्षादि दुःखबहुलभयानर्थे धनादावर्थे प्रत्ययो व्याख्यातः सर्व्वेषां जुगुप्सितत्वे नाशुचित्वात् तथा दुःख इति सैगमं तथा अनात्मनि इति सुगमं तथेतदश्लोकम् । पञ्चशिखेन व्यक्तं चेतनं पुरुषारप-णादि । अव्यक्तं अचेतनं अध्यासनाशनादि स सर्व्वोऽप्रतिबुद्धोमूढः चत्वारि पदानि स्थानान्यस्या इति चतुष्पदानृत्वा अपि दिङ्मोहात्तथात्वं कृतादि विषया अनात्मपदा

विवेकिन इति। तत्र सुखख्यातिरविद्या तथा अनात्मन्या-त्मख्यातिर्वाह्योपकरणेषु चेतनाचेतनेषु भोगाधिष्ठानेषा शरीरे पुरुषोपकरणे वा मनसि अनात्मन्यात्मख्यातिरिति तथैतदुक्तं व्यक्तमव्यक्तं वा सत्वमात्मत्वेनाभिप्रतीत्य तस्य-सम्पदमनुनन्दत्यात्मसम्पदं मन्यानस्तस्य व्यापदमनुशोच-त्यात्मव्यापदं मन्यानः सर्व्वोप्रतिबुद्ध इत्येषा चतुष्पदा भवत्यविद्या मूलमस्य क्लेशतन्त्रस्य कर्म्माशयस्य च विपाक-स्येति तस्याश्चामित्रागोष्पदवदवस्तु स तत्वं विज्ञेयं यथा नामित्रोमित्राभावो न मित्रमात्रं किन्तु तद्विरुद्धः सपक्षः यथावाऽगोष्पदं न गोष्पदाभावो न गोष्पदमात्रं किन्तु देशएव ताभ्यामन्यद्वस्त्वन्तरं एवमविद्या न प्रमाणं न प्रमाणाभावः किन्तु विद्याविपरीतं ज्ञानान्तरमविद्येति ॥५॥

अविद्या तत् किमुच्यते चतुष्पदेत्यत आह। मूलमस्य इति सन्तु नामान्या अप्य-विद्या संसारबीजं चतुष्पदेति। नञ्विद्येति नञ् समासः पूर्व्वपदार्थे प्रधानो-वा स्याद् यथाऽमत्तिकमिति उत्तरपदार्थे प्रधानो वा यथा अराजपुरुष इति अन्-पदार्थे प्रधानो वा यथा अमत्तिकोदेश इति तत्र पूर्व्वपदार्थे प्रधानत्वे विद्यायाः प्रसज्यप्रतिषेधोगम्येत नचास्याः क्लेशादिकारणत्वं उत्तरपदार्थप्रधानत्वे वा विद्यैव कस्यचिदभावेन विशिष्टा गम्येत सा च क्लेशादि परिपन्थिनी नतु तद्बीजं न हि प्रधानोपघाती प्रधानगुणयुक्तस्तदुपघाताय गुणेत्यन्याय कल्पना तस्माद्विद्या स्वरूपा नुपघाताय नञोन्यथाकरणमध्याहारो वा निषेध्यस्येति अन्यपदार्थे प्राधान्येविद्या-बुद्धि प्रधानं वक्तव्या नचासौ विद्यायाः अभावमात्रेण क्लेशादिबीजं विवेकख्याति-पूर्व्वके निरोध सम्पन्नायाः अपि तथात्वे प्रसङ्गात् तस्मात्सर्व्वथैवाविद्यायाः न क्लेशादि मूलतेत्यत आह। तस्याश्चेति वस्तुनोभावो वस्तुत्वं वस्तुत्वमिति यावत्। तदनेन न प्रसज्यप्रतिषेधः नापि विद्यैव विद्या नापि तदभाव विशिष्टा बुद्धिरपितु विद

दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ॥ ६ ॥

पुरुषोऽदृक्शक्तिर्बुद्धिर्दर्शनशक्तिरित्येतयोरेकस्वरूपापत्तिरिवास्मिता क्लेश उच्यते भोक्तृभोग्यशक्त्योरत्यन्तविभक्तयोरत्यन्तासङ्कीर्णयोर्विभागप्राप्ताविव सत्यां भोगः कल्पते । स्वरूपप्रतिलम्भे तु तयोः कैवल्यमेव भवति कुतोभोग इति । तथाचोक्तं—बुद्धितः परमं पुरुषमाकारशीलविद्यादिभिः । विभक्तमपश्यन् कुर्य्यात् तत्रात्मबुद्धिं मोहेनेति ॥ ६ ॥

विपर्यय ज्ञानमविद्येत्युक्तं लोकाधीनावधारणेहि शब्दार्थसम्बन्धः लोकेचोत्तर पदार्थ प्रधानस्यापि नञः उत्तर पदाभिधेयोपमर्दैकस्य तद्भिन्न तद्विरुद्ध परतया तत्र तत्रोपलम्भेरिहापि तद्विरुद्धवृत्तिरिति भावः दृष्टान्तं विभजते यथात्मनामिव इति नमित्याभावः नापि भिन्नमात्र मित्यस्यान रंवस्वन्तर किन्तु तद्विरुद्धः स्वभाव इति वक्तव्यं तथागोष्पदमिति न गोष्पदाभावो न गोष्पदमात्रं किन्तु देशएव विपुलीगोष्पदविरुद्धस्तस्याश्चाभावगोष्पदाध्यासस्य व्यर्थादस्वन्तर दार्ष्टान्तिके योजयति एवमिति ॥५॥

अविद्यामुक्त्वा तस्याः कार्य्यमस्मिता रागादि वर्षिष्ठामाह दृग्दर्शनइत्यादि सूत्रं दृक्च दर्शनञ्च ते एव शक्ती तयोरात्मानात्मनीरनात्मन्यात्मज्ञानलक्षणाऽविद्यादितायां एकात्मतेव ननु परमार्थत एकात्मता सा अस्मिता दृक्दर्शनयोरिति वक्तव्यं तयोर्भोक्तृभोग्यतालक्षणं सम्बन्धं दर्शयितुं शक्ति ग्रहणं सूत्रं विवृणोति, पुरुषइति ननुतयोरभेदप्रतीतेरभेद एव कस्मान्नभवति कुतस्तैक्यं क्लिश्यति पुरुषमित्यत आह भोक्तृभोग्येति भोग्यशक्तिर्बुद्धिः भोक्तृशक्तिः पुरुषस्तयोरत्यन्तविभक्तयोः कुतोत्यन्तविभक्तत्व मित्यत आह । अत्यन्तासङ्कीर्णयो रपरिणामित्वादिधर्मकः पुरुषः । परिणामित्वादि धर्मका बुद्धिरित्यसङ्कीर्णता तदनेन प्रतीयमानोप्यभेदो न पारमार्थिक इत्यर्थः । अविभागेति क्लेशसूत्रम् ।

सुखानुशयी रागः ॥ ७ ॥

सुखाभिज्ञस्य सुखानुस्मृतिपूर्वः सुखे तत्साधने वा योगर्धस्तृष्णा लोभः स राग इति ॥ ७ ॥

दुःखानुशयी द्वेषः ॥ ८ ॥

दुःखाभिज्ञस्य दुःखानुस्मृतिपूर्वोदुःखे तत्साधने वा यः प्रतिघोमन्युर्जिघांसा सा क्रोधः स द्वेषः ॥ ८ ॥

अन्वयं दर्शयित्वा व्यतिरेकमाह स्वरूपेति । प्रतिख्यौ विवेकख्याति परस्याप्येतत्-सम्मतमित्याह तदुक्तं पञ्चशिखेन बुद्धित इति आकारः स्वरूपं सदाविशुद्धिः श्वेत-मौदासिन्यं विद्याचैतन्यं । बुद्धिरविग्रहा अनुदासीना जड़ाचेति तत्वात्मबुद्धि-रविद्या मोहः ॥ ६ ॥

पूर्वाविद्याजनितः संस्कारः तमोवाविद्यायास्तामसत्वादि विवेक दर्शने रागादीनां विनिवृत्तेरविद्यापादितास्तितारागादीनां निदानमित्यस्तितानन्तरं रागादीन् लक्षयति सुखानुशयी रागः । अनभिज्ञस्य स्मृतेरभावात् सुखाभिज्ञ-स्येत्युक्तं अर्थ्यमाने सुखे रागः सुखानुस्मृतिपूर्वकः अनुभूयमानेतु सुखेनानुस्मृतिम-पेक्षते तत्साधने तु अर्थ्यमाने दृश्यमानेवा सुखानुस्मृतिपूर्वएव रागः दृश्यमान-मपि हि सुखसाधनं तज्जातीयस्य सुखहेतुतां स्मृत्वा तज्जातीयतया चास्य सुखहेतुतामनुमायेर्क्ति ॥ ७ ॥

अनुशयीति पदार्थमाह य इति दुःखानुशयी द्वेषः । दुःखाभिज्ञस्येति पूर्व-वदाक्षिप्यांअनुशयीपदार्थमाह यः प्रतिघति प्रतिहन्तीति प्रतिघः ॥ ८ ॥

स्वरसवाहीविदुषोऽपि तथारूढोऽभिनिवेशः ॥९॥

सर्वस्य प्राणिन इयमात्माशीर्नित्या भवति मा न भूवं भूयासमिति न चाननुभूतमरणधर्मकस्यैषा भवत्यात्माशीः एतयाच पूर्वं जन्मानुभवः प्रतीयते सचायमभिनिवेशः क्लेशः स्वरसवाही कृमेरपि जातमात्रस्य प्रत्यक्षानुमानागमैरसम्भावितोमरणत्रास उच्छेददृष्ट्यात्मकः पूर्वं जन्मानुभूतं मरणदुःखमनुमापयति। यथाचायमत्यन्तमूढेषु दृश्यते क्लेशस्तथाविदुषोऽपि विज्ञातपूर्वापरान्तस्य रूढः कस्मात् समाना हि तयोः कुशलाकुशलयोर्मरणदुखानुभवादियं वासनेति ॥ ९ ॥

एतदेव पर्य्याये विवृणोति मन्युरिति स्वरसः अभिनिवेशपदार्थं व्याचष्टे सर्वस्य-प्राणिन इति। इयमात्माशीरात्मनि प्रार्थना मा नभूवं मा अभावीभूवं भूयासं जीव्यासमिति न चाननुभूतमरणधर्मकस्य अननुभूतमरणं धर्मो येन जन्तुना तस्यैवं भवत्यात्माशीरभिनिवेशः मरणभयं प्रसङ्गती जन्मान्तरं प्रत्यक्षचाक्षं नास्तिकं निराकरोति। एतयाचेति प्रत्युदितस्य शरीरस्य म्रियमाणत्वात् पूर्वं जन्मानुभवः प्रतीयते निकायविशिष्टाभिरपूर्वाभिर्देहेन्द्रियबुद्धि वेदनाभिरभिसम्बन्धो जन्म तस्यानुभवः प्राप्तिः सा प्रतीयते कथमित्यत आह। स चायमभिनिवेशः अङ्गीकारोवेवास्य क्लेशत्वमाह। क्लेश इति अयमहितकर्मादिना जन्तून् क्लिश्नाति दुःखाकरोतीति क्लेशः वक्तुमुपक्रान्तं परिसमापयति। स्वरसवाहीति। स्वभावेन वासना रूपेण वहनशीलो न पुनरागन्तुकः कृमेरपि जातमात्रस्य दुःखबहुलस्य निकृष्टतमचेतन्यस्य अनागन्तुकत्वे हेतुमाह। प्रत्यक्षानुमानागमैः प्रत्युदिते जन्मन्यसम्भावितो सम्भावितोमरण त्रास उच्छेद दृष्ट्यात्मकः पूर्वं जन्मानुभूतं मरणदुःखमनुमापयति अयमभिसन्धिर्जातमात्र एवहि बालकोमारकवस्तुदर्शनात् वेपमानः कस्यविशेषा-

ते प्रतिप्रसवहेयाः सूक्ष्माः ॥ १० ॥

ते पञ्च क्लेशा दग्धबीजकल्पा योगिनश्चरिताधिकारे चेतसि प्रलीने सह तेनैवास्तं गच्छन्ति ॥१०॥

दनुमितमरणप्रत्यासन्नसत्त्वसंस्कारादृते नचायं संस्कारोऽनुभवं विना न चास्मिन् जन्मन्यनेन मरणमनुभूतं मनुमितं श्रुतं वा प्रागीदृश्यं दुःखत्वं वावगम्यते तस्मात्तस्य तथाभूतस्य स्मृतिः परिशिष्यतेऽन्यचेयं संस्कारादृते नचायं संस्कारोऽनुभवं विना न चास्मिन् जन्मन्यनुभव इति प्रागभवीयः परिशिष्यत इत्याशीः पूर्वजन्मसम्बन्ध इति तथापदं यथापदमाकांक्षति। इत्यर्थं प्राप्ते यथापदे सति यादृशी वाक्यार्थो भवति तादृशं दर्शयति। यथाचायमिति। अत्यन्तमूढेषु मन्दतमचैतन्येषु विद्वत्तां दर्शयति विज्ञात पूर्वापरां तस्यान्तः कोटिपुरुषस्य हि पूर्वा कोटिः संसारः उत्तरा कैवल्यं सैव विज्ञाता श्रुतानुमानाभ्यां येन स तथोक्तः सोऽयं मरणं चास्य आक्रमेरविदुषो रूढः प्रसिद्ध इति नत्वविदुषो भवतु मरणं चासौ विदुषस्तु न सम्भवति विद्ययोन्मूलितत्वात् अनुन्मूलने वा मरणं वास्य स्यादत्यन्तं सत्यमित्याशयवान् पृच्छति कस्मादिति उत्तरं समानाहीति न संप्रज्ञातवान् विद्वानपितु श्रुतानुमित विवेक इति भावः ॥ ९ ॥

तदेवं क्लेशालक्षितासेषां च ईयानां प्रसुप्ततनु विच्छिन्नोदारूपतया चतस्रोऽवस्था दर्शिताः कस्मात् पुनः पञ्चमी क्लेशावस्था दग्धबीजभावतया सूक्ष्मा न सूत्रकारेण कथितेत्यत आह। ते सूक्ष्माः यत् किल पुरुषप्रयत्नगोचरत्वादुपदिश्यते न च सूक्ष्मावस्था हानं प्रयत्न गोचरः किन्तु प्रतिप्रसवेन कार्यस्य चित्तस्यास्मिता लक्षण कारणभावापन्ना हातव्येति व्याचष्टे इति सुगमं। अथ क्रियायोगतनूकृतानां क्लेशानां किं विषयात् पुरुषप्रयत्नाज्ञानमित्यत आह स्थितानान्तु बीजभावोपगतानामिति ॥ १० ॥

ध्यानहेयास्तद्वृत्तयः ॥ ११ ॥

स्थितानान्तु बीजभावोपगतानां क्लेशानां या वृत्तयः स्थूलास्ताःक्रियायोगेन तनूकृताः सत्यः प्रसङ्ख्यानेन ध्यानेन हातव्याः यावत् सूक्ष्मीकृता यावद् दग्धबीजकल्पा इति । यथाच वस्त्राणां स्थूलो मलः पूर्व्वं विधूयते पश्चात् सूक्ष्मोयत्नो यत्नेन चाप्रलीयते तथा स्वल्पप्रतिपक्षाः स्थूलावृत्तयः क्लेशानाम् । सूक्ष्मास्तुमहाप्रतिपक्षा इति ॥ ११ ॥

क्लेशमूलः कर्माशयोदृष्टादृष्टजन्मवेदनीयः ॥ १२ ॥

तत्र पुण्यापुण्यकर्म्माशयः कामलोभमोहक्रोधप्रसवः

वर्त्मभ्यो व्यवच्छिनत्ति सूत्रं पठति ध्यानेति व्याचष्टे क्लेशानामिति क्रियायोगतनूकृता अपि हि प्रतिप्रसवहेतुभावेन कार्य्यतः स्वरूपतश्च शक्या उच्छेत्तुमिति स्थूला उक्ता पुरुष प्रयत्नस्य प्रसंख्यानगोचरस्यावधिमाह यावदिति सूक्ष्मीकृता इति विवृणोति दग्धेति । तत्र एव दृष्टान्तमाह । यथा च वस्त्राणामिति । यत्नेन तत्क्षालनादिनोपायेन चारसंयोगादि अस्थूल सूक्ष्मतामात्रतया दृष्टान्तदार्ष्टान्तिकयोः साम्यं न पुनः प्रयत्नापनेयतया प्रतिप्रसवहेयेषु तदसम्भवात् स्वल्पप्रतिपक्षउच्छेद हेतुर्यासां तास्तथोक्ताः महान् प्रतिपक्ष उच्छेदहेतुर्यासां तास्तथोक्ता प्रतिप्रसवस्य चाधस्तात् प्रसंख्यानमित्यवरतया स्वल्पत्वमुक्तम् ॥ ११ ॥

स्यादेतच्चात्मायुर्भोगहेतवः पुरुषं क्लिश्नन्तः क्लेशाः कर्म्माशयश्च तथात्वविद्यादयस्तत्क्षयभविद्यादयः क्लेशा इत्यत आह । क्लेशमूलः कर्म्माशय

स दृष्टजन्मवेदनीयश्चादृष्टजन्मवेदनीयश्च तत्र तीव्रसंवेगेन मन्त्रतपः समाधिभिर्निर्वर्त्तितईश्वरदेवतामहर्षिमहानुभावानामाराधनाद्वा यः परिनिष्पन्नः स सद्यः परिपच्यते पुण्यकर्म्माशय इति। तथा तीव्रक्लेशेन भीतव्याधितदीनेषु विश्वासोपगतेषु वा महानुभावेषु वा तपस्विषु कृतः पुनः पुनरपकारः सचापि पापकर्म्माशयः सद्यएव परिपच्यते यथा नन्दीश्वरः कुमारो मनुष्यपरिणामं हित्वा देवत्वेन परिणतः तथानाहुषोपि देवानामिन्द्रः स्वकं परिणामं हित्वा तिर्य्यक्त्वेन परिणत इति तत्र नारकाणां नास्ति दृष्टजन्मवेदनीयः कर्म्माशयः क्षीणक्लेशानामपि नास्त्यादृष्टजन्मवेदनीयः कर्म्माशयः इति ॥ १२ ॥

इत्यादि क्लेशमूलं यस्मीत्यादे च कार्य्यकारणे च स मतीतः एतदुक्तं भवति अविद्यादिमूलः कर्म्माशयो जात्यायुर्भोगहेतुरिति अविद्यादयोपि सङ्क्षेपतोऽतः क्लेशा इति व्याचष्टे। तत्रेति आशेरते सांसारिकः पुरुषा अस्मिन्नित्याशयः कर्म्मणामाशयो धर्म्माधर्म्मौ कामात्काम्यकर्म्मप्रवृत्तौ स्वर्गादि हेतुर्धर्म्मो भवति एवं लोभात् परद्रव्यापहारादिधर्म्मः मोहादधर्म्मे हिंसादौ धर्म्मबुद्धेः प्रवर्त्तमानस्याधर्म्मएव भवति मोहजोधर्म्मोऽस्ति क्रोधजोधर्म्मः तद्यथा ध्रुवस्य जनकावमानजन्मनः क्रोधात्तु जिगीषया हि तेन कर्म्माशयेन पुण्येनोत्तरोत्तरलोकवासिनामुपरिस्थानं अधर्म्मेतु क्रोधजो ब्रह्मबधादिजन्माप्रसिद्धएव भूतानां तस्य द्वैविध्यमाह। सदृष्टजन्मेति दृष्टजन्मवेदनीयमाह। तीव्रसंवेगेनेति। अथासङ्क्षेपेन दृष्टान्तमाह। यथानन्दीश्वर इति। तत्र नारकाणामिति। येन कर्म्माशयेन कुम्भीपाकादयो नरकभेदाः प्राप्यन्ते तत्कारिणो नारकाणेषां नास्ति दृष्टजन्मवेदी यः कर्म्माशयो नहि मनुष्यशरीरेण तत्परिणामभेदेन वा सातक्रूरौ बलवत्प्रहारादिनिरन्तरोपभोग्या वेदना सम्भवतीति शेषं सुगमम्। १२।

सति मूले तद्विपाको जात्यायुर्भोगाः ॥ १३ ॥

सत्यु क्लेशेषु कर्माशयो विपाकारम्भी भवति नाच्छिन्नक्लेशमूलः ॥ यथाएव तुषावनद्धाश्चाखिलतण्डुलाः अदग्धबीजभावाः प्ररोहसमर्था भवन्ति नापनीततुषा दग्धबीज भावा वा तथा क्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति नापनीतक्लेशो न प्रसंख्यानदग्धक्लेशबीजभावोवेति सच विपाकस्त्रिविधो जातिरायुर्भोग इति तत्रेदं विचार्यते किमेकं कर्म एकस्य जन्मनः कारणं अथैकं कर्मा-

स्यादेतदविद्यामूलत्वे कर्माशयो यस्य विद्वीत्यादे सत्यविद्याविनाशात् मा नामकर्म्माशयान्तरं चेषीत प्राक्तन कर्माशयानामनादिभवपरम्परासञ्चितानामसंख्यातानामनियत विपाक कालानां भोगेन, चपयितुमशक्यत्वाद्-अशक्यच्छेदः संसारः स्यादित्यत आह। सतीति। व्याधित एतदुक्तं भवति सुख दुःख फलो हि कर्माशयस्तादर्थ्यान तन्नान्तरीयकतयाजन्मायुषी अपि प्रसूते सुखदुःखे च रागद्वेषानुषक्ते तदविनिर्भागवर्त्तीनि तदभावे न भवतः न चास्ति सम्भवो न च तत्र यत्नुष्यति वोद्विजते वा न च तस्य सुखं दुःखं वेति तद्दियमात्मभूमिः क्लेशसलिलावसिक्ता कर्मफलप्रसवबीजमित्यस्ति क्लेशानां फलोपजननेपि कर्माशयसहकारितेति क्लेशसमुच्छेदे सहकारिवैकल्यात् सन्नप्यनन्तीन्यनियत विपाककालोपि प्रसङ्ख्यान दग्धबीजभावी न फलाय कल्पत इति उक्तमर्थ भाष्यमेव द्योतयति सत्स्विति। अत्रैवदृष्टान्तमाह। यथा तुषेति। सतुषा अपि दग्धबीजभावाः स्वेदादिभिः दार्ष्टान्तिके योजयति तथेति। ननु नक्लेशाः शक्या अपनेतुं न हि सत्तामपनय इत्यत आह न प्रसङ्ख्यान दग्धक्लेश बीजभाव इति विपाकस्य वैधिर्यमाह सचेति विपच्यते साध्यते कर्मभिरिति विपाकः कर्मैकल

नेकं कर्म्म अनेकजन्मानि वर्त्तयति अथानेकं कर्म्मैकजन्मनि-वर्त्तयतीति न तावदेकं कर्म्मैकस्य जन्मनः कारणं कस्मादनादिकालप्रचितस्यासङ्ख्येयस्यावशिष्टकर्म्मणः सांप्रतिकस्य च फलक्रमानियमात् अनाश्वासो लोकस्य प्रसक्तः सचानिष्ट इति नचैकं कर्म्मानेकस्य जन्मनः कारणं कस्मादनेकेषु जन्मसु एकैकमेव कर्म्मानेकस्य जन्मनः कारणमित्यवशिष्टस्य विपाककालाभावः प्रसक्तः सचाप्यनिष्ट इति नचानेकं कर्म्मानेकस्य जन्मनः कारणं कस्मादनेकं जन्म युगपन्न सम्भवतीति क्रमेण वाच्यं तथाच पूर्व्वदोषानुषङ्गः। तस्मा ज्जन्मप्रायणान्तरे कृतः पुण्यापुण्यकर्म्माशयप्रचयो विचित्र-प्रधानोपसर्ज्जनभावेनावस्थितः प्रायणाभिव्यक्तः एवम्प्रवृत्तेन मरणं प्रसाध्य संमूर्च्छित एकमेव जन्म करोति तच्च जन्म

ध्रुवं कृत्वा जन्मैकत्वानेकत्व गोचरा प्रथमा विचरणा द्वितीयातु कर्म्मानेकत्वं ध्रुवं कृत्वा जन्मैकत्वानेकत्वगोचरा तदेवं चत्वारो विकल्पाः तत्र प्रथमं विकल्पमपा करोति न तावदेकं कर्म्मैकस्य जन्मनः कारणं। पृच्छति कस्मादिति। उत्तरं अनादिकाले एकैकजन्मप्रचितस्य अतएव असङ्ख्येयस्य एकैकजन्मक्षयितादेवै-ककात् कर्म्मणोवशिष्टस्य कर्म्मणः सांप्रतिकस्य च फलक्रमानियमादनाश्वासी लोकस्य प्रसक्तः सचानिष्ट इति एतदुक्तं भवति कर्म्मचयस्य विरलत्वात् तदुत्पत्ति-भावुलाश्चान्योन्यसंपीड़िताय कर्म्माशया निरन्तरीत्पत्तयो निरुच्छ्वासाः स्वविपाकं प्रतीति न फलक्रमः अक्षीणवधारयितुं प्रेचावतेत्यनाश्वासी पुण्यानुष्ठानं प्रतिप्रसक्त इति। द्वितीयं विकल्पं निराकरोति न च एकं कर्म्मानेकस्य जन्मनः कारणं पृच्छति

कर्म्मणा भोगः संपद्यते इति यसौ कर्म्माशयो जन्मायुर्भोग-हेतुत्वात् त्रिविपाकोभिधीयत इति। अतएकभविकः कर्म्माशयउक्त इति दृष्टजन्मवेदनीयस्यैकविपाकारभ्भो भोग-हेतुत्वात् द्विविपाकारभ्भो वायुर्भोगहेतुत्वात् नन्दीश्वरवत् नहुषवद्देति क्लेशकर्म्मविपाकानुभवनिर्म्मिताभिस्तु वास-नाभिरनादिकालसंमूर्च्छितमिदं चित्तं चित्रीकृतमिव सर्व्वतोमलराजालयग्रन्थिभिरिवाततं इत्येताअनेकभवपूर्व्विका तेनैव कर्म्मणा लब्धायुष्कं भवति तस्मिन्नायुषि तेनैव वासनाः यस्त्वयं कर्म्माशय एष एवैकभविक उक्त इति ये संस्काराः स्मृतिहेतवस्ता वासनाः तासामनादिकालीना

कस्मादिति उत्तरं अनेकस्मिन् जन्मन्याहितमेक मेव कर्म्मानेकस्य जन्मनश्चयस्य विपाकस्य निमित्त मित्यवशिष्टस्य विपाक कालाभावः प्रसक्तः स चाप्यनिष्ट इति कर्म्मवैफल्येन तदनुष्ठान प्रसङ्गात्। यदैकजन्मसमुच्छ्रयी कर्म्मणैकस्मिन् फल-क्रममनियमादनाश्वासस्तदा कैव कथा बहुजन्मसमुच्छ्रयी कर्म्मण्येकस्मिन् तच्च वसराभावात् विपाककालाभावएव साम्प्रतिकस्येति भावः। इतीयं विकल्प-कल्पं निराकरोति। नचानेकं कर्म्मानेकस्य जन्मनः कारणं अत्र हेतुमाह। तदनेकं जन्म युगपन्न सम्भवत्ययोगिनइति। क्रमेण वाच्यं यदिहि कर्म्मसहस्रं युगपज्जन्मसहस्रं प्रसूयेत तत एव कर्म्मसहस्रप्रचयादवशिष्टस्य विपाककालः फल-क्रम मनियमश्च स्यातां नत्वस्ति जन्मनां यौगपद्यं एव मेव प्रथमपक्ष एवोक्तः दूषणं चेत्यर्थः। तदेवं पक्षत्रये निराकृते पारिशेष्यादनेकं कर्म्मैकस्य जन्मनः कारणमिति पक्षोऽवशिष्यत इत्याह।

इति यस्त्वसावेकभविकः कर्माशयः स नियतविपाकश्चानियतविपाकश्च तत्र दृष्टजन्मवेदनीयस्य नियतविपाकस्यैवायं नियमो नत्वदृष्टजन्मवेदनीयस्यानियतविपाकस्यकस्मात् योऽदृष्टजन्मवेदनीयोऽनियतविपाकस्तस्य त्रयी गतिः। कृतस्याविपक्वस्य नाशः प्रधानकर्मणा वापगमनं वा नियतविपाकप्रधानकर्मणाभिभूतस्य वा चिरमवस्थान मिति। तत्र कृतस्याविपक्वस्य नाशो यथा शुक्लकर्मोदया दिहैव नाशः कृष्णस्य यत्तेदमुक्तं हे हेह वै कर्मणो वेदि-

तव्यान्मेतिजन्म च प्रायणस्य जन्मप्रायणे तयीरन्तरं मध्यं तस्मिन् विविधः सुख दुःख फलीपहारेण विविधः यदत्यन्तमुद्भूतमनन्तरमेव फलं दास्यति तत् प्रधानं यत्तु किञ्चिदिलम्बेन तदुपसर्जनं प्रायणं मरणं तेनाभिव्यक्तः स्वकार्यारम्भणाभिमुख्य मुपनीतः एकप्रघट्टकेन युगपत् संमूर्च्छितः जन्मादिलक्षणे कार्ये कर्तव्ये एकलोलीभावमापन्नः एक मेव जनम करोति नानेकं तच्च जन्म मनुष्यादिभावः तेनैव कर्मणा लब्धायुष्कं कालभेदान्नियतजीवनञ्च भवति तस्मिन्नायुषि तेनैव कर्मणाभोगः सुख दुःख साक्षात्कारः खसन्धितया सम्पद्यत इति तस्मादसौ कर्माशयो जीवायुर्भोगहेतुत्वात् विविपाकोऽभिधीयते। दृष्टजन्मिक मुपसंहरति। अत एकभविकः कर्माशय उक्तइति। एकीभवः एकभवः पूर्वकालेत्यादिना समासः एकभवीस्वार्थे मत्वर्थीयठन् क्वचित्पाठः एकभविक इति तत्रैकभवशब्दात् भवार्थे ठक् प्रत्ययः एकजन्मावच्छिन्नमस्य भवन मित्यर्थः तदेव दृष्टजन्मवेदनीय स्यैहिकस्य कर्मणस्त्रिविपाकत्वं व्यवच्छिनत्ति। दृष्टेति नन्दीश्वरस्य खलटवर्षावच्छिन्नायुषो मनुष्यजन्मनस्तीव्रसंवेगादिमाधोपायजन्मापुण्य-

तत्रेदं पापकस्यैकोराशिः पुण्यकृतोपहन्ति तदिच्छस्व कर्माणि सुकृतानि कर्त्तुमिहैव कर्म्म कवयो वेदयन्ते प्रधान-कर्म्मण्यापगमनं यत्रेदमुक्तं स्यात् स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्षः कुशलस्य नापकर्षायालम्। कस्मात् कुशलं हि मे बह्वन्यदस्ति यत्रायमापगतः स्वर्गेप्यपकर्षमल्पं करिष्यतीति नियतविपाकप्रधानकर्म्मणाभिभूतस्य

भेद आयुर्भोगहेतुत्वात् द्विविपाकी नहुषस्य तु पार्ष्णि प्रहार विरोधिनागलासयेन्द्रपदप्राप्तिहेतुनैव कर्म्मणा आयुषी विहितत्वादपुण्यभेदीभोगमात्रहेतुः ननु यथैकभविकः कर्म्माशयस्तथा किं क्लेशवासना भोगानुकूलाश्च कर्म्मविपाकानुभववासना तथा च मनुष्यस्तिर्य्यग्योनिमापन्नो न तत्तज्जातीयोचितं भुञ्जीतेत्यत आह।

क्लेशेति। संमूर्च्छितमेककालीभावमापन्नं धर्म्माधर्म्माभ्यां व्यवच्छेत्तुं वासनायाः स्वरूपमाह। ये संस्कारादिति औत्सर्गिकमेकभविकत्वं। क्वचिदपवदितुं भूमिकामारचयति। यत्खल्विति तु शब्देन वासनातो व्यवच्छिनत्ति दृष्टजन्मवेदनीयस्य नियतविपाकस्यैवायमेकभविकत्वनियमः नत्वदृष्टजन्मवेदनीयस्य किंभूतस्य नियतविपाकस्येति। हेतुं पृच्छति कस्मादिति। हेतुमाह योहीति। एकान्तावस्थितिमाह कृतस्येति। द्वितीयामाह प्रधानेति। तृतीयामाह नियतेति। तत्र प्रथमां विभजते तत्र कृतस्येति। संन्यासि कर्म्मभ्योऽशुक्लाकृष्णेभ्योन्यानिचीर्णस्यैव कर्म्मणः कृष्ण शुक्ल कृष्ण शुक्लानि तदिह तपः स्वाध्यायादिसाध्यः शुक्लकर्म्माशय उदित एवादत्तफलस्य कृष्णस्य नाशकः अविशेषाच्च शबलस्यापि कृष्णभाग योगादिति मत्वैवं तर्कयति भगवान् आचार्य मुदाहरति यत्रेदमिति। हे हे इह वेकजन्मनि कृष्णशुक्ले अपहन्तीति सम्बन्धः वीप्सया भूयिष्ठता सूचिता। कस्येत्यतआह पापकस्य

वा चिरमवस्थानं कथमिति अदृष्टजन्मवेदनीयस्यैव नियतविपाकस्य कर्मणः समानं मरणमभिव्यक्तिकारणमुक्तं न त्वदृष्टजन्मवेदनीयस्यानियतविपाकस्य यत्वदृष्टजन्मवेदनीयं कर्मानियतविपाकं तन्नश्येत आवापं वा गच्छेत् अभिभूतं वा चिरमप्युपासीत यावत् समानं कर्माभिव्यञ्जकं निमित्तमस्य विपाकाभिमुखं करोतीति

पुंसः कोसावसहन्तीत्यतआह एकीराशिः पुण्यकृतः समूहस्य समूहिसाध्यत्वात् तदनेन शुक्लकर्माशयस्तृतीय उक्त एतदुक्तं भवति ईदृशी नामायं परपीड़ादिरहित साधन साध्यः शुक्लकर्माशयः।यदैकोपि सन् कृष्णान् कृष्णशुक्लांश्चात्यन्तविरोधिनः कर्माशयान् भूयसोप्यपहन्ति,तत् तस्मादिच्छखेति,छान्दसत्वादात्मनेपदं शेषं सुगमम् अत्र च शुक्लकर्मोदयस्यैव स कोपि महिमायत इतरेषामभावो नतु स्वाध्यायादि जन्मनो दुःखात् नहिमात्र निर्बीज्य धर्मोपितुःस्वकार्य्य दुःख विरोधिन च स्वाध्यायादि जन्म दुःखं,तस्य कार्य्यं तत्कार्य्यत्वे स्वाध्यायादि विधानानर्थक्यात्तबलादेव तदुत्पत्तेः अनुत्पत्तौ वा कुम्भीपाकाद्यपि विधीयेत अविधाने, तदनुत्पत्तेरिति सर्व्वं चतुरस्र। द्वितीयां गतिं विभजते प्रधाने कर्मणि ज्योतिष्टोमादिके, तदङ्गस्य पशुहिंसादेरावापगमनं हे खलु हिंसादेः कार्य प्रधानाङ्गत्वेन विधानात्तदुपकारः; न हिंस्यात् सर्व्वाभूतानीति हिंसाया निषिद्धत्वादनर्थश्च तच्च प्रधानाङ्गत्वेनानुष्ठानाद प्रधान तैरेत्यतो न द्रागित्येव प्रधान निरपेक्षा सती स्वफलजननेऽसमर्थं प्रसातुमर्हति किन्त्वारब्ध विपाके प्रधाने साहायकमाचरती, व्यवतिष्ठते प्रधानसाहायक माचरन्नाश्च स्वकार्य्ये बीजमात्रतयावस्थानं प्रधाने कर्मणा वापगमनं यदेतदुक्तं पशुहिंसेन खल्वः संस्कारोज्योतीष्टोमादिजन्मनः प्रधानापूर्व्वस्य पशुहिंसादिजन्मनार्थः

तद्विपाकस्यैव देशकालनिमित्तानवधारणादियं कर्मगतिश्चित्रा दुर्विज्ञाना चेति न चोत्सर्गस्यापवादात् निवृत्तिरित्येकभविकः कर्माशयोनुज्ञायतइति ॥ १३ ॥

ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥ १४ ॥

हेतुना पूर्वेण सपरिहारः शक्योहि क्रियता प्रायश्चित्तेन परिहर्तुम् अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्म विपाक समयेच विपच्यते तथापि यावन्नसावनर्थं प्रसूते तावान् सप्रत्यवमर्षा मन्यन्ते हि पुण्यसञ्चारोपनीत सुखसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकां अतः कुशलस्य महतः पुण्यस्यनापकर्षाय प्रत्ययाय पर्याप्तः पृच्छति कस्मात् उत्तरं कुशलं हि मे बह्वन्यदस्ति प्रधान कर्मतया व्यवस्थितं दीर्घणीयादि दक्षिणान्तं यत्रायं सङ्करः 'स्वल्पः स्वर्गेप्यस्य फले सङ्कीर्णं पुण्यलभ्य जन्मनः स्वर्गात् सर्व्वथा दुःखेनापरामृष्टादपकर्षं मन्य मन्य दुःखसम्भेदं करिष्यतीति । दृतीयां गतिं विभजते नियतेति । बलीयस्त्वेनेह प्राधान्यमभिमतं नत्वक्षिप्तया बलीयस्त्वञ्च नियत विपाकत्वेनान्यदानवकाशत्वादनियत विपाकस्य तु दुर्ब्बलत्वमन्यदा सावकाशत्वात् चिरमवस्थानं बीजभावमावेद्य न पुनः प्रधानोपकारितया तस्य स्वतन्त्रत्वात् । ननु प्रायणैकदेव कर्माशयोभिव्यज्यत इत्युक्तमिदानीञ्च चिरावस्थानमुच्यते तत्कथं परं पूर्व्वेण न विरुध्यत इत्याशयवान् पृच्छति कथमिति । उत्तरम् अदृष्टेति । जात्यभिप्रायमेकवचनं तदितरस्य गतिमुक्तो मवधारयति यत्पदृष्टेति शेषं सुगमं उक्तं कृशमूलत्वं कर्मणः कर्ममूलत्वञ्च विपाकानां ॥ १३ ॥

ते जन्मायुर्भोगाः पुण्यहेतुकाः सुखफलाः अपुण्यहेतुकाः दुःखफला इति। यथाचेदं दुःखं प्रतिकूलात्मकं एवं विषयसुखकालेपि दुःख मस्त्येव प्रतिकूलात्मकं योगिनः ॥ १४ ॥

परिणामतापसंस्कार दुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥ १५ ॥

कथं तदुपपद्यते।—

अथ विपाकाः कस्य मूलं येनामीत्यपेक्षया इत्याह तेह्लादहेतुत्वात्। व्याचष्टे ते जन्मायुर्भोगा इति यद्यपि जन्मायुषोरेव ह्लादपरिताप पूर्वभाविनया तत्फलत्वं नतु भोगस्य ह्लाद परितापोदयानन्तरभाविनस्तदनुभवात्मनस्तथा व्यनुभाव्यतया भोग्यतया भोगकर्मतामाचेष्ट भोगफलत्वमिति मन्तव्यं नन्वपुण्यहेतुकाजात्यायुर्भोगाः परितापकलाभवन्तु हेयाः प्रतिकूल वेदनीयत्वात् कस्मात् पुनः पुण्यहेतवस्त्यज्यन्ते सुखफलाः अनुकूलवेदनीयत्वात् नचैषां प्रत्यात्मवेदनीयानुकूलता ग्रहा सहसे खाप्यनुमानागमैरपाकर्तुं नच ह्लादपरितापीपरस्परविनाभूती यतोह्लाद मुपादीयमाने परितापीप्यवर्जनीयतयापतेत् तयोर्भिन्नहेतुकत्वाद्भिन्नरूपत्वात् चेत्यत आह। यथाचेदमिति ॥१४॥

यद्यपि न पृथग्जनैः प्रतिकूलात्मतया विषयसुखकाले सह्येयते दुःखं तथापि सह्येयते योगिभिरिति प्रश्नपूर्वकं तदुपदानाय सूत्रमवतारयति। कथं तदुपपद्यत

सर्व्वस्यायं रागानुविद्धश्चेतनाचेतनसाधनाधीनसुखानुभवइति तत्रास्ति रागजः कर्म्माशयः तथाच इष्टि दुःखसाधनानि मुञ्चति चेति इषमोहकृतोप्यस्ति । तथाचोक्तं नानुपहत्य भूतान्युपभोगः सम्भवतीति हिंसाकृतोप्यस्ति शारीरः कर्म्माशय इति विषयसुखं चाविद्येत्युक्तम् । या भोगेष्विन्द्रियाणां तृप्तेरुपशान्तिः तत् सुखं या लौल्यादनुपशान्तिस्तद् दुखं । न चेन्द्रियाणां भोगाभ्यासेन वैतृष्ण्यं कर्त्तुं शक्यं कस्माद् यतो भोगाभ्यास मनुविवर्द्धन्ते रागाः कौशलानि चेन्द्रियाणामिति तस्मादनुपायः सुखस्य भोगाभ्यासइति स खल्वयं वृश्चिकविषभीतइवागौविषेण दष्टो यः

कृति । परिणामेत्यादि सूत्रं परिणामस्य तापस्य संस्कारस्य एतान्येव दुःखानि तरितः परिणामदुःखतया विषयसुखस्य दुःखतामाह । सर्व्वस्यायमिति न खलु सुखं रागानुविद्धमन्तरेण सम्भवति न चास्ति सम्भवो यत्र तत्र तस्मिन् तत्र तस्य सुखमिति रागस्य च प्रवृत्तिहेतुत्वात् प्रवृत्तेश्च पुण्यापुण्योपचयकारित्वात् तत्रास्ति रागज कर्म्माशयो सतीमुपजननात् तदाच सुखं भुञ्जानस्यव सतोपि विच्छिन्नावस्थेन द्वेषेण इष्टि दुःखसाधनानि तानि परिहर्त्तुमशक्तो मुञ्चति चेति इषमोहकृतोप्यस्ति कर्म्माशयः इषवन्मोहस्यापि विपर्य्ययापरनाम्नः कर्म्माशय हेतुत्वमविरुद्धं ननु कथं रक्तोद्दिष्टि मुञ्चति वा रागकाले इषमोहयोरदर्शनादित्यत आह । तथाचोक्तं विच्छिन्नावस्थान क्लेशानुपपादयन्नि रक्ताभिलषनेन वाङ्मनसः प्रवृत्तिजनयन्ती पुण्यापुण्ये दर्शिते इति रागादि जनयन्नः कर्त्तव्य मिदमिति मानसस्य संकल्पस्य साभिलाषत्वेन वाचनिकत्वस्याप्य विशेषात् । यथाहुः साभिलाषं सङ्-

सुखार्थो विषयाननुवासितो महति दुःखपङ्के मग्न इति। एषा परिणामदुःखता नाम प्रतिकूला सुखावस्थायामपि योगिनमेव क्लिश्नाति। अथ का तापदुःखता सर्व्वस्य द्वेषानुविद्धेतनाचेतनसाधनाधीनस्तापानुभव इति। तत्रास्ति द्वेषजः कर्म्माशयः सुखसाधनानि च प्रार्थ्यमानः कायेन वाचा मनसा च परिस्पन्दते ततः परमनुग्रहात्युपहन्ति चेति परानुग्रहपीड़ाभ्यां धर्म्माधर्म्मानुपचिनोति स कर्म्माशयो लोभान्मोहाच्च भवतीत्येषा तापदुःखतोच्यते। का पुनः संस्कारदुःखता। सुखानुभवात् सुखसंस्काराशयो दुःखानुभवादपि दुःखसंस्काराशय इति एवं कर्म्मभ्यो विपाके-

स्पीवाचार्यान्नातिरिच्यत इति। शारीरमपि कर्म्माशयं दर्शयति नानुपहत्येति अतएव धर्म्मशास्त्रकारा पञ्चमूना गृहस्थस्येत्याहुः स्यादेतत्र प्रत्यात्मवेदनीयस्य विषय सुखस्य प्रत्याख्यानमुचितं योगिनां अनुभव विरोधादित्यत आह। विषय सुखञ्चाविद्येत्युक्तम्। चतुर्विध विपर्य्यासलक्षणा मविद्या दर्शयन्निरिति नापातमात्रमपक्रियन्ते हठात् अस्ति खल्वापाततो मधुविषसंपृक्तान्नोपभोगेपि सुखानुभवः प्रत्यात्मवेदनीयः किन्त्वायत्यामसुख मियत्त्व दर्शिता भगवतैवेति। "विषयेन्द्रिय संयोगाद् यत्तदग्रेऽमृतोपमं। परिणामे विषमिव तत्सुखं राजसं स्मृतम्" इति। चोदयति यावो वेष्विति। नवयं विषयत्यागाद् सुखमातिष्ठामहे किन्तु हृष्यतां पुंसां तत्तद्विषय प्रार्थना परिक्लिष्ट चेतसां हृष्यैव महद्दुःखं नचेयमुपभोगमन्तरेण शाम्यति न चास्याः प्रशमोः रागाद्यनुविद्ध इति नास्य परिणाम दुःखता इति भावः हृषे तृष्णाक्षयाद्वैतीरिन्द्रियाणामुपशान्तिरप्रवर्त्तनं विषयेष्वित्यर्थः। तदेव व्यतिरेक सुखेन

ऽनुभूयमाने सुखे दुःखे वा पुनः कर्माशयप्रचय इति एवमिदमनादिदुःखस्रोतो विप्रसृतं योगिनमेव प्रतिकूलात्मकत्वादुद्वेजयति कस्मात् अग्निपात्रकल्पो हि विद्वानिति यथोर्णातन्तुरग्निपात्रे न्यस्तः स्पर्शेन दुःखयति नान्येषु गात्रावयवेषु एवमेतानि दुःखानि अग्निपात्रकल्पं योगिनमेव क्लिश्नन्ति नेतरं प्रतिपत्तारं इतरन्तु स्वकर्मोपहृतं दुःखमुपात्तमुपात्तं त्यजन्तं त्यक्तं त्यक्तमुपादद्दानं अनादिवासना विचित्रया चित्तवृत्त्या समन्ततोऽनुविद्धमिवाविद्यया हातव्य एवाहङ्कार ममकारानुपातिनं जातं जातं वाह्याध्यात्मिकोभयनिमित्तास्त्रिपर्वाणस्तापा अनुप्लवन्ते तदेव

स्पष्टयति या स्त्रीत्यादिति। परिहरति नचेन्द्रियाणामिति हेतावनीः प्रयोगस्तत्र दृष्टाश्रयःसुखमनवद्यं तस्य तु न भोगाभ्यासो हेतुरपितु दृष्टाया एव तादिरीधिन्याः यथाहुः—"न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय-वाभिवर्द्धत" इति। श्रेयसतिरोहितं तापदुःखतां पृच्छति अथ केति। उत्तरम् सर्व्वस्येति। सर्व्वजन प्रसिद्धत्वेन तत्स्वरूप प्रपञ्चमकृत्वातापदुःखतापि परिणामदुःखतासमतया प्रपञ्चिता इति संस्कार दुःखतां पृच्छति केति। उत्तरं सुखानुभव इति सुखानुभवोहि संस्कारमाधत्ते स च सुखरूपं तस्य रागं तच्च मनः कायवचन चेष्टां साच पुण्यापुण्यं ततो विपाकानुभवस्ततो वासनेत्येवमनादितेति अत्रच सुखदुःख संस्काराश्रयात् तत्स्वरूपं तस्माच्च रागद्वेषौ ताभ्यां कर्म्माणि कर्म्मभ्यो विपाक इति बीजना तदेव दुःखमीतःप्रसृतं योगिनमेव क्लिशाति नेतरं पृथक्जनमित्याह। एव मिदमनादि इति इतरं तु त्रिपर्वाणस्तापा अनुप्लवन्त इति सम्बन्धः अधिदैविकाधि-

मनादिदुःखस्रोतसाव्यूह्यमानमात्मानं भूतग्रामञ्चदृष्ट्वायोगी सर्व्वदुःखक्षयकारिणं सम्यग्दर्शनं शरणं प्रपद्यतइति गुणवृत्तिविरोधाच्च दुःखमेव सर्व्वं विवेकिनः। प्रख्याप्रवृत्तिस्थितिरूपा बुद्धिगुणाः परस्परानुग्रहतन्त्रीभूत्वा शान्तं घोरं मूढं वा प्रत्ययं त्रिगुणमेव वारभन्ते चलञ्च गुणवृत्तमिति चित्रपरिणामि चित्तमुक्तं रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्तेसामान्यानि तु प्रतिशयैः सह प्रवर्त्तन्ते एवमेते गुणा इतरेतराश्रयेणोपार्ज्जितसुखदुःखमोहप्रत्यया इति सर्व्वे सर्व्वरूपा भवन्ति गुणप्रधानभावकृतस्तेषां विशेष इति तस्मात् दुःखमेव सर्व्वं विवेकिन इति। तदस्य

भौतिकयोस्तापयोर्वाक्षत्वेनैकत्वं विवक्षितं चित्तवृत्तिस्तयाश्चातव्य एव वक्षोन्द्रिय शरीरादौ दारापत्यादौ चाहङ्कार ममकारानुपातिन मिति तदेव न सम्यग्दर्शनाद्-ज्ञत्वरिष्याच मक्षीत्याह। तदेवमिति तदेवमौपाधिकं विषय सुखस्य परिणामतः संस्कारतस्तापसंयोगाच्च दुःखत्वमभिधाय स्वाभाविक मादर्शयति गुणवृत्ति विरोधाच्चेति। व्याचष्टे। प्रख्याप्रवृत्ति स्थितिरूपा बुद्धिरूपेण परिणता गुणाः सत्वरजस्तमांसि परस्परानुग्रहतन्त्राः शान्तं सुखात्मकं घोरं दुःखात्मकं मूढं विषादात्मकमेव प्रत्ययं सुखोपभोगरूपमपि त्रिगुणं प्रारभन्ते नच सोपि तादृशरूपोस्य परिणामः स्थिर इत्याह। चलञ्च गुणवृत्तमिति चित्रपरिणामि चित्तमुक्तं नानेकप्रत्ययः कथं परस्परविरुद्ध शान्तघोरमूढत्वान्नैकदा प्रतिपद्यत इत्यत आह रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुद्धन्ते सरूपाश्चेदी भावा धर्म्मादयो हेतवः सुखाद्यात्मदिह शरीरे च विपच्यमानेनाधर्म्मेणादृष्टो विरुध्यते एवं शान्तवैराग्यैश्वर्य्यैः सुखादिभिश्च

महतो दुःखसमुदायस्य प्रभववीजमविद्या तस्याश्च सम्यग्दर्शनमभावहेतुः । यथा चिकित्साशास्त्रं चतुर्व्यूहं । रोगो रोगहेतुरारोग्यं भैषज्यमिति एवमिदमपि शास्त्रं चतुर्व्यूहमेव । तद्यथा संसारः संसारहेतुः मोक्षो मोक्षोपाय इति । तत्र दुःखबहुलः संसारो हेयः प्रधानपुरुषयोः संयोगोहेयहेतुः संयोगस्यात्यन्तिकी निवृत्तिर्हानं हानो-

तादृशान्येव तद्विपरीतानि विरुध्यन्ते सामान्यानि त्वसमुदाचरद्रूपाणि अतिशयैः समुदाचरद्भिः सहाविरोधात् प्रवर्त्तन्ते इति ननुगृह्णीमएतत्तथापि विषय सुखस्य कुतः स्वाभाविकी दुःखतेत्यत आह एवमेत इति उपादानाभेदादुपादानात्मकत्वाद्धेयोपादेयस्वाभ्यभेद इत्यर्थः तत्किमिदानीमात्यन्तिकमेव तादात्म्यं तथाच बुद्धिव्यपदेश्यभेदौ न कल्पेते इत्यत आह गुणप्रधानेति सामान्यात्मना गुणभावोऽतिशयात्मना च प्राधान्यं तस्मादुपाधितः स्वभावतश्च दुःखमेव सर्व्वं विवेकिन इति दुःखं चार्य प्रज्ञावता नच तन्निदानं ज्ञानमन्तरेण तद्धेयं वितुमर्हति नचापरिज्ञातं निदानं शक्यं हातुमिति मूलनिदानमस्य दर्शयति । तदस्येति दुःखसमुदायस्य प्रभव उत्पत्ति र्यततद्वीजमित्यर्थः तदुच्छेदहेतुं दर्शयति तस्याश्चेति । इदानीमस्य शास्त्रस्य सर्व्वानुग्रहार्थं प्रवृत्तस्यैतद्विधेनैव शास्त्रेण सादृश्यं दर्शयति । यथेति चत्वारोव्यूहाः संविज्ञावयवरचना यस्य तत् तथोक्तम् । ननु दुःखं हेयमुक्ता संसारं हेयम् अभिदधतः कुतो न विरोध इत्यत आह । तच्च दुःखबहुलं इति । यत् कृत्वा अविद्या संसारं करोति तदस्या अवान्तरव्यापारं संसारहेतुमाह । प्रधान पुरुषेति । मोक्षस्वरूपमाह । संयोगस्येति । मोक्षोपाय इति केचित् पठन्ति हातुः स्वरूप उच्छेद एव मोक्षः यथाहुः प्रदीपस्येव निर्व्वाणं विमोक्षस्तस्य चेतस इति अन्ये तु न भावनाप्रसमुच्छादितस्य विज्ञानस्योत्पाद एव मोक्ष इत्याचक्षते तान् प्रत्याह नवेति ।

पायः सम्यग्दर्शनं। तत्र हातुः स्वरूपं उपादेयं त्वेयं वा न भवितुमर्हति इति। हाने तस्योच्छेदवादप्रसङ्गः उपादाने च हेतुवादः। उभयप्रत्याख्याने शाश्वतवाद इत्येतत् सम्यग्दर्शनं तदेतच्छास्त्रं चतुर्व्यूहमित्यभिधीयते ॥ १५ ॥

हेयं दुःखमनागतं ॥ १६ ॥

दुःखमतीतमुपसञ्भोगेनातिवाहितं न हेयपक्षे वर्त्तते वर्त्तमानञ्च स्वक्षणेभोगारूढ़मिति न तत्क्षणान्तरे हेयतामापद्यते तस्मात् यदेवानागतं दुःखं तदेवाच्छिन्नपात्रकल्पं योगिनं क्लिश्नाति नेतरं प्रतिपत्तारं तदेव हेयतामापद्यते तस्मात् यदेव हेयमिति उच्यते तस्येव कारणं प्रतिनिर्दिश्यते ॥ १६ ॥

तत्र हानं तावदूषयति। हानेतस्येति नहि भीरुवान् कश्चिदात्मोच्छेदाय यतते। ननुदृश्यन्तेतीव्रमदीन्मूर्खितसफलसुखां दुःखमयीमिवमूर्त्तिं सुहृल्लः स्वोच्छेदाय यतमानाः सत्यं कैश्चिदेव तेन त्वेवं संसारिणोविविध विचित्र देवाद्यनन्दभोग भागिन सेपि च भीरुभावा दृश्यन्ते तस्मादपुरुषार्थत्व प्रसङ्गेन हातुः स्वरूपोच्छेद भीरुभ्यूवेयः। अस्तुतर्हि हातुः स्वरूपमुपादेय मित्यत आह। उपादानेच हेतुवादः उपादाने हि कार्य्यत्वेनानित्यत्वे सति भीरुत्वादेव च्यवेत् अच्यती हि भीरुः नापि विच्छेदो विज्ञान सन्तानो भवत्यतः सन्तानिभ्यो व्यतिरिक्तस्य सन्तानस्य वस्तुसतीऽभावात् सन्तानिनां चानित्यत्वं तस्मात् तथा यतितव्यं यथा शाश्वतवादी भवति॥१५॥

तस्माच्च पुरुषार्थता शास्त्रस्य हेयाद्द उभय प्रत्याख्यान इति। तस्मात् स्वरूपा-

द्रष्टृदृश्ययोः संयोगो हेयहेतुः ॥ १७ ॥

द्रष्टा बुद्धेः प्रतिसंवेदी पुरुषः दृश्या बुद्धिसत्त्वोपारूढा सर्वे धर्माः तदेतद् दृश्यमयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वभवति पुरुषस्य दृग्रिरूपस्य स्वामिनः। अनुभवकर्म्मविषयता मापन्नमन्यस्वरूपेण प्रतिलब्धात्मकं स्वतन्त्रमपि परार्थत्वात् परतन्त्रं उभयोर्दृग्दर्शनशक्तोरनादिरर्थकृतः संयोगो हेयहेतुर्दुःखस्य कारणमित्यर्थः। तथा

वस्यानमेवात्मनो भवति एतदेव सम्यग्दर्शनं तदेतच्छास्त्रं चतुर्व्यूहमभिधीयते। हेयं दुःखमनागतम्। अनागतमित्यतीतवर्त्तमाने व्यवच्छिन्ने। तत्रोपपत्तिमाह दुःखमतीतं इति। ननु वर्त्तमानमुपभुज्यमानं न भोगेनातिवाहितमिति कथमत्र हेयमित्यत आह। वर्त्तमानश्चेति सुगमम् ॥ १६ ॥

हेयमुक्तं तस्य निदानमुच्यते। द्रष्टृदृश्ययोः संयोगो हेयहेतुः। दृष्टृस्वरूपमाह। द्रष्टेति चितिच्छायापतिते बुद्धिप्रतिसंवेदिलमुदासीनस्यापि पुंसः। नन्वेतावतापि बुद्धिरेवानेन दृश्येत शब्दादयोत्यन्तव्यवहिता इत्यत आह। दृश्याबुद्धिसत्त्वेति इन्द्रियप्रणालिकया बुद्धौ शब्दाद्याकारेच परिणतायां दृश्यायां भवन्ति शब्दादयोपि धर्माद्दृश्या इत्यर्थः। ननु तदाकारापन्ना बुद्धिः शब्दाद्याकारा भवतु पुंसस्तु बुद्धिसत्त्वमेव्युपगमक्षमाने परिणामित्वं असत्त्वे वा कथं तेषां बुद्धिसत्त्वोपारूढानामपि शब्दादीनां दृश्यत्वं नहि दृशिना संसृष्टं दृष्टमित्यत आह। तदेतद् दृश्यमिति प्रपञ्चितमिदमस्माभिः प्रथमपाद एव यथा चित्या संपृक्तमपि बुद्धिसत्त्वमत्यन्तस्वच्छतया चिति विम्बोद्ग्राहितया समापन्नं चैतन्यमिव शब्दाद्यनुभवतीति अत एव

चौक्तं तत्संयोगहेतुविवर्जनात् स्यादयमात्यन्तिको दुःख प्रतिकारः कस्मात् दुःखहेतोः परिहार्यस्य प्रतीकारदर्शनात् तद्यथा पादतलस्य भेद्यता कण्टकस्य भेत्तृत्वं परिहारः कण्टकस्य पादानधिष्ठानं पादत्वाव्यवच्छिन्नेन वाधिष्ठानमेतत् एवं योवेद लोके स तत्र प्रतीकारमारभमाणो भेदजं दुःखं नाप्नोति कस्मात् चित्वोपलब्धिसामर्थ्या-

ब्रह्माद्याकारपरिणत बुद्धिसत्वोपनीतान् सुखादीन् भुञ्जानः स्वामी भवति द्रष्टा तादृक् चासौ बुद्धिसत्वं सम्भवति। तदेतद्बुद्धित्वं ब्रह्माद्याकारबहुत्वमयत्वान्न त्रिकल्पं पुरुषस्य सम्भवति दृशिरूपस्य स्वामिनः कथमनुभवकर्मविषयतामापन्नं यतः अनुभवीभोगः पुरुषस्य कर्मक्रिया तद्विषयता भुज्यमानता मापन्नं यस्मादतः सम्भवति। ननु स्वयं प्रकाशं बुद्धिसत्वं स्यात् कथमनुभवविषयं इत्यत आह। अन्य स्वरूपेणेति। यदि हि चैतन्यरूपं वस्तुतो बुद्धिसत्वं स्यात् भवेत् स्वयं प्रकाशं किन्तु स्वं चैतन्यादन्यज्जड़रूपंतेन प्रतिलब्धात्मकं तस्मात्तदनुभवविषयः। ननु यस्य हि यत्र किञ्चिदापतते तत्तदधीनं नच बुद्धिसत्वस्य पुरुषमुदासीनं प्रति किञ्चिदापतत इति। कथमेतत् तन्त्रं तथाच न तस्य कर्मेत्यत आह। स्वतन्त्रमपि परार्थत्वात् पुरुषार्थत्वात् परतन्त्रं पुरुषतन्त्रम्। नन्वयं दृग्दर्शनशक्तीः सम्बन्धः स्वाभाविकीवा स्यान्नैमित्तिकी वा स्वाभाविकत्वे सम्बन्धिनो नित्यत्वादयमपीच्छेदः सम्बन्धः तथाच संसारनित्यत्वं नैमित्तिकत्वे तु क्लेशकर्म तदाश्रयाभाव:करणशक्तितया सत्वन्त:करणे भावादन्त:करणस्य च तन्निमित्तत्वे परस्परात्रयप्रसङ्गादनादित्वञ्च सर्गादावसम्भवादनुत्पाद एव संसारस्य स्यात्। यथोक्तं "पुमानकर्त्ता येषां तु तेषामपि बुद्धेः क्रिया। कथमादौ भवेत्तस्य कर्म तावन्न विद्यते॥ मिथ्याज्ञानं न तत्त्वज्ञि

स्थिति । तथापि तापकस्य रजसः सत्वमेव तप्यं । कस्मात् तपिक्रियायाः कर्म्मस्थत्वात् सत्वे कर्म्मणि तपिक्रियायां परिणामिनि निष्क्रिये चेतसे दर्शितविषयत्वात् सत्वे तु तप्यमाने तदाकारानुरोधी पुरुषोऽनुतप्यत इति दृश्यते दृश्यरूपमुच्यते ॥ १७ ॥

रागद्वेषादयोपि वा । मनोवृत्तिर्हिसर्व्वेषां नचोत्पन्नं मनसदेति'शङ्कामपनयति तयोः दृग्दर्शनशक्त्योः रूपादिरयैक्रतः संयोगोहेयहेतुः सत्वं न स्वाभाविकस्तु न बन्धोनैमित्तिकस्तु नचैवमादिमान् अनादिनिमित्तप्रभवतया तस्याप्यनादित्वात् क्लेशकर्म्म वासना सन्तानस्य मनादिःप्रतिसर्गावस्थायां च सङ्घात्यकारणेन प्रधान साम्यमुपगतोपि सर्गादौ पुनस्तादृगेव प्रदुर्भवति वर्षाषाय इव चक्रिञ्जभेदोऽभावमुपगतोपि पुनर्वर्षासु पूर्वरूप इत्यसकृदावेदितं प्राग्भावितया संयोगस्याविद्याकारत्व स्थितिहेतुतया पुरुषार्थ कारत्वं तदर्थेन तस्य स्थितेस्तदिद मुक्तमर्थ कृतं इति । तथाचोक्तं पञ्चशिखेन तस्यसंयोगः बुद्धि संयोगः स एव हेतुः दुःखस्य तस्य विवर्जनात् स्वादयमात्यन्तिकी दुःखप्रतीकारः अर्थात्तदपरिवर्जने दुःखमित्युक्तं भवति । तत्रैवात्यन्त प्रसिद्धं निदर्शनमाह । तद्यथेति । पादत्राणमुपानत् । स्यादेतद्धि यसंयोगस्यापहेतुरित्युच्यमाने गुणानां तापकत्व मभ्युपेतं न च तपिक्रियाया अस्यादेरिव कर्मणोभावो येन तप्यमत्वमापद्येत न चास्यास्तप्यतया पुरुषः 'कर्म्म वस्यापरिणामितया क्रियाजनित फलशालित्वायोगा तस्मात् स्वपेक्षस्य व्यापस्य तन्निवृत्तौ निवृत्ति मवलक्षामः । व्यक्तेन विरहेणैव धूमाभाव मित्यत आह ।

अत्रापि तापकस्येति गुणानामेव तप्यतापकभावस्तत्र स्वदुत्वात् पादतलवत् सत्वं तप्यं रजस्तु तीव्रतया तापकं पृच्छति । कस्मात् सत्वमेव तप्यं न तु पुरुषः ।

प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥ १८ ॥

प्रकाशशीलं सत्वं क्रियाशीलं रजः स्थितिशीलं तम इति एते गुणाः परस्परोपरक्तप्रविभागाः परिणामिनः संयोगविभागधर्माणः इतरेतरोपाश्रयेणोज्जितमूर्त्तयः परस्परांगांगित्वे प्यसंभिन्नशक्तिप्रविभागास्तुल्यजातीयाऽतुल्यातीयशक्तिभेदानुपातिनः। प्रधानवेलायामुपदर्शितसन्निधानागुणत्वेपि च व्यापारमात्रेण प्रधानान्तर्गीतानुमितास्ति

उत्तरं। तपिक्रियाया इति तत् किमिदानीं पुरुषो न तप्यते तथाचाचेतनस्यापि सत्वस्य तापः किं नच्छिन्नमित्यत आह। दर्शित विषयत्वात् सत्वे तु तप्यमाने तदाकारानुरोधी पुरुषोप्यनुतप्यत इति दर्शितविषयत्वमनुतापहेतुत्वंच प्राग्व्याख्यातम्। १७।

दृश्यं व्याचष्टे। प्रकाशेति। सत्वस्य हि भागः प्रकाशस्तामसेन भागेन दैन्येन वा राजसेन वा दुःखेनानु रज्यते एवं राजसादिष्वपि द्रष्टव्यं तदिदमुक्तं परस्परोपरक्तप्रविभागा इति। पुरुषेण सहसंयोगधर्माणः। यथाम्नायते "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजोह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः" इति इतरेतरोपाश्रयेणोपजिता मूर्त्तिः पृथिव्यादिरूपा येषां तथोक्ताः। स्यादेतत् सत्वेन शान्तप्रत्यये जनयितव्ये रजस्तमसोरपि सत्वसङ्गित्वेन तत्र हेतुभावादस्ति सामर्थ्यमिति यद्यपि च रजस्तमसोरङ्गित्वं तदापि शान्तएवप्रत्ययउदीयेत न घोरमूढौ वा सत्वप्राधान्यहेत्वेत्यतआह। परस्परांगांगित्वेप्यसंभिन्नशक्तिप्रविभागाः

42122

वाः पुरुषार्थकर्त्तव्यतया प्रयुक्तसामर्थ्याः सन्निधिमात्रोपकारिण्योऽयस्कान्तमणिकल्पाः प्रत्ययमन्तरेण एकतमस्य वृत्तिमनुवर्त्तमानाः प्रधानशब्दवाच्या भवन्ति। एतद् दृश्यमित्युच्यते। तदेतद्गुणेन्द्रियात्मकं भूतभावेन पृथिव्यादिना सूक्ष्मस्थूलेन परिणमते तथेन्द्रियभावेन श्रोत्रादिना सूक्ष्मस्थूलेन परिणमतइति। तत्तु नाप्रयोजनं अपितु प्रयोजनमुररीकृत्य प्रवर्त्ततइति भोगापवर्गार्थं हि तदृश्यंपुरुषस्येति तत्रेष्टानिष्टगुणस्वरूपावधारणं अविभागापन्नं भोगोभोक्तुः स्वरूपावधारणमपवर्ग इति द्वयोरतिरिक्तमन्यदृश्यम्

भवतु शान्ते प्रत्यये जनयितव्ये रजस्तमसी रङ्गभावस्तथापि नैषां शक्तयः सङ्कीर्यन्ते कार्यासङ्करो यौहि शक्तीनामसंभेदं इति स्यादेतदसंभेदश्चेत् शक्तीनां न सम्भूयकारित्वं गुणानां न जातु भिन्नशक्तीनां सम्भूयकारित्वं दृष्टं न हि तन्तु स्त्यिरुद वीरणादिनि घटादीन् सम्भूय कुर्वत इत्यत आह। तुल्यजातीया तुल्यजातीय शक्तिभेदानुपातिनी यद्यपि तुल्यजातीये उपादान शक्तिः नान्यत्र सहकारि शक्तिस्त्वतुल्यजातीयेषटे तु जनयितव्ये न वीरणानामस्ति सहकारि शक्तिरपीति न ते तन्तूनां सम्भूयकारितेति भावः तुल्यजातीयातुल्यजातीयेषु शक्तिषु ये शक्तिभेदास्तानतुपतितुं शीलं येषां ते तथोक्ताः प्रधानवेलायामिति।

दिव्यशरीरे जनयितव्ये सत्वगुणः प्रधानमङ्गे रजस्तमसी। एवं मनुष्यशरीरे जनयितव्ये रजः प्रधानमङ्गे सत्वतमसी। एवं तिर्यक्शरीरे जनयितव्ये तमः प्रधानमङ्गे सत्वरजसी। तेनैते गुणाः प्रधानत्ववेलायामुपदर्शित सन्नि। ाधाकार्यापजननं प्रत्युद्भूत हत्तय इत्यर्थः प्रधानशब्दश्च भाव प्रधानः यथा वेद-

नास्ति। तथाचोक्तं अयन्तु खलु त्रिषु गुणेषु कर्तृष्वकर्त्तरि च पुरुषे तुल्यातुल्यजातीये चतुर्थे तत्क्रियासाक्षित्वमुपनीयमानान् सर्व्वभावानुपपन्नानुपश्यन्नदर्शनमन्यत्वङ्गतइति। तावेतौ भोगापवर्गौ बुद्धितन्त्रतौ बुद्धावेव प्रवर्त्तमानौ कथं पुरुषेऽपदिश्येते इति। यथा विजयः पराजयो वा योद्धृषु वर्त्तमानः स्वामिन्यपदिश्यते स हि तस्य फलस्य भोक्तेति एवं बन्धमोक्षौ बुद्धावेव वर्त्तमानौ पुरुषेऽपदिश्येते स हि तत्फलस्य भोक्तेति। बुद्धेरेव पुरुषार्थापरिसमाप्तिर्व्वन्ध्यस्तदर्थावसायो मोक्षइति एतेन ग्रहणधारणोहापोहतत्त्वज्ञानाभिनिवेशा बुद्धौ वर्त्तमानाः पुरुषेऽध्यारोपितसद्भावाः स हि तत्फलस्य भोक्तेति। दृश्यानां तु गुणानां स्वरूपभेदावधारणार्थमिदमारभ्यते ॥ ॥ १८ ॥

कर्यीहि वचनैकवचन इत्यत्र विलेकत्वयोरिति। अन्यथा द्वयोरेषिति स्यात्। ननु तदा प्रधान सुप्तनया अक्षमस्तीति वक्तुमनुद्भूतानान्तु तदङ्गानां सद्भावे किं प्रमाणं इत्यत आह। गुणत्वेपीचेति। यद्यपि नोद्भूतास्तथापि गुणानामविवेक्तित्वात् संभूयकारित्वाच्च व्यापारमात्रे च सहकारितया प्रधाने अन्तर्भावितं सदनुमितमस्तित्वं येषां ते तथोक्ताः। ननु सन्तु गुणाः संभूयकारिणः समर्थाः कस्मात् तत् पुनः कुर्व्वन्ति न हि समर्थं मित्येव कार्यं जनयति माभूदस्य कार्य्योत्पत्तेरप्रतिविरामः इत्यत आह। पुरुषार्थ कर्त्तव्यतयेति। ततो निर्व्वर्त्तित निखिल पुरुषार्थानां गुणानामुपरमः कार्य्यानारम्भं इत्युक्तं भवति। ननु पुरुषस्यानुप-

विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्व्वणि ॥ १९ ॥

तत्राकाशवायुग्न्युदकभूमयो भूतानि शब्दस्पर्शरूपरसगन्धतन्मात्राणामविशेषाणां विशेषाः तथा श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि बुद्धीन्द्रियाणि। वाक्पाणिपादपायूपस्थानि कर्म्मेन्द्रियाण्येकादशं मनः सर्व्वार्थमित्येतान्यस्मितालक्षणस्याविशेषस्य विशेषा गुणानामेष षोड़शकोविशेषपरिणामः

कुर्वतः कर्त्तुं पुरुषार्थेन प्रयुज्यत इत्यत आह सन्निधिमात्रेति ननु धर्म्माधर्म्मौ लक्षयत एव निमित्तं प्रयोजकं गुणानां तत् किमुच्यते पुरुषार्थं प्रयुक्ता इत्यत आह प्रत्यक्षमन्तरेणेति। एकतमस्य सत्वस्य रजसस्तमसो वा प्रधानस्य स्वकार्य्ये प्रवृत्तस्य इत्थमित रेप्रत्ययं निमित्तं धर्म्मादिकं विनैवानुवर्त्तमाना यथाच वर्त्तते निमित्तमप्रयोजकं प्रकृतीनां रवणभेदस्तु ततः चैत्रिकवदिति एते गुणाः प्रधान शब्दवाच्या भवन्तीति सत्त्वस्य: प्रधीयते आधीयते विश्वं कार्य्यमेभिरिति व्युत्पत्त्या एतद्रूप मुच्यते। तदेवं गुणानां श्रीखमभिधाय तस्य कार्य्यमाह तदेतदिति। सत्कार्य्य वादिनौ यद्यदात्मकं तत्तेन रूपेण परिणमत इति भूतेन्द्रियात्मकत्वं दीपयते भूतभावेनेत्यादिना भोगापवर्गार्थमिति सूत्रावयवमवतारयति। तत्तु नाप्रयोजनमपितु प्रयोजनमुररीकृत्य प्रवर्त्तते भोगं विदधीति तत्रेति। सुखदुःखेति त्रिगुणाया बुद्धेः स्वरूपे तस्यास्तथात्वेन परिणामात् तथापि गुणगततया अवधारणेन भोग इत्यत आह अविभागापन्नमिति एतच्चासङ्गविवेचितं। अपवर्गं विदधीति, भोक्तुरिति। अपहन्यतेनेनेत्यपवर्गः प्रयोजनान्तरस्याभावमाह। इतीरिति।

षड् विशेषाः। तद्यथा शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रं चेत्येकद्वित्रिचतुःपञ्चलक्षणाः शब्दादयः पञ्चाविशेषाः षष्ठश्चाविशेषोऽस्मितामात्र इति एते सत्तामात्रस्यात्मनो महतो षड्विशेषपरिणामाः यत्तत्परमविशेषेभ्यो लिङ्गमात्रं महत्तत्त्वं तस्मिन्नेते सत्तामात्रे महत्यात्मन्यवस्थाय विद्वद्विकाष्ठामनुभवन्ति प्रसंख्यायमानाश्च तस्मिन्नेव सत्तामात्रे महत्यात्मन्यवस्थाय यत्तन्निः

तथाधीतं पञ्चशिखेन अयन्तु खल्विति ननु वस्तुतो भोगापवर्गौ बुद्धिकृतौ बुद्धिवर्त्तिनौ च कथं तदकारके तदनधिकरणे च पुरुषेऽपदिश्येते इत्यत आह। तावेताविति भोक्तृत्वञ्च पुरुषस्योपादितसये च वक्ष्यते परमार्थतस्तु बुद्धेरेव पुरुषार्थापरिसमाप्तिरिति एतेन भोगापवर्गयोः पुरुषसम्बन्धित्व कथनमार्गेण ग्रहणादयोपि पुरुष सम्बन्धिनो वेदितव्याः तत्र स्वरूपमात्रं चार्थज्ञानं ग्रहणं तच्च स्मृतिधारणं तद्वतानां विशेषाणां मूढन मूढः समारोपितानाञ्च युक्त्यापनयोऽपोहः ताभ्यामेवोहापोहाभ्यां तदवधारणं तत्त्वज्ञानं तत्त्वावधारणं पूर्वं हानोपदानमभिनिवेशः दृश्यानां गुणानां स्वरूप भेदावधारणार्थं मिदमारभ्यते। येषामविशेषाणां शान्त घोर मूढ़लक्षण विशेषरहितानां ये विशेषा विकार एव न तु तत्त्वान्तर प्रकृतयस्तेषां तानाह। तत्राकाशेति। उत्पाद क्रमानुरूप एवोपन्यास क्रमः अस्मिता लक्षणस्याविशेषस्य सत्वप्रधानस्य बुद्धीन्द्रियाणि विशेषा रजसस्तु कर्मेन्द्रियाणि मनस्तूभयात्मक मुभयप्रधानमिति मन्तव्यं अत्र च पञ्चतन्मात्राणि बुद्धि कारणकाण्यविशेषत्वादस्मितावदिति विकार हेतुत्वाविशेषत्वं तन्मात्रेषु चास्मितामात्र अवशिष्टं संकलय्यावशेषान् परिगणयति। गुणानामेषामिति। अविशेषा-

सत्तासत्तं निःसदसद्विरसदव्यक्तं मलिङ्गं प्रधानं तत्प्रकृतिं यन्तीति । एष तेषां लिङ्गमात्रः परिणामो निःसत्तासत्ता-ऽलिङ्गपरिणाम इति । अलिङ्गावस्थायां न पुरुषार्थो हेतुर्नालिङ्गावस्थायामादौ पुरुषार्थता कारणं भवतीति न तस्याः पुरुषार्थताकारणं भवतीति नासौ पुरुषार्थं कृतेति नित्याख्यायते त्रयाणां त्ववस्थाविशेषाणामादौ पुरुषार्थता

नपि मन्यति पठति । सङ्ख्यथीदाहरति तदयमेति विशिष्टं त्वपरं परमेति तस्य आत्मना पञ्चलक्षणः रस आत्मना चतुर्लक्षणः रूपं आत्मना त्रिलक्षणं स्पर्शं आत्मना द्विलक्षणः शब्दः शब्दलक्षण एवेति कस्य पुनः अमी जडविशेषाः कार्यमित्यत आह । एते सत्तामात्रस्वात्मनइति । पुरुषार्थं क्रियाचर्मं सत्तस्य भावः सत्तातत्त्वं तत्त्वत्वं यावती काचित् पुरुषार्थक्रिया शब्दादि भोग लक्षणा सत्व पुरुषान्यता ख्याति लक्षणा वा अलिङ्गा सर्व्वा महति बुद्धौ समाप्यत इत्यर्थः आत्मन इति स्वरूपोपदर्शनेन तुच्छत्वं निषेधति प्रकृतेरयमाद्यः परिणामो वासनो नतु तद्विवर्त्त इति यावत् यत्तत्परं विप्रकृष्ट कालमविशेषेभ्यस्तदपेक्षया सन्निकृष्ट कालेभ्यो लिङ्गमात्रं महत्तत्वं तस्मिन्नैते जडविशेषाः सत्तामात्रे महत्यात्मन्यवस्थाय सत्कार्य्य वाद सिद्धे र्व्यवहिताष्टामनु भवन्ति प्राक्तनवन्ति । ये पुनरविशेषाणां विशेष परिणामा येषाञ्च धर्म्मलक्षणावस्था परिणामाइति तेयमेषां विप्रकृष्ट काष्टा परिणाम काष्ठेति तदेव सृष्ट्युत्तिक्रम मभिधाय प्रलय क्रममाह प्रतिसंचरन्त्य-माना प्रतीयमाना स्वात्मनि लीनविशेषा अविशेषा लिङ्गेन्द्रिये सत्तामात्रे महत्या-त्मन्यवस्थाय निलीय सहैव महता तेऽविशेषाः अव्यक्त मन्यच्च स्वं न गच्छतीत्य-लिङ्गं प्रति यन्ति तस्मैव विशेषवं निःसत्ताः सन्तं सत्तापुरुषार्थं क्रियाचर्मत्वं

कारणं भवति स चार्थोहेतुर्निमित्तकारणं भवतीत्यनित्या-
ख्यायते। गुणास्तु सर्व्वधर्म्मानुपातिनो न प्रत्यस्तमयं तेनो
पजायन्ते व्यक्तिभिरेवातीतानागतव्ययागमवतीभिः गुणा-
स्त्रयिणीभिरुपजननापायधर्म्मकाइव प्रत्यवभासन्ते यथा
देवदत्तोदरिद्राति कस्मात् यतोस्य म्रियन्ते गावइति गवामेव
मरणात्तस्य दरिद्राणं न स्वरूपहानादिति समः समाधिः
लिङ्गमात्रमलिङ्गस्य प्रथमजं तत्र तत् संसृष्टं विविच्यते
क्रमानतिवृत्तेः तथा षड्विशेषा लिङ्गमात्रे संसृष्टा विवि-
च्यन्ते परिणामक्रमनियमात् तथा तेष्वविशेषेषु भूतेन्द्रियाणि

असत्ता तुच्छता निष्क्रान्त सतस्तया असत्तायाश्च यत्सत्त्वोक्तं एतदुक्तं भवति सत्त्व-
रजस्तमसां साम्यावस्थानं क्वचित् पुरुषार्थं उपयुज्यते इति न सर्वेषामपि सगचक्र-
निष्ठानां वस्तुतश्च स्वभावो तेन नासत्त्वापीति। स्यादेतदव्यक्तावस्थायामप्य स्ति
सदादि तदात्मना नहि सती विनाशो विनाशे वा न मुलकत्वादो नश्यत उत्पाद
इति। सदादि सद्भावात् पुरुषार्थ क्रिया प्रवर्त्तेत तत् स्वयं निःसत्त्वमव्यक्त मित्यत
आह। निःसदसदिति। निःक्रान्तं कारणं सतः कार्य्यात् यद्यपि कारणावस्थायां
सदेव तत्त्वात्मना कार्य्यं तथापि स्त्रीचितामर्थक्रियामकुर्व्वदसदिव्युक्तं नचैतत् कारणं
प्रसविधात्र्यायमान कार्य्यमित्याह। निरसदिति। निष्क्रान्तं असतस्तुच्छरूपात्
कार्य्यात् तथा सति हि व्योमारविन्दसिद्धिप्रसङ्गात् न कार्य्यमुत्पद्यते इति भावः प्रति
सर्गमुक्त मुपसंहरति। एतेषामिति एष इत्यनन्तरोक्तात् पूर्व्वस्य परामर्षः लिङ्ग-
मात्रावस्था पुरुषार्थ कृतत्वा दनित्या अलिङ्गावस्थातु पुरुषार्थेनाकृतत्वान्नित्येत्यत्र
हेतुमाह। अलिङ्गावस्थायामिति कस्मात्पुनर्न पुरुषार्थो हेतु रित्यत आह ना-

संसृष्टानि विविच्यन्ते। तथाचोक्तम् । पुरस्तात्रविशेषेभ्यः परं तत्वान्तरमस्तीति विशेषाणां नास्ति तत्वान्तरपरिणामस्तेषान्तु धर्म्मलक्षणावस्था परिणामा व्याख्यास्यन्ते ॥ १८ ॥

व्याख्यातं दृश्यम्। अथ दृष्टुः स्वरूपावधारनार्थं मिदमारभ्यते—

द्रष्टा दृशिमात्रः शुद्धोपि प्रत्ययानुपश्यः॥२०॥

दृशिमात्र इति। दृक्शक्तिरेव विशेषणापरामृष्टेत्यर्थः। स पुरुषो बुद्धेः प्रतिसंवेदी सबुद्धेर्न स्वरूपो नात्यन्तं विरूपइति न तावत् स्वरूपः कस्मात् ज्ञाताज्ञात-

क्तिरवस्थायामिति भवति नाविषयेन विषयिज्ञान मुपलक्षयति। एतदुक्तं भवति एवं हि पुरुषार्थता कारण मलिङ्गावस्थायां ज्ञायते यदलिङ्गावस्था शब्दादुपभोगं वा स्वपुरुषान्यता ख्यातिं वा पुरुषार्थं निवर्त्तयेत् तन्निवर्त्तने हि न साम्यावस्थात् तस्मात् पुरुषार्थं कारणत्व मस्या न ज्ञायत इति नास्याः पुरुषार्थता हेतुः। रूपसंहरति नास्याविति। इति खु स्वार्थे। अनित्यामवस्थामाह। त्रयाणां लिङ्गमात्राविशेषाविशेषाणामिति। पूर्व्वं स्वरूपं दर्शयित्वा गुण स्वरूपमाह। गुणास्त्रिति। निदर्शनमाह यथा देवदत्त इति। यद्यात्मा भिन्नानां गवामुपचयापचयौ देवदत्तोपचयापचयहेतुः तव कैव कथा गुणेभ्योऽभिन्नानां व्यक्तीना मुपजनापायधर्मिणीत्यर्थः। नन्वु सर्गक्रमः किमनियतो नेत्याह। लिङ्गभावमिति न खलु त्रयोधधानां मध्येक त्रयोध ज्ञास्निं स्नान्दं ज्ञातुं दक्षवटित्व ज्ञाखाकाक्ष निपीत मात्रं च स्वज्ञातप मक्षत्वमारभन्ते किन्तु चितिशक्तिरेव सम्यक्तां परस्परोपलायमाना

विषयत्वात् परिणामिनी हि बुद्धिस्तस्याश्च विषयोगवादिः घटादिज्ञातश्चाज्ञातश्चेति। परिणामत्वं दर्शयति। सदाज्ञातविषयत्वन्तु पुरुषस्यापरिणामित्वं परिदीपयति। कस्मात् नहि बुद्धिश्च नाम पुरुषविषयश्च स्याद् गृहीताचेति सिद्धं पुरुषस्य सदाज्ञातविषयत्वं ततश्चापरिणामित्वमिति। किञ्च परमार्था बुद्धिः संहत्यकारित्वात् स्वार्थःपुरुष इति। तथा सर्व्वार्थाध्यवसायकत्वात् त्रिगुणा बुद्धिस्त्रिगुणत्वाद्

द्रुरपचक्राक्षनाशादिक्रमेण एवमिहापि युक्त्यागमसिद्धः क्रम आश्रेय इति कथं मूतेन्द्रियाश्चविशेष दृष्टानीत्यत आह। तथाचोक्तम्। पुरस्तादिदमेव सूत्रं प्रथमं व्याचक्षाणैः अथ विशेषाणां कस्मान्न तेषान्तरपरिणामश्चेत्यत आह। न विशेषेभ्य इति किमिदानीमपरिणामिन एव विशेषास्तथा च नित्याः प्रसज्येरन्नित्यत आह। तथान्विति ॥१९॥

व्याख्यातं दृश्यं द्रष्टुः स्वरूपावधारार्थमिदमारभ्यते दृश्यः। व्याचष्ट दृशिमात्र इति विशेषणानि धर्म्मास्तैरपराभृष्टा तदनेन मात्रग्रहणस्य तात्पर्य्यं दर्शितं। स्यादेतत् यदि सर्व्वविशेषरहिता दृक्शक्तिर्न तर्हि शब्दादयो दृश्या इत्रहि दृशिना असंस्पृष्टं दृश्यं भवतीत्यत आह। सपुरुष इति। बुद्धिदर्पणे पुरुषप्रतिबिम्ब संक्रान्तिरेव बुद्धि प्रति संवेदितं पुंसस्तथाच दृशिच्छायापन्नाया बुद्धा संसृष्टाः शब्दादयो भवन्ति दृश्या इत्यर्थः। स्यादेतत् पारमार्थिकमेव बुद्धिचैतन्यथोः कस्मादेकं नोपेयते किमनया तच्छायापत्त्येत्यत आह स बुद्धेर्न सरूप इति तथाह सरूपस्य तच्छायापत्तिरपि दुर्घटेत्यत आह नात्यन्त विरूप इति। तत्र सारूप्यं निषेधति न तावदिति। हेतुं पृच्छति कस्मात्। सहेतुकं वैरूप्यहेतुमाह ज्ञातेति। परिणामिनी बुद्धिर्यस्मात् तस्माद्विरूपा यदा खल्वियं शब्दाद्याकारा भवति तदा ज्ञातोऽसौ शब्दादिश्चचीभवति विषयस्तदाकारत्वे लब्धात्मतथाच कदाचिदेव

चेतनेति गुणानान्तूपद्रष्टा पुरुष इत्यतो न स्वरूपः अस्तु तर्हि विरूपइति नात्यन्तं विरूपः कस्मात् शुद्धोप्यसौ प्रत्ययानुपश्योयतः प्रत्ययं बौद्धमनुपश्यति तमनुपश्यन्न तदात्मापि तदात्मक इव प्रत्यवभासते। तथाचोक्तं। अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमाच्च परिणामिन्यर्थे प्रति-

तदाकारतां दधती परिणामिनीति प्रयोगश्च भवति बुद्धिपरिणामिनी ज्ञाताज्ञात-विषयत्वाच्छीतादिवदिति तद्वैधर्म्यं पुरुषस्य तद्विपरीतत्वाद्वेतोः सिद्धावतीत्याह। सदेति। स्यादेतत् सदाज्ञातविषयत्वं तु पुरुषो न तर्हि केवली स्यादित्याशयवान् पृच्छति कस्मादिति। उत्तरं न हि बुद्धिरनामेति। बुद्ध्यग्रहणयोरिति सच्च सत्त्वमी निरोधावस्थायामत उक्तम्। विरोध सूचनाय पुरुषविषयत्वे ति। तेना-व्ययकारी बुद्धिं विषयत्वेन समुच्चिनोति परिशिष्टौ विरोधद्योतको चकारावितिप्रयोगस्तु पुरुषोऽपरिणामी सदा समग्रज्ञात व्युत्थानावस्थयोर्ज्ञात विषयत्वात्। यः परिणामी नासौ सदाज्ञात विषयो यथा शीतादिरिति व्यतिरेकी हेतुः अपरमपि वैधर्म्यमाह। किञ्चपरार्थेति बुद्धिः खलुक्तैश्चकर्म्मवासनादिभिर्विषयेन्द्रियादिभिश्च संहत्य पुरुषार्थमभिनिर्वर्त्तयन्ती परार्थाप्रयोगश्च परार्थबुद्धेः संहत्यकारित्वात् शय-नासनाद्यङ्गवदिति पुरुषस्तु न तथेत्याह। स्वार्थः पुरुष इति सर्व्वं पुरुषाय कल्पते पुरुषस्तु नकस्यचिदित्यर्थः वैधर्म्यान्तर माह। सर्व्वेति। सर्व्वानर्थान् शान्तघोर-मूढांस्तदाकार परिणता बुद्धिरध्यवस्यति सत्वरजस्तमसां चैते परिणामा इति सिद्धा त्रिगुणा बुद्धिरिति न चैवं पुरुष इत्याह गुणानामिति। तत्प्रतिबिम्बितः पश्यति नतु तदाकार परिणत इत्यर्थः। उपसंहरति अत इति। अस्तितर्हि विरूपइति नात्यन्तं विरूपः कस्मात् यतः शुद्धोपि प्रत्ययानुपश्यः यथाचैतत् तथोक्तम्। इत्ति-प्राधान्यमितरत्रेत्यत्र तथाचोक्तं पञ्चशिखेन अपरिणामिनीहि भोक्तृशक्तिरात्मा अतः

संक्रान्तेव तद्वृत्तिमनुपतति। तस्यां च प्राप्तचैतन्योपग्रहरूपाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धित्वं विशिष्टा हि ज्ञानवृत्तिरित्याख्यायते ॥ २० ॥

तदर्थएव दृश्यस्यात्मा ॥ २१ ॥

दृशिरूपस्य पुरुषस्य कर्मविषयतामापन्नं दृश्यमिति तदर्थएव दृश्यस्यात्मा भवति स्वरूपं भवतीत्यर्थः स्वरूपन्तु

एव बुद्धावप्रति संक्रमाच परिणामिनि बुद्धिरूपेर्थे सङ्क्रान्तेव तद्वृत्तिं बुद्धिवृत्तिमनुपतति। नैवसङ्क्रान्ता कथं सङ्क्रान्तेव कथं वा वृत्तिं विना अनुपतति इत्यत आह। तस्यामिति। प्राप्तश्चैतन्योपग्रह उपरागो येनरूपेण तत्तथाप्राप्तचैतन्योपग्रहं रूपं यस्याः सा तथोक्ता एतदुक्तं भवति यथा निर्मले जलेऽसङ्क्रान्तोऽपि चन्द्रमाः सङ्क्रान्त प्रतिबिम्बतया सङ्क्रान्तइव एवमचाप्यसङ्क्रान्तापि सङ्क्रान्तप्रतिबिम्बा चितिशक्तिः सङ्क्रान्तेव तेन वध्यात्मत्वमापन्ना बुद्धिवृत्तिं मनुपततीति तदनेनानुपश्य इति व्याख्यातं तामनुकारेण पश्यतीत्यनुपश्य इति ॥ २० ॥

द्रष्टृ दृश्ययोः स्वरूपमुक्त्वा स्वस्वामिभावेन सम्बन्धं दृश्यस्य दृष्टृर्थत्वमाह। तत्—त्मा। व्याचष्टे दृशिरूपस्य पुरुषस्यभोक्तुः कर्मरूपतां भोग्यतां मापन्नं दृश्यमिति तस्मात् तदर्थएव दृश्यस्यात्मा भवति न तु दृश्यार्थः ननुनात्मा आत्मार्थः इत्यत आह। स्वरूपं भवतीति एतदुक्तं भवति सुखदुःखात्मकं दृश्यं भोग्यं सुखदुःखे चानुकूलयितृ प्रतिकूलयितृ नीतत्वेन तदर्थे एव व्यवतिष्ठते विषया अपितु श्रद्धादयश्चादात्मादेश्चानुकूलयितारः प्रतिकूलयितारश्च नचात्मैवैषामनुकूलनीय प्रति-

स्वरूपेण प्रतिलब्धात्मकं भोगापवर्गार्थतायां कृतायां पुरुषेण न दृश्यत इति स्वरूपहानात् दृश्यनाशः प्राप्तो न तु विनश्यति ॥ २१ ॥

कस्मात्—

कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥ २२ ॥

कृतार्थमेकं पुरुषं प्रतिदृश्यं नष्टमपि नाशं प्राप्तमप्यनष्टं तदन्यपुरुषसाधारणत्वात् कुशलं पुरुषं प्रति नाशं

कूलनीयस्य स्वात्मनि हत्तिविरोधादतः परिशेष्यात्त्रिति शक्तिरेवानुकूलनीया प्रतिकलनीयाच तस्मात्तदर्थमेव दृश्यं नतु दृश्यार्थं अतश्चतदर्थ एव दृश्यस्वात्मान दृश्यार्थां यत् स्वरूपमस्य यावत् पुरुषार्थमनुवर्त्तते निवर्त्तितेच पुरुषार्थे निवर्त्तत इत्याह स्वरूपन्तु दृश्यस्य जड़ं परस्वरूपेण चैतन्येन प्रतिलब्धात्मक मनुभूत स्वरूपं भोगापवर्गार्थतायां कृतायां पुरुषेण न दृश्यते भोगः सुखाद्याकारः शब्दाद्यनुभवोपवर्गः सत्वपुरुषान्यतानुभवस्तत्र तदुभयमप्यजानतीः जड़यीः बुद्धेः पुरुषच्छायापत्त्येति पुरुषस्येव तथाच पुरुष भोगापवर्गयोः कृतयोः दृश्यस्य भोगापवर्गार्थता समाप्यत इति भोगापवर्गार्थतायां कृतायामित्युक्तं। अवान्तरे चोदयति स्वरूपहानादिति परिहरति नतु विनश्यति ॥ २१ ॥

नन्वत्यन्तानुपलभ्यं कथं न विनश्यति इत्याशयवान् पृच्छति। कस्मादिति। सूत्रे शेषत्वमाह। कृतार्थत्वात्। कृतोर्थोयस्य पुरुषस्य स तथा तं

प्राप्तमप्यकुशान् पुरुषान् प्रत्यक्तार्थमिति तेषां दृश्येः कर्म्म-विषयतामापन्नं लभते एव पररूपेणात्मरूपमिति अतश्च दृग्दर्शनशक्त्योर्नित्यत्वादनादिः संयोगोव्याख्यातइति तथा-चोक्तं धर्म्मिणामनादिसंयोगाद्धर्म्ममात्राणामप्यनादिसंयो-गइति संयोगस्वरूपाभिधित्सयेदं सूत्रं प्रवर्त्तते ॥ २२ ॥

प्रतिनष्टमप्यनष्टं तद्दृश्यं कृतः सर्व्वान् पुरुषान् कुशलाकुशलान् प्रति साधारण-त्वात्। व्याचष्टे कृतार्थमेकमिति नाशोऽदर्शनं अनष्टन्तु दृश्यमन्य पुरुषसाधारण-त्वात् तस्मात् दृश्यात् परस्यात्मनः चैतन्यं रूपं तेन तदिह श्रुति स्मृति इतिहास पुराण प्रसिद्धमव्यक्तमनवयवमेकमनाश्रयं व्यापि नित्यं विश्वकार्य्यशक्तिमत् अपि कुशलिनं तं प्रति कृतकार्य्यं न दृश्यते तथाप्यकुशलिन दृश्यमानं न नास्ति न हि रूपमन्धेन न दृश्यत इति चक्षुषतापि दृश्यमान मभावप्राप्तं भवति न च प्रधान-वदेक एव पुरुषस्तन्नानात्वस्य जन्ममरण सुख दुःखोपभोग मुक्ति संसार व्यव-स्थया सिद्धेः एकत्वश्रुतीनाञ्च प्रमाणान्तर विरोधात् कथञ्चित् देशकाल विभागा-भावेन भक्त्याद्युपपत्तेः प्रकृत्येकत्व पुरुष नानात्वयोश्च श्रुत्यैव साधात् प्रति-पादनात् "अजामेकां लोहित शुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो-ह्येको जुषमाणो नुशेते जहात्येनां भुक्तभोगामजोन्यः" इति श्रुतिः अस्या एव-श्रुतेश्चानेन सूत्रेणार्थोऽनूदित इति यतो दृश्यं नष्ट मप्यनष्ट पुरुषान्तरं प्रत्यस्ति अतो दृग्दर्शन शक्त्योर्नित्यत्वादनादि संयोगो व्याख्यातः अत्रैवाग्निना मनुमति माह। यथाचोक्त मिति। धर्म्मिणां गुणाना मानन्दिरनादि संयोगाद्धर्म्ममात्राणा महदादीना मप्यनादिः संयोग इति एकैकस्य महदादेः संयोगो अनादिरप्यनित्य-एव स्यादपि तथापि सर्व्वेषां महदादीनां नित्यपुरुषान्तराणां साधारणत्वादत उक्तं धर्म्ममात्राणामिति। मात्रग्रहणेन व्याप्तिं गमयति अत एतदुक्तवति ॥ २२ ॥

स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥ २३ ॥

पुरुषः स्वामी दृश्येन स्वेन दर्शनार्थसंयुक्तस्तस्मात् संयोगादृश्यस्योपलब्धिर्यां स भोगः या तु द्रष्टुः स्वरूपोपलब्धिः सोऽपवर्गः दर्शनकार्यावसानः संयोगइति दर्शनं वियोगस्य कारणमुक्तं दर्शनमदर्शनस्य प्रतिद्वन्द्वीति अदर्शनं संयोगनिमित्तमुक्तं नात्र दर्शनं मोक्षकारणमदर्शनाभावा-

यद्यप्येकस्य महतः संयोगोतीततामापन्न स्तथापि महदन्तरस्य पुरुषान्तरेण संयोगोनातीत इति नित्यउक्तः तदेव तादर्थे संयोगकार उक्ते प्रासङ्गिके प्रधाननित्यत्वे संयोग सामान्यनित्यत्वे हेतौ चोक्ते संयोगस्य यत् स्वरूपमसाधारणं विशेष इति यावत् तदभिधित्सयेदं सूत्रं प्रवर्तते । स्व—गः । यतोदृश्यं तदर्थमतस्तज्जनित मुपकारं भजमानः पुरुषस्तस्य स्वामी भवति । भवति च दृश्यमस्य स्वं सचानयोः संयोगः शक्तिमात्रेण व्यवस्थितस्तत्स्वरूपोपलब्धि हेतुः तदेतद्भाष्यमनवद्योतयति पुरुषः स्वामी योग्यतामात्रेण दृश्येन स्वेन योग्यतयेव दर्शनार्थं संयुक्तः शेषं सुगमं स्यादेतत् द्रष्टुः स्वरूपोपलब्धिरपवर्ग उच्यते अनेनेत्यपवर्ग उक्तः नचमोक्षः साधनवांस्तथा सत्यं मोक्षलाभेव च्यवेतेत्यत आह । दर्शनकार्यावसानो बुद्धिविशेषेण सहपुरुष विशेषस्य संयोगइति दर्शनं वियोग कारणमुक्तं कथं पुनर्दर्शन कार्यावसानत्वं संयोगस्येत्यत आह । । दर्शनमिति । ततः किमित्यत आह । अदर्शनमविद्या संयोग निमित्तमित्युक्तं उक्तमर्थं स्पष्टयति । नात्रेति । ननु दर्शनमदर्शनं विरोधिनं विनिवर्त्तयतु• वस्य श्रुतो निवृत्तिरित्यत आह । दर्शनस्येति । बुध्यादि हि विविक्तस्यात्मनः स्वरूपा-

देव बन्धाभावः स मोक्षइति दर्शनस्य भावे बन्धकारणस्या-दर्शनस्य नाश इत्यतो दर्शनं ज्ञानं कैवल्यकारणमुक्तम्। किञ्चेदमदर्शनं नाम किं गुणानामधिकारः आहोस्वि-द्दृशिरूपस्य स्वामिनोदर्शितविषयस्य चित्तस्यानुपादः स्वस्मिन् दृश्ये विद्यमाने योदर्शनाभावः किमर्थवत्ता-गुणानामथाविद्या स्वचित्तेन सह निरुद्धा स्वचित्तस्यो-त्पत्तिबीजं किं स्थितिसंस्कारक्षये गतिसंस्काराभिव्यक्तिः।

वक्ष्यानं नीचउक्तौन तस्य साधनं दर्शनं सचित्वदर्शन निवृत्ति रित्यर्थः असाधारणसं-योग हेतुमदर्शनविशेषं ग्रहीतुं अदर्शनमात्रं विकल्पयति। किञ्चेदमिति पर्य्युदासं ग्रहीत्वाह किं गुणानामधिकारः कार्य्यारम्भ सामर्थ्यं ततोहि संयोगः संसार हेतु रुपजायते। प्रसज्य प्रतिषेधं ग्रहीत्वा द्वितीयं विकल्पमाह आहोस्विदिति दर्शित-विषयः शब्दादिः सत्पुरुषान्यताच येन चित्तेन तस्य सद्विषयस्यानुत्पादः एतदेव स्फोरयति। स्वस्मिन् दृश्ये शब्दादौ सत्पुरुषान्यतायाश्चेति तावदेव प्रधानं वित्ते-ष्टते न यावत् त्रिविधं दर्शनमभिनिवर्त्तयति निष्पादयतीभय दर्शनं तु विनिवर्त्तते इति पर्य्युदास एव। तृतीयं विकल्पमाह किमर्थवत्ता गुणानां सत्कार्य्यवाद सिद्धोहि भाविनावपि भोगापवर्गावव्यपदेश्यतयास्त इत्यर्थः पर्य्युदास एव चतुर्थं विकल्पमाह। तथाविद्या प्रति सर्गकाले स्वचित्तेन सह निरुद्धाप्रधान साम्यमा-गता वासनारूपेण स्वचित्तोत्पत्ति बीजं तेन दर्शनादन्या विद्यावासनैवादर्शन मुक्तापर्य्युदासएव। पञ्चमं विकल्पमाह किं स्थिति संस्कारस्य प्रधानवर्त्तिनः साम्यपरिणाम परम्परा वाहिनः क्षये गति महदादि विकारारम्भशक्तेः संस्कार-प्रधानस्य गति संस्कारारम्भथाभिव्यक्तिः कार्य्योन्मुखत्वं तदुभय संस्कार सद्भावे मतान्तरानुमति माह। अथ मुक्तमैकान्तिकत्वं व्यावेधन्निः प्रधीयते जन्यते विकार

यत्तेदमुक्तं प्रधानं स्थितैव वर्त्तमानं विकाराकारणाद्-प्रधानं स्यात्तथा गतैव वर्त्तमानं विकारनित्यत्वाद्-प्रधानं स्यात्। उभयथा चास्य वृत्तिः प्रधानव्यवहारं लभते नान्यथा कारणान्तरेष्वपि कल्पितेष्वेव समानश्चर्चः दर्शनशक्तिरेवादर्शनमित्येकप्रधानस्यात्मख्यापनार्था प्रवृत्तिरितिश्रुतेः सर्व्वबोध्यबोधसमर्थः प्राक् प्रवृत्तेः पुरुषो

ज्ञात मनेनेति प्रधानं तच्चेत् स्थितैव वर्त्तेत न कदाचिद्विलासती विकाराकरा त्वान्न प्रधीयते तेन किञ्चिदित्यप्रधानं स्यात्। अथ गत्यैव वर्त्तेत न कदाचिदपि स्थित्वा लभेत। तथागत्यैवेति क्वचित्पाठः। स्थित्वे गत्वे इति तादर्थ्ये चतुर्थी एवकारश्च द्रष्टव्यः स्थित्वैवावर्त्तेत न क्वचिदविकारी विनश्येत तथाच भावस्य सतो ऽविनाशिनो नोत्पत्तिरपीति विकारत्वादेव अवेत एवच्च न प्रधीयते अत्र किञ्चिदित्यप्रधानं स्यात्। तदुभयथा स्थित्वा गत्वा चास्य वृत्तिः प्रधानव्यवहारं लभते नान्यथा एकान्ताभ्युपगमे। न केवलं प्रधाने कारणान्तरेष्वपि परब्रह्मतन्मात्रा परमाण्वादिषु कल्पितेषु समानश्चर्चा विचारः तान्यपि हि स्थित्वैव वर्त्तमानानि विकाराकरणादकारणानि स्युः गत्वैव वर्त्तमानानि विकारनित्यत्वादकारणानि स्युरिति च पर्य्युदासएव। षष्ठं कल्पमाह दर्शनशक्तिरेवेति। यथा प्रजापतिव्रते नेचेतीयन्तमादित्यमिति अनीश्वरः प्रत्यासन्नः संकल्पो गृह्यते एवमिहापि दर्शननिषेधे तत्प्रत्यासन्ना तन्मूला शक्तिरुच्यते सा च दर्शनं भोगादिलक्षणं प्रसोतुं द्रष्टारं दृश्येन योजयतीति अत्रैव श्रुतिमाह।

प्रधानस्येति। स्यादेतत् प्रधानं आत्मख्यापनार्थं प्रवर्त्तते इति श्रुतिराह ननु आत्मदर्शनशक्तिः प्रवर्त्तत इत्यतआह सर्व्वबोध्यबोधसमर्थ इति प्राक् प्रवृत्तेः प्रधानस्य नात्मख्यापनायां प्रवृत्तौ प्रयोजकसमसामर्थ्यं तदयोगात् तस्मात् सामर्थ्यं प्रवृत्तेः

न पश्यति सर्व्वकार्य्यैकरणसमर्थं दृश्यं तदा न दृश्यत इति। उभयस्याप्यदर्शनं धर्म्मइत्येके। तत्रेदं दृश्यस्य स्वात्मभूतमपि पुरुषप्रत्ययमपेक्ष्य दर्शनं दृश्यधर्म्मत्वेन भवति तथा पुरुषस्यानात्मभूतमपि दृश्यप्रत्ययापेक्षं पुरुषधर्म्मत्वेनेवादर्शनमवभासते दर्शनं ज्ञानमेवादर्शनमिति केचिदभिदधति इत्येते शास्त्रगता विकल्पास्तत्र विकल्पबहुत्वमेतत् सर्व्वपुरुषाणां गुणसंयोगे साधारणविषयं यस्तु प्रत्येकचैतन्यस्य स्वबुद्धिसंयोगः ॥ २३ ॥

प्रयोजकमिति। शुत्यार्थादुक्तमित्यर्थः दर्शनं शक्तिः प्रधानाश्रयेत्यङ्गीकृत्य षष्ठः कल्पः। इमामेवोभयाश्रयामाश्रित्य सप्तमं कल्पमाह उभयस्य पुरुषस्यच दृश्यस्यचा दर्शनं दर्शनशक्तिं धर्म्म इत्येके स्यादेतन्मृष्यामहे दृश्यस्येति तस्य सर्व्वशक्त्याश्रयत्वान्न द्रष्टुरिति पुनर्मृष्यामः नहि तदाधारा ज्ञानशक्तिस्तज्ज्ञानस्यासमवायादन्यथा परिणामापत्तिरित्यत आह। तत्रेदमिति भवतु दृश्यात्मकं तथापि तस्य जड़त्वेन तद्गत शक्तिकार्य्यं दर्शनमपि जड़मिति न शक्यं तद्धर्म्मत्वेन विज्ञातुं जड़स्य स्वयमप्रकाशत्वादतो दृश्यैरात्मनः प्रत्ययं चैतन्यच्छायापत्तिमपेक्ष्य दर्शनं तद्धर्म्मत्वेन भवति विज्ञायते विषयेण विषयिणो लक्षणात् नन्वेतावतापि दृश्यधर्म्मत्वमस्य ज्ञानस्य भवति नतु पुरुषधर्म्मत्वमपीत्यत आह। तथापुरुषस्येति सत्यं पुरुषस्यानात्मभूतमेव तथापि दृश्यबुद्धिसत्त्वयोः प्रत्ययश्चैतन्यच्छायापत्तिसमपेक्ष्य पुरुष धर्म्मत्वेन इव न तु पुरुषधर्म्मत्वेन एतदुक्तं भवति चैतन्यविम्बोद्गृहितया बुद्धिचैतन्ययोरभेदात् बुद्धिधर्म्माश्चैतन्य धर्म्माइव च कासति इति॥ अष्टमं कल्पमाह दर्शनं ज्ञानमेव शब्दादीनामदर्शनं न तु सत्पुरुषान्वयतया इति केचिद् यथाचक्षुरूपे प्रमाणमपि रसादौ प्रमाण मुच्यते। एतदुक्तं भवति। सुखाद्याकार शब्दादि ज्ञानानि

तस्य हेतुरविद्या ॥ २४ ॥

विपर्य्ययज्ञानवासनेत्यर्थः विपर्य्ययज्ञान वासना वासिता न कार्य्यनिष्ठां पुरुषख्यातिं बुद्धिः प्राप्नोति साधिकारा पुनरावर्त्तते। सा तु पुरुषख्यातिपर्य्यवसाना कार्य्यनिष्ठां प्राप्नोति चरिताधिकारा निवृत्तादर्शना बन्धकारणाभावान्न पुनरावर्त्तते अत्र कश्चित् षण्ढकोपाख्यानेनोद्घाटयति मुग्धया भार्य्ययाभिधीयते षण्ढक आर्य्यपुत्रापत्यवतो मे

स्वमिदानुगुणतया द्रष्टृदृश्यसंयोगमाविपन्नीति।* तदेवं विकल्प्य चतुर्थं विकल्पं स्वीकर्तुं इतरेषां विकल्पानां सांख्यशास्त्र गतानां सर्व्वपुरुषसाधारण्येन भोग वैचित्र्याभाव प्रसङ्गे न दुषयति इत्येते शास्त्रगता इति चतुर्थं विकल्प निर्धारयितुं निर्द्धारितम्॥ २३॥

सूत्रमवतारयति। यस्तु प्रत्येकचेतनस्य स्वबुद्धि संयोग इति प्रतीपनक्षति प्राप्नोति इति प्रत्येक असाधारणस्तु संयोग एकैकस्य पुरुषस्यैकयैकया बुद्ध्या वैचित्र्यहेतुः सूत्रपठितो तस्येति। ननु अविद्याविपर्य्यय ज्ञानं तस्य भोगापवर्गयोरिव स्वबुद्धिसंयोगहेतुः असंयुक्तायां बुद्धौ तदुत्पत्तेः तत्कथमविद्या संयोगभेदस्य हेतुरित्यत आह। विपर्य्यय ज्ञानवासनेति सर्गान्तरीयायाः अविद्यायाः स्वचित्तेन सह निरुद्धायां अपि प्रधाने अस्ति वासना तद्वासनावासितञ्च प्रधानं तत्तत् पुरुषसंयोगिनीं तादृशीमेव बुद्धिं सृजति एवं पूर्व्वं पूर्व्वसर्गेष्वित्यनादित्वादोषः अतएव प्रतिसर्गावस्थायां न पुरुषोमुच्यते इत्याह विपर्य्ययज्ञानेति।

यदा पुरुषख्यातिं कार्य्यनिष्ठां प्राप्तातदाविपर्य्यय ज्ञान वासनाया बन्धकारणस्याभावान्न पुनरावर्त्तते इत्याह। सेति अत्र कश्चिन्नास्तिकः कैवल्यं षण्ढकोपा-

भगिनी किमर्थं नाहमिति स तामाह कृतस्तेहमपत्य मुत्पादयिष्यामि इति तथेदं विद्यमानं ज्ञानं चित्तनिवृत्तिं न करोति विनष्टं करिष्यतीति का प्रत्याशा तत्राचार्यदेशीयोव्यक्तिः न तु बुद्धिनिवृत्तिरेव मोक्षोऽदर्शनकारणाभावात् बुद्धिनिवृत्तिस्तत्त्वादर्शनं बन्धुकारणं दर्शनान्निवर्त्तते । तत्त्वचित्तनिवृत्तिरेव मोक्षः किमर्थमस्या एवास्य मति विभ्रमम् ॥ २४ ॥

हेयं दुःखं हेयकारणञ्च संयोगाख्यं स निमित्तमुक्तमतः यत्तं हानं वक्तव्यम्—

तदभावात् संयोगाभावो हानं तद्दृशे कैवल्यम् ॥ २५ ॥

स्यानेनोपक्रमते । यत्कपिलोपाख्यानमाह मुग्धयेति किमर्थमित्यर्थः शब्दोनिमित्त मुपलक्षयति प्रयोजनस्यापि निमित्तत्वात् षष्ठकोपाख्यानेन साम्यमापादयति तथेदं विद्यमानं गुण पुरुषान्यताख्याति ज्ञानं चित्तनिवृत्तिं न करोति परवैराग्येण ज्ञान मसाद मार्गेण स संस्कारं निरुद्ध विनष्टं करीष्यतीति का प्रत्याशा यस्मिन् सत्येव वर्त्तवति तत् तस्यकार्यं न तु यस्मिन् सतीति भावः अथैकदेशिमतेन परिहारमाह । तत्रेति यैरेवं परिसमाप्त आचार्य देशीयः आचार्यस्तु वायुमोक्षे कृतसंस्कारः आचिनोति च शास्त्रार्थ समाचारे स्थापयत्यपि स्वयमाचरते यस्मादाचार्यस्तेन मोक्षते इति भोगविवेक ख्यातिरूप परिणत बुद्धि निवृत्तिरेव मोक्षः न च बुद्धि स्वरूप निवृत्तिः सा च धर्ममेघान्त विवेकख्याति प्रतिष्ठाया अनन्तरमेव भवति सत्यपि बुद्धि स्वरूपमात्रावस्थान इत्यर्थः एतदेव क्षीरयति अदर्शनस्य बन्धकारणस्याभावात्

तस्यादर्शनस्याभावात् बुद्धिपुरुषसंयोगाभावः आत्यन्तिको बन्धनोपरमइत्यर्थः एतद्धानं तद्दृशे कैवल्यं पुरुषस्वामिशक्तेः स्वरूपोपलब्धिहेतुः पुनरसंयोगो गुणैरित्यर्थः दुःखकारणनिवृत्तौ दुःखोपरमो हानं तदा स्वरूपप्रतिष्ठः पुरुषइत्युक्तम् ॥ २५ ॥

अथ हानस्य कः प्रत्युपाय इति—

विवेकख्यातिरविप्लवा हानोपायः ॥ २६ ॥

सत्वपुरुषान्यताप्रत्ययो विवेकख्यातिः सत्वनिवृत्तिमिथ्याज्ञानाप्रवर्तते यदा मिथ्याज्ञानं दग्धबीजभावं बन्धाप्रसवं सम्पद्यते तदा विधूतक्लेशरजसः सत्वस्य परे वैशारद्ये परस्यां वशीकारसंज्ञायां वर्त्तमानस्य विवेकप्रत्यय-

बुद्धिनिवृत्तिस्तत्रादर्शनं बन्धकारणं दर्शनान्निवर्त्तते दर्शननिवृत्तिस्तु परवैराग्यसाध्या सत्यपि बुद्धिस्वरूपावस्थाने मोक्षइति भावः एकदेशिमत सुपन्यस्य स्वमत माह तत्र चित्तनिवृत्तिरेव मोक्षः। ननूक्तं दर्शने निवृत्ते चिरात्तित्त स्वरूप निवृत्ति भवतीति। कथं दर्शनकार्य्यत्वमत आह। किमर्थमस्थाने शङ्कति विप्लव इति अयमभिसन्धिः यदि दर्शनस्य साक्षात्तित्त निवृत्तौ कारणभाव मङ्गीकुर्व्वीमहि तत एव मुपालभ्येमहि किन्तु विवेक दर्शनं प्रकर्षकाष्ठां प्राप्तं निरीक्ष समाधिभावना प्रकर्षं क्रमेण चित्तनिवृत्तिमत्युत्क्रम्य स्वरूपावस्थानोपयोगीत्यातिष्ठामहे तत्रवयमुपालम्भे महीति ॥ २५ ॥

प्रवाहोनिर्मलोभवति सा विवेकख्यातिरविप्लवा हानस्यो-पायः ततो मिथ्याज्ञानस्य दग्धबीजभावोपगमः पुनश्चा प्रसवरूपेण मोक्षस्य मार्गोहानस्योपायइति ॥ २६ ॥

तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥ २७ ॥

तस्येति। प्रत्युदितख्यातेः प्रत्याम्नायः समधेति अशुद्धा-वरणमलापगमाच्चित्तस्य प्रत्ययान्तरानुत्पादे सति सप्त-प्रकारैव प्रज्ञा विवेकिनो भवति। तद् यथा परिज्ञातं हेयं

तदेवं व्यूहत्रयमुक्त्वा तृतीयव्यूहाभिधानाय सूत्रमवतारयति। हेयं दुःखमुक्तमिति। तुल्यं व्याचष्टे तस्येति। अस्ति हि महाप्रलयेपि संयोगाभावः तदुक्तं नात्यन्तिक इति दुःखोपरमोहानमिति। पुरुषार्थता दर्शिताग्रेषमतिरोहितार्थं हानोपाय सत्त्वं चतुर्थं व्यूहमाख्यातुं सूत्रमवतारयति अथेति। आगमानुमानाध्यासेषि विवेक-ख्यातिरस्ति नचासौ व्युत्थान तत्संस्कारं वा निवर्त्तयति तदतीपि तदनु-वृत्ते रिति तन्निवृत्त्यर्थ मविप्लवेति विप्लवः मिथ्याज्ञानं तद्रहितः एतदुक्तं भवति श्रुतमयेन ज्ञानेन विवेकं गृहीत्वा युक्तिमयेन च व्यवस्थाप्य दीर्घकाल नैरन्तर्य सत्कार सेवितायाः भावनायाः प्रकर्ष पर्यन्तं समधिगता साक्षात्कारवती विवेक ख्याति निवर्त्तित सवासन मिथ्याज्ञानानि विप्लवा हानोपाय इति। शेषं सुगमं भाष्यं ॥ २६ ॥

विवेकख्याति निष्ठाया स्वरूपमाह सूत्रेण तस्य—प्रज्ञा। व्याचष्टे तस्येति प्रत्युदित ख्याते वर्त्तमान ख्याते र्योगिनः प्रत्याम्नायः परामर्शः अशुद्धिरेवावरणं चित्तस्यतस्य तदेवमलं तस्यापगमात् चित्तस्य प्रत्ययान्तरानुत्पादे तामसराजसव्युत्थान

नास्य पुनः परिज्ञेयमस्ति क्षीणा ज्ञेयहेतवो न पुनरेतेषां क्षेतव्यमस्ति साक्षात्कृतं निरोधसमाधिना हानं । भावितो विवेकख्यातिरूपोहानोपायइत्येषा चतुष्टयी कार्य्याविमुक्तिः प्रज्ञायाः चित्तविमुक्तिस्तु त्रयो चरिताधिकारा बुद्धिगुणा गिरिशिखरकूटच्युताइव पाषाणोनिरवस्थानाः स्वकारणे प्रलयाभिमुखाः सह तेनास्तं गच्छन्ति । न चैषां विप्रलीनानां पुनरस्त्युत्पादः प्रयोजनाभावादिति एतस्यामवस्थायां गुणसम्बन्धातीतस्वरूपमात्र ज्योतिरमलः केवलीपुरुष इत्येतां सप्तविधां प्रान्तभूमिप्रज्ञामनुपश्यन् पुरुषः कुशलइत्याख्या-

प्रत्ययानुत्पादेनिर्विप्लवविवेकख्याति निष्पादयतस्तस्य सप्तप्रकारैव प्रज्ञाविवेकिनी भवति विषयभेदात् प्रज्ञाभेदः प्रकृष्टोन्तो यासां भूमीनामवस्थानां तास्तथोक्ता यतः परं नास्ति संप्रकर्षः प्रान्तभूमयः यस्याः प्रज्ञाया विवेकख्यातेः सा तथोक्ता ता एव सप्त प्रकाराःप्रज्ञाभूमी उदाहरति । तद्यथेति तत्र पुरुष प्रयत्न निष्पाद्यासु चतसृषु भूमिषु प्रथमामुदाहरति परिज्ञातं ज्ञेयं यावत् किल प्राधानिकं तत्सर्वं परिणामताप संस्कारैर्गुण वृत्ति विरोधात् दुःखमेवेति ज्ञेयं तत्परिज्ञातं प्रान्तां दर्शयति नास्य पुनः किञ्चिद् परिज्ञातं परिज्ञेयमस्ति । द्वितीयामाह क्षीणा इति । प्रान्तामाह न पुनरिति । तृतीयामाह साक्षात् कृतं प्रत्यक्षेण निश्चितं मया संप्रज्ञातावस्थाया मेव निरोधसमाधि साध्यं हानं न पुनरस्मात् परं निश्चेतव्य मस्तीतिशेषः । चतुर्थीं माह भावितो निष्पादितः विवेकख्यातिरूपोहानोपायो मार्गः परं भावनीयमस्ति इति शेषः एषा चतुष्टयी कार्य्याविमुक्तिः समाप्ति कार्यतया प्रयत्न व्याप्यता दर्शिता क्वचित् पाठः कार्यैविमुक्तिरिति कार्य्यान्तरैश्च विमुक्तिः प्रज्ञाया इत्यर्थः प्रयत्ननिष्पा-

यते प्रतिप्रसवेपि चित्तस्य मुक्तः कुशल इत्येव भवति गुणातीतत्वादिति सिद्धा भवति विवेकख्यातिर्हानोपायः इति ॥ २७ ॥

न च सिद्धिरन्तरेण साधनमित्येतदारभ्यते—

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरा विवेकख्यातेः ॥२८॥

योगाङ्गान्यष्टावभिधायिष्यमाणानि तेषामनुष्ठानात् पञ्चपर्व्वणो विपर्ययस्याशुद्धिरूपस्य क्षयेनाग्रहतत्त्वे सम्यक् ज्ञानस्याभिव्यक्तिर्यथा यथा च साधनान्यनुष्ठीयन्ते तथा

यानुनिषादनीयाम प्रयत्नसाध्यां चित्तविमुक्तिमाह चित्तविमुक्तिषु चयौ प्रथमामाह चरिताधिकारा बुद्धिकृतभोगावर्गं कार्यैत्यर्थः। द्वितीयामाह गुणाइति प्रान्ततामाह न चैषामिति। ढतीयामाह एतस्यामवस्थाया मिति एतस्यामवस्थायां जीवन्नेव पुरुषः कुशलीमुक्त इत्युच्यते चरमदेहत्वादित्याहएतामिति। अनौपचारिकं मुक्तमाह प्रतिप्रसवे प्रधानलयेपि चित्तस्य मुक्तः कुशल इत्येव भवति गुणातीतत्वादिति ॥ २७ ॥

तदेवं चतुरीव्यूहानुत्का तन्मध्यपतितस्यहानोपायस्य विवेकख्यातेर्गीदोहनादिवत् प्राक् सिद्धेरसिद्धस्य चोपायत्वाभावात् सिध्युपायानि वक्तुमारभत इत्याह। सिद्धेति तदाभिधास्यमानानां साधनानां येनप्रकारेण विवेकख्यात्युपायत्वं तदर्शयति सूत्रेण येति। योगाङ्गानि हि यथायोगं दृष्टाऽदृष्टद्वारेणाशुद्धिं क्षिणन्ति पञ्चपर्व्वणो विपर्ययस्येत्युपलक्षणं पुण्यापुण्ययोरपि ज्ञात्याद्युभेदहेतुत्वेनाशुद्धिरूपत्वादिति शेषं सुगमं ज्ञानाविधस्य कारणं भावस्य दर्शनात् योगाङ्गानुष्ठानस्य कीदृशं कारणत्वमित्यत

तथा तनुत्वमशुद्धिरापद्यते यथा यथाच क्षीयते तथा तथाच क्षयक्रमानुरोधिनी ज्ञानस्यापि दीप्तिर्विवर्द्धते सा खल्वेषा विशुद्धिः प्रकर्षमनुभवति आविवेकख्यातेः वा गुणपुरुष स्वरूप विज्ञानादित्यर्थः । योगाङ्गानुष्ठानमशुद्धेर्वियोगकारणं यथा परशुः छेद्यस्य विवेकख्यातेस्तु प्राप्तिकारणं यथा धर्मः सुखस्य नान्यथाकारणं कति चैतानि कारणानि शास्त्रे भवन्ति नवैवेत्याह । तद् यथा—"उत्पत्तिस्थित्यभिव्यक्ति विकारप्रत्ययाशयः । वियोगान्यत्वधृतयः कारणं नवधा

आह । योगाङ्गानुष्ठानमिति । अशुद्धा वियोजयति बुद्धिसत्वमिति अशुद्धेर्वियोग कारणं दृष्टान्त माह । यथा परशुरिति परशुः छेद्यं वृक्षं मूलेन वियोजयति अशुद्धया वियोजयद्बुद्धि सत्वं विवेकख्यातिं प्रापयति यथा धर्मः सुखं तथा योगाङ्गानुष्ठानं विवेकख्यातेः प्राप्तिकारणं नान्येन प्रकारेणेत्याह । विवेकख्यातेरिति नान्यथेति । प्रतिषेध शवत्वात् पृच्छति कति चैतानीति । उत्तरं नवैवेति तानि दर्शयति कारिकया तद्यथा उत्पत्ति इति अकीदाहरणान्याह तत्रोत्पत्तिकारणमिति मनोविज्ञान मव्यपदेश्यावस्थातोपनीय वर्त्तमानावस्थामापाद्य दुत्पत्ति कारणं विज्ञानस्य स्थिति कारणं मनसः पुरुषार्थता अग्निनाया उत्पन्नं मनस्तावदव तिष्ठते न यावद्विविधं पुरुषार्थमभि निर्वर्त्तयति अथ निर्वर्त्तित पुरुषार्थं सत्यं स्थितेरपैति तस्मात् स्वकारणादुत्पन्नस्य मनसोनागत पुरुषार्थता स्थिति कारणं दृष्टान्तमाह । शरीरस्थे वेति प्रत्यक्षज्ञान निमित्त मिन्द्रियद्वारा स्वतो वा विषयस्य संक्रियाभिव्यक्तिस्तस्याः कारणं यथा रूपस्यालोकः विकार कारणं मनसो विषयान्तरं यथा हि मनस्को: समाहित मनसो वह्नको विपच्यमान पद्मसत्वर शवच समनन्तर मुत्क्षोभितावस्थ ।

स्मृत"मिति। तत्रोत्पत्तिकारणं मनोभवति ज्ञानस्य स्थितिकारणं मनसः पुरुषार्थता शरीरस्येवाहारइति. अभिव्यक्तिकारणं यथा रूपस्यालोकस्तथा रूपज्ञानं। विकारकारणं मनसो विषयान्तरम् यथाग्निः पाक्यस्य प्रत्ययकारणं धूमज्ञान मग्निज्ञानस्य प्राप्तिकारणं योगाङ्गानुष्ठानं विवेकख्यातेः वियोगकारणं तदेवाशुद्धेः अन्य-

स्वरूप लाभस्य यौवनसम्पन्ना मप्सरसं प्रत्नौचा मौक्षमानस्य समाधिमपहाय तस्यां सक्तं मनोबभूवेति अत्रैव निदर्शनमाह। यथाग्निः पाक्यस्य तण्डुलादेः कठिनावयव सन्निवेशस्य प्रशिथिलावयवसंयोगलक्षणस्य विकारस्य कारणं सतएवं विषयस्य प्रत्ययकारणं धूमज्ञानमग्निज्ञानस्येति ज्ञायतइति ज्ञानं अग्निश्चासौ ज्ञानं चेति अग्निज्ञानं तस्य एतदुक्तं भवति वर्त्तमानस्यैवाग्नेर्ज्ञेयस्य प्रत्यय कारणतया कारणमिति औत्सर्गिकी निरपेक्षाणां कारणानां कार्यक्रिया प्राप्तिलक्षणा: कुतश्चिदपवादी ऽप्राप्तिः यथा निम्नोपसर्पणस्वभावानामपां प्रतिबन्धः सेतुना तथेहापि बुद्धिसत्वस्य सुख प्रकाश शीलस्य स्वाभाविकी सुख विवेकख्याति जनकता प्राप्तिः। सा कुतश्चिदधर्मोत्तमसो वा प्रतिबन्धान्न भवति धर्मात् योगाङ्गानुष्ठानाद्वा तदपनये तद् प्रतिबन्धइति स्वभावत एव तज्जनकतया तदाप्नोति यथा वचाति निमित्त प्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवदिति तदेव विवेकख्याति लक्षण कार्यापेक्षया प्राप्तिकारण मुक्त अवान्तर कार्यापेक्षया तु तदेव वियोग कारण मित्याह वियोगकारण मिति।

अन्यत्वकारणमाह। अन्यत्वकारणं यथा सुवर्णकारः सुवर्णस्य कटककुण्डल केयूरादिभ्योभिन्नाभिन्नस्य भेद विवक्षया कटकादि भिन्नस्या भेदः विवक्षया कटकादि भिन्नस्य सुवर्णस्य कुण्डलादन्यत्वं तथाच कटककारी सुवर्णकारः कुण्डलादभिन्नात् सुवर्णादन्यत् कुर्वन्नन्यत्वकारणं अग्निरपि पाक्यस्यान्यत्व कारणं यद्यपि तथापि

त्वकारणं यथा सुवर्णकारः । एवमेकस्य स्त्रीप्रत्ययस्या विद्यामूढत्वे द्वेषोदुःखवैराग्यं सुखत्वे तत्त्वज्ञानं माध्यस्थे धृतिकारणं शरीरमिन्द्रियाणां तानि च तस्य महाभूतानि शरीराणां तानि च परस्परं सर्वेषाम् । तैर्यग्योनमानुषदैवतानि च परस्परार्थत्वादित्येवं नव कारणानि तानि च यथासम्भवं पदार्थान्तरेष्वपियोज्यानि ॥ २८ ॥

धर्मिणोधर्मयोः पृथक्त्वे तच्छब्दत्वयोर्भेदाविवक्षया धर्म्ययोरुपजनापायेपि धर्मानुवर्त्तत इति न तस्यान्यत्वं शक्यं कर्तुम् इति विकारस्यैव कारणत्वमुक्तमिति न सङ्गतः न च संस्थानभेदो धर्मिणोन्यत्व कारणमिति व्याख्येयं सुवर्णकार इत्यस्य सङ्गतिं वाक्यमन्यत्व कारणमुपलक्षयाध्यात्मिकमुदाहरति एवमेकस्येति अविद्या कर्मणीयं कन्यकेत्यादि ज्ञानं सम्मोहयोगात् सैव स्त्रीप्रत्ययो मूढो विषयो भवति चैतस्य मैतस्य पुत्रवती कलत्रवमेतस्तु मम भाग्यहीनस्येति एवं सपत्नीजनस्य तस्यां द्वेषः स्त्रीप्रत्ययस्य दुःखत्वे एवं मैतस्य तस्याः भर्तुः रागस्तस्य स्त्रीप्रत्ययस्य सुखत्वे तत्त्वज्ञानं लङ्मांस मेदोस्थिमज्जा समूह स्त्रीकायः स्नानबीजादिभिरप्यचिरिति विवेकिनां माध्यस्थे वैराग्ये कारणमिति धृतिकारणं शरीरमिन्द्रियाणां विधारकमिन्द्रियाणि च शरीरस्य सामान्यकारणं तेहि प्राणायावायवः पञ्च तदभावे शरीरपातादेवं मांसादिकायाकारानामपि परस्पर विधार्य्य विधारकत्वं एवं महाभूतानि पृथिव्यादीनि मनुष्य वरुण सूर्य गन्धवह अग्निलोकनिवासिनां शरीराणां तानि च परस्परं पृथिव्यां हि गन्धरसरूपस्पर्शशब्दगुणानां पञ्च महाभूतानि परस्परं विधार्य विधारक भावेनावस्थितान्यप्सु चत्वारि तेजसि त्रीणि हे च मारुतीयेति तैर्यग्योन मानुष्य दैवादीनि च विधार्य विधारकभावेनावस्थितानि

योगाङ्गानुष्ठानन्तु द्विधैव कारणत्वं लभते इति योगाङ्गान्यवधार्यन्ते—

यमनियमासनप्राणायामप्रत्याहारधारणा-ध्यानसमाधयोऽष्टावङ्गानि ॥२९॥

यथाक्रमं एतेषाम् अनुष्ठानं स्वरूपञ्च वक्ष्यामः ॥२९॥

तत्र—

अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहयमाः ॥३०॥

तत्राहिंसा सर्व्वथा सर्व्वदा सर्व्वभूतानामनभिद्रोहः ।

नन्वाधाराधेयभावरहितानां कुतस्तत्वमित्यत आह । परस्परार्थत्वादिति मनुष्य-शरीरं हि पशुपक्षिमृगसरीसृपस्थावर शरीरोपयोगेन म्रियते एवं व्याघ्रादि शरीर-मपि मनुष्यपशुमृगादि शरीरोपयोगेन एवं पशुपक्षिमृगादि शरीरमपि स्थावराद्युप-योगेन एवं देव शरीरमपि मनुष्योपहृतच्छागमृगकपिञ्जलमांसाज्य पुरोडाश सह-कारि आम्राप्रस्तरादिभि रित्यमानं तदुपयोगेन एवं देवतामपि वरदान दृष्टा-दिभिर्मनुष्यादीनि धारयतीत्यस्ति परस्परार्थत्वमित्यर्थः शेषं सुगमं ॥ २८ ॥

सम्प्रति न्यूनाधिक सङ्ख्याव्यवच्छेदार्थं योगाङ्गान्यवधारयति । तत्र योगाङ्गान्य वधार्यन्ते इति । य—नि । अभ्यास वैराग्यशब्दावीप्सार्थौ यथायोगमेतेष्वेव स्वरूपतीनान्तरीयकतया चानुभावयितव्या: ॥ २९ ॥

यमनियमाख्यङ्गान्युद्दिश्य यम निर्देशक्रमं सूचयन्नवतारयति तत्रेति । अभा:

उत्तरे च यमनियमास्तन्मूलास्तत्सिद्धिपरतया तत्प्रतिपादनाय प्रतिपाद्यन्ते तदवदातकरणायैवोपादीयन्ते। तथाचोक्तं। स खल्वयं ब्राह्मणो यथा यथा व्रतानि बहूनि समादित्सते तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्त्तमानस्तामेवावदातरूपामहिंसां करोति सत्यं यथार्थे वाङ्मनसे यथादृष्टं यथानुमितं यथाश्रुतं तथा वाङ्मनश्चेति परत्र स्वबोधसंक्रान्तये वागुक्ता सा यदि

योगाङ्गमहिंसामाह सर्व्वथेति। ईदृशीमहिंसां स्तौति उत्तरेचेति तन्मूला इत्यहिंसामवरिपाल्यकृता अप्यकृतकल्पा: निष्फलत्वादित्यर्थ: तत्सिद्धिपरतया एवानुष्ठानमहिंसाचेन्मूलमुत्तरेषां कथं ते अहिंसा सिद्धिपरा इत्यत आह। तत्प्रतिपादनायेति सिद्धिज्ञानं नोत्पत्तिरित्यर्थ: स्यादेतद् हिंसा ज्ञानार्थां यद्युत्तरैरुक्तं तैरन्यतएव तदवगमादित्यत आह तदवदातेति। यद्युत्तरैरनुष्ठीयेरन् अहिंसामलिनास्यादसत्यादिभिरित्यर्थ: अत्रैवागमिकानां सम्मतिमाह। तथाचेति सुगमं। सत्यलक्षणमाह यथार्थे वाङ्मनसे इति। यथा शब्दं साकाङ्क्षां पूरयति यथादृष्टमिति प्रतिसम्बन्धिनं तथा शब्दं प्रतिक्षिपति॥ तथा वाङ्मनश्च विवक्षया कर्त्तव्यायामिति। अन्यथा तु न सत्यं एतल्लक्षणोपपत्तिक्रमाह परत्र परुषे स्वबोध संक्रान्त्ये स्वबोध सदृशबोध जनना यवागूक्ता व्याविता अत: सा यदि न वक्षिता वक्षिता यथा द्रोणाचार्य्येण खतनयाश्वत्थामामरणमायुधमस्त्रधनाश्वत्थामाहत इति पृष्टस्य युधिष्ठिरस्य प्रतिवचनं हस्तिनमभिसन्धाय "सत्यं हतोऽश्वत्थामेति॥ तदिदमुक्तमोत्तरं न युधिष्ठिरस्य स्वबोधं संक्रामयति स्वबोधस्य तस्य हस्तिहनन-विषय इन्द्रियजन्मा नासौ संक्रान्त: किन्त्वन्यएव तस्य तनयवधबोध जात इति

न वञ्चिता भ्रान्ता वा प्रतिपत्तिबन्ध्या वा भवेत् इत्येषा सर्वभूतोपकारार्थं प्रवृत्ता न भूतोपघाताय यदि चैवमप्यभिधीयमाना भूतोपघातपरैव स्यान्न सत्यं भवेत् पापमेव भवेत् तेन पुण्याभासेन पुण्यप्रतिरूपकेन कष्टं तमः प्राप्नुयात् तस्मात् परीक्ष्य सर्वभूतहितं सत्यं ब्रूयात् स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणं। तत्प्रतिषेधः पुनरस्मृहारूपमस्तेयमिति ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः। विषयानामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणमपरिग्रह इत्येते यमाः ॥३०॥

भ्रान्ता वा भ्रान्तिजा भ्रान्तिश्च विवक्षा समये वा श्रेयार्थावधारण समये वा प्रतिपत्त्यावन्ध्या प्रतिपत्तिबन्ध्या यथा मन्दार्थान् प्रति स्त्रीक्षभाषा प्रतिपत्तिबन्ध्यानि निष्प्रयोजना वा स्यादिति यथाऽनपेक्षिताभिधाना वाक् तत्र हि परत्र स्वबोधस्य संक्रान्तिरप्यसंक्रान्तिरेव निष्प्रयोजनत्वादिति एवं स्वदर्शनमपि सत्यं परापकार फलं सत्याभासं न तु सत्यमित्याह एषेति तदृक्षया सत्यतपसत्तत्करैः सार्थगमनं पृष्टस्य सार्थगमनाभिधानमिति अभिधीयमानोच्यमाना श्रेयसुगमं अभावस्य भावधीन निरूपणतया स्तेयलक्षणमाह स्तेयमशास्त्र पूर्वकमिति विशेषेण सामान्यं लक्षते इत्यर्थः मानस व्यापारपूर्वकत्वाद्वाचनिक कायिक व्यापारयो प्राधान्यान्मनो व्यापार उक्तोऽस्पृहा रूपमिति ब्रह्मचर्यं स्वरूपमाह गुप्तेति। संयतोभस्थोपि हि स्त्रीप्रेक्षण तदालाप कन्दर्पायतन तदङ्ग स्पर्शन श्रुतो न ब्रह्मचर्यं वानिति तन्निराकर्तुमुक्तं गुप्तेन्द्रियस्येति इन्द्रियान्तराण्यपि तत्र स्तोत्राणीति अपरिग्रह स्वरूप-

ते तु—

जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् ॥३१॥

तत्राहिंसा जात्यवच्छिन्ना मत्स्यबन्धकस्य मत्स्येष्वेव नान्यत्र हिंसा सैव देशावच्छिन्ना न तीर्थे हनिष्यामिति सैव कालावच्छिन्ना न चतुर्दश्यां न पुण्ये अहनि हनिष्यामिति सैव त्रिभिः कैवर्तस्य समयावच्छिन्ना देवब्राह्मणार्थेनान्यथा हनिष्यामिति यथा च क्षत्रियाणां युद्धएव हिंसान्यत्रेति एभिर्जातिदेशकालसमयैरनवच्छिन्ना अहिंसादयः सर्वथैव परिपालनीयाः सर्वभूमिषु सर्वविषयेषु सर्वथैवाविदितव्यभिचाराः सार्वभौमा महाव्रतमित्युच्यन्ते ॥ ३१ ॥

माह विषयाणामिति तत्र सङ्गदोष उक्तो भोगाभ्यासमनु विवर्द्धन्ते रागाः क्षीयन्ते चेन्द्रियाणामिति हिंसालक्षणस्य दोषोनानुपहत्य भूतान्युपभोगः सम्भवतीति अशास्त्रीयाणामयत्नोपलभ्यानामपि विषयाणां निन्दित प्रतिग्रहादिरूपार्जन दोष दर्शनात् शास्त्रीयाणामप्युपार्जितानाञ्च रक्षणादि दोषदर्शनाद स्वीकरणमपरिग्रहः ॥ ३० ॥

सामान्यत उक्ता यादृशाः पुनर्योगीनामुपादेयास्तादृशान् वक्तुं सूत्रमवतारयति। तेविति। जा—तं। सर्वासु जात्यादि लक्षणासु भूमिषु विदिताः सार्वभौमाः अहिंसादय इत्यन्वयाप्यवच्छेद ऊहनीयः सुगमं भाष्यं ॥३१॥

शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि-नियमाः ॥३२॥

तत्र शौचं मृज्जलादिजनितं मेध्याभ्यवहरणादि च बाह्यमाभ्यन्तरं चित्तमलानामाक्षालनं। सन्तोषः सन्निहितसाधनादधिकस्यानुपादित्सा। तपोद्वन्द्वसहनं द्वन्द्वं च जिघत्सापिपासे शीतोष्णे स्थानासने काष्ठमौन कारमौने च व्रतानि चैव यथायोगं कृच्छ्रचान्द्रायणसान्तपनादीनि। स्वाध्यायो मोक्षशास्त्राणा मध्ययनं प्रणवजपोवा ईश्वरप्रणिधानं तस्मिन् परमगुरौ सर्वकर्मार्पणं "ग्रथ्यासनस्थोथ पथि व्रजनं वा स्वस्थः परित्क्षीणवितर्कजालः। संसारवीजक्षयमीक्षमाणः स्वात्मन्यमुक्तोऽमृतभोगभागी।" यत्रेदमुक्तं ततः प्रत्यक् चेतनाधिगमोप्यन्तराया भावश्चेति ॥ ३२ ॥

शौचादि नियममाचष्टे। शौ-मा:। व्याचष्टे शौचमिति। आदि शब्देन मौमयादयो गृह्यन्ते। गोमुखयावकादि। मेध्यं तस्याभ्यवहरणादि आदिशब्दात् ग्रासपरिमाणसंख्यानि यमादयोयाज्ञा: मेध्याभ्यवहरणादि जनितमिति वक्तव्ये मेध्याभ्यवहरणादि चेत्युक्तं कार्येकारणोपचारात् चित्तमला: मदमानासूयादयस्तदपनयो मनःशौचं प्राणयात्रामात्र हेतीरभ्यधिकस्यानुपादित्सा सन्तोषः मागेव स्वीकरण परित्यागादिति विशेषः काष्ठमौनमित्यनेनापि स्वाभिप्रायाप्रकाशनं अवचनमाकार मौन' परिक्षीण वितर्कजाल इति वितर्को वक्ष्यमाण: संशय विपर्ययौ चेति एतावता ग्रहाभिसन्धिरुक्त: एते च यमनियमा: विष्णुपुराणे उक्ता:

एतेषां यमनियमानाम्—

वितर्कबाधने प्रतिपक्षभावनम् ॥३३॥

यदास्य ब्राह्मणस्य हिंसादयो वितर्काजायेरन् हनिष्यामीत्यहमपकारिणमनृतमपि वक्ष्यामि द्रव्यमप्यस्य स्वीकरिष्यामि दारेषु चास्य व्यवायी भविष्यामि परिग्रहेषु चास्य स्वामी भविष्यामीति एवमुन्मार्गप्रवलवितर्कज्वरेणाति दौर्मनेन बाध्यमानस्तत् प्रतिपक्षान् भावयेत् घोरेषु संसारारारेषु पच्यमानेन मया शरणमुपागतः सर्वभूताभयप्रदानेन योगधर्मः स खल्वहं त्यक्त्वा वितर्कान् पुनस्तानाददान

"ब्रह्मचर्यमहिंसा च सत्यास्तेयापरिग्रहान्। सेवेत योगी निष्कामो योग्यतां स्वमनो नयन्। स्वाध्याय शौच सन्तोषः तपांसि नियतात्मवान्। कुर्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः" एते यमाः स नियमाः पञ्च पञ्च प्रकीर्तिताः। विशिष्ट फलदाः काम्या निष्कामानां विमुक्तिदाः" इति ॥३२॥

ये यां ब्रह्मवधिविद्वानीति एषामपवादसम्भवे तत् प्रतिकारोपदेश परं सूत्रमवतारयति एतेषां यमनियमानामिति। सूत्रं वि—नं। वितर्कानां भाष्येनास्ति तिरोहितमिव किञ्चन तत्र वितर्कानां स्वरूप प्रकार कारणधर्मफलभेदान् प्रतिपक्ष भावना विषयान् प्रतिपक्षभावना स्वरूपाभिधित्सया सूत्रयति वि—नं। व्याचष्टे तत्र हिंसेति प्राणवध्रेदखापरिसंक्लेशत्वान्नियम विकल्प समुच्चया सम्भविनः हिंसा हिंसादिषु तत्राधर्मतः तम; समुद्रेकै

स्तुष्यः श्वश्रूस्तेनेति भावयेत् यथा श्वावान्तावले हृत तथा त्यक्तस्य पुनरादान इति एवमादि सूत्रान्तरेष्वपि योज्यम् ॥ ३३ ॥

वितर्कहिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम् ॥३४॥

तत्र हिंसा तावत् कृतकारितानुमोदितेति त्रिधा लोभेन मांसचर्मार्थेन क्रोधेनापकृतमनेनेति मोहेन धर्मोभविष्यति लोभक्रोधमोहाः पुनस्त्रिविधाः मृदुमध्याधिमात्रा इत्येवं सप्तविंशति भेदा भवन्ति हिंसायाः मृदुमध्याधिमात्राः पुनस्त्रेधा मृदुमृदुर्मध्यमृदुस्तीव्रमृदुरिति। तथा मृदुमध्यः मध्यमध्य स्तीव्रमध्यइति तथा मृदुतीव्रो मध्यतीव्रोऽधिमात्रतीव्र इति एवमेकाग्रीतिभेदा हिंसा भवति सा पुनर्नियमविकल्पसमुच्चयभेदादसङ्ख्यया प्राणभृद्दस्यापरिसंख्येयत्वा-

सति चतुर्विध विपर्यय लक्षणस्या ज्ञानस्याप्युदय इत्यज्ञान फलत्वमुक्तं तेषामिति दुःखज्ञानानन्त फलत्वमेव हि प्रतिपक्षभावनं तदभ्यासेभ्यो निवृत्तिरिति। तदेव प्रतिपक्षभावनं स्फीरयति वध्यस्य पश्वादेर्वीर्य प्रयत्नं कायव्यापार हेतुं प्रथमाक्षिपति यूपनियोजन तेन हि पशोरप्रागल्भ्यं भवति क्षीयमति स्फुटम् ॥३३॥

उक्ता। यमनियमास्तदपवादकाश्च वितर्काः प्रतिपक्षभावनाती ज्ञानिरुक्ता

दिति एवमनृतादिष्वपि योज्यं ते खल्वमी वितर्का दुःखाज्ञानानन्तफलाइति प्रतिपक्षभावनं दुःखमज्ञानं चानन्तफलं येषामिति प्रतिपक्षभावनं तथाच हिंसकः प्रथमं तावत् बध्यस्य वीर्य्यमाच्छिनत्ति। ततः शस्त्रादि-निपातेन दुःखयति। ततो जीवितादपि मोचयतीति। ततो वीर्य्याच्चेपादस्य चेतनाचेतनमुपकरणं क्षीणवीर्य्यं भवति दुःखोत्पादान्नरकतिर्य्यक्प्रेतादिषु दुःखमनु भवति जीवितव्यपरोपणात् प्रतिक्षणञ्च जीवितान्ताय वर्त्तमानो-मरणमिच्छन्नपि दुःखविपाकस्य नियतविपाकवेदनीयत्वात् कथञ्चिदेवोच्छ्वसति यदिच कथञ्चित् पुण्यावापगता हिंसा-भवेत्तत्र सुखप्राप्तौ भवेदल्पायुरिति एव मनृतादिष्वपि योज्यं यथा सम्भवं एवं वितर्कानाश्चासुमेवानुगतं विपाक-मनिष्टं भावयन्नवितर्केषु मनः प्रणिदधीत प्रतिपक्षभाव-नात् हेतोर्हेया वितर्का यदास्युरप्रसवधर्म्माणस्तदा तत्कृत-मैश्वर्यं योगिनः सिद्धिसूचकं भवति ॥ ३४ ॥

तद्यथा—

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ॥ ३५ ॥

संप्रत्यप्रत्यूहं यमनियमाभ्यासात् सिद्धिपरिज्ञानसूचकानि चिह्नानि उपन्यस्यति यत्परिज्ञानात् योगी तत्र तत्र कृत कृत्यः कर्त्तव्येषु प्रवर्त्तते इत्याह यदेति ॥ ३४ ॥

शाश्वतिक विरोधा अप्यस्यसन्निधौ सुषकमार्जारादयोऽपि नकुलादयोऽपि भगवतः प्रतिष्ठिताऽहिंसस्य सन्निधानात्तच्चित्तानुकारिणो वैरं परित्यजन्तीति ॥ ३५ ॥

सर्व्वप्राणिनां भवति ॥३५॥

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ॥ ३६ ॥

धार्म्मिकोभूया इति भवति धार्म्मिकः स्वर्गं प्राप्नुहीति स्वर्गं प्राप्नोति अमोघास्य वाग् भवति ॥ ३६ ॥

अस्तेयप्रतिष्ठायां सर्व्वरत्नोपस्थानम् ॥ ३७ ॥

सर्व्वदिक्स्थान्यस्योपतिष्ठन्ते रत्नानि ॥३७॥

ब्रह्मचर्य्यप्रतिष्ठायां वीर्य्यलाभः ॥ ३८ ॥

यस्य लाभादप्रतिघान् गुणानुत्कर्षयति । सिद्धश्च विनेयेषु ज्ञानमाधातुं समर्थो भवति इति ॥ ३८ ॥

सत्यं क्रियासाध्यो धर्म्माधर्म्मौ क्रिया तत्फलञ्च स्वर्गनरकादि ते एव आश्रयतीत्याश्रयस्तस्य भावस्तत्वं तदस्य भगवतो वाचीभवतीति क्रियाश्रयत्वमाह धार्म्मिक इति । फलाश्रयत्वमाह स्वर्गमिति अमोघा अप्रतिहता ॥ ३६ ॥

अस्तेयप्रतिष्ठायां सर्व्वरत्नोपस्थानं सुबोधम् ॥ ३७ ॥

ब्रह्मचर्य्यप्रतिष्ठायां वीर्य्यलाभः । वीर्य्यं सामर्थं यस्य लाभाद प्रतिघान् गुणान् अणिमादीन् उत्कर्षयत्युपचिनोति सिद्धश्च तारादिभि रष्टाभिः सिद्धिभि रूहा पोहापरिणामभिरुपेतो विनेयेषु शिष्येषु ज्ञानं योगतदङ्ग विषयमाधातु समर्थो भवतीति ॥ ३८ ॥

अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः ॥ ३९ ॥

अस्य भवति कोऽहमासं कथमहमासं किंस्विदिदं कथं स्विदिदं कोवा भविष्याम् कथं वा भविष्याम इत्येवमस्य पूर्वान्तिपरान्तमध्येष्वात्मभावजिज्ञासा स्वरूपेणोपावर्त्तते एतायमस्थैर्यसंज्ञयः नियमेषु वक्ष्यमाणः ॥ ३९ ॥

शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः ॥ ४० ॥

स्वाङ्गे जुगुप्सायां शौचे मारभमाणः कायावद्यदर्शी कायानभिष्वङ्गीयति भवति किञ्च परैरसंसर्गः कायस्वभावा-

अपरिग्रहस्थैर्ये जन्म कथन्ता सम्बोधः । निकाय विशिष्टैः देहेन्द्रियादिभिरभिसम्बन्धो जन्म तस्य कथन्ता किं प्रकारता तस्याः सम्बोधः साक्षात्कारः सप्रकारातीन्द्रिय ज्ञानोदिताऽव्यपदिश्य जन्मपरिज्ञानमिति यावत् अतीतं जिज्ञासते कोऽहमासमिति । तस्येव प्रकार भेदमुत्पादे स्थितौच जिज्ञासते कथमहमासमिति । वर्त्तमानस्य जन्मनः स्वरूपं जिज्ञासते । किं स्विदिति शरीरं भौतिकं किंभूतानां समूह साचमाहीस्वित्तेभ्योन्यदिति । अत्रापि कथं स्विदित्यनुषञ्जनीयं क्वचित्पठ्यते एव अभागतं जिज्ञासते के भविष्याम इति अत्रापि कथं स्विदित्यनुषङ्गः एव मस्येति पूर्वान्तीतीतः परान्ते भविष्यन्मध्ये वर्त्तमानस्येत्यात्मनीभावः शरीरादि सम्बन्धस्तस्मिन् जिज्ञासा ततश्च ज्ञानं यो हि यदिच्छति स तत्करोतीति न्यायात् ।

॥ ३९ ॥

शौ—र्थः । अनेन वाह्यशौचे सिद्धि सूचकं कथितं ॥ ४० ॥

वलोकी स्वमपि कायं जिहासुर्मृज्जलादिभिराचालयन्नपि कायशुद्धिमपश्यन् कथं परकायैरत्यन्तमेवाप्रयतैः संसृज्यते।

किञ्च—

स्वत्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥ ४१ ॥

भवन्तीति वाक्यशेषः शुचेः सत्वशुद्धिस्ततः सौमनस्यं तत ऐकाग्र्यं तत इन्द्रियजयस्ततश्चात्मदर्शनयोग्यत्वं बुद्धिसत्वस्य भवतीति। एतच्छौचस्थैर्यादधिगम्यत इति ॥४१॥

तथाचोक्तम्—

सन्तोषादनुत्तमः सुखलाभः ॥ ४२ ॥

यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम्। तृष्णाक्षयसुखस्यैते नार्हतः षोड़शीं कलामिति ॥ ४२ ॥

आन्तरं शौचसिद्धि सूचक माह। किञ्चेति स च चित्तमलानामाचालने चित्तसत्वममलं प्रादुर्भवति वैमल्यात् सौमनस्यं सच्छता सच्छंवेदैकाग्र्यं ततोऽनलब्धात्मेन्द्रियाणां तज्जयाज्जायते आत्म दर्शनयोग्यत्वं बुद्धिसत्वस्य भवतीति ॥ ४१ ॥

सन्तोषः। नविद्यतेऽस्मादुत्तमदित्यनुत्तमः। यथा चोक्तं यज्ञातिना पुरी

कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥ ४३ ॥

निर्वर्त्यमानमेव तपोहिनस्त्यशुद्धावरणमलं तदावरणमलापगमात् कायसिद्धिरणिमाद्या तथेन्द्रियसिद्धिर्दूरश्रवणदर्शनाद्येति ॥ ४३ ॥

स्वाध्यायादिष्टदेवतासम्प्रयोगः ॥ ४४ ॥

देवा ऋषयः सिद्धाश्च स्वाध्यायशीलस्य दर्शनं गच्छन्ति कार्य्यं चास्य वर्त्तन्ते इति ॥ ४४ ॥

समाधिसिद्धिरीश्वरप्रणिधानात् ॥ ४५ ॥

ईश्वरार्पितसर्व्वभावस्य समाधिसिद्धिर्यया सर्व्वमीप्सितमवितथं जानाति देशान्तरे देहान्तरे कालान्तरे च ततोस्य प्रज्ञा यथाभूतं प्रजानातीति ॥ ४५ ॥

यौवनम् यता "या दुस्त्यजोदुर्म्मतिभिर्या न जीर्य्यति जीर्य्यतां। तां तृष्णां सुत्यजन् प्राज्ञः सुखेनैवाभिपूर्य्यते"। तदेतद्दर्शयति। यच्च कामसुखं लोके इत्यादिना ॥ ४२ ॥

तपःसिद्धिसूचकमाह। का—सः। अशुद्धिलक्षणमावरणं तामसमधर्म्मादि अणिमादि महिमा प्राप्तिश्च सुगम् ॥ ४३ ॥

स्वाध्याय सिद्धि सूचक माह। स्वा—गः। सुगम् ॥ ४४ ॥

ई—र्यात्। नच वाच्यमीश्वर प्रणिधानादेव चेत् संप्रज्ञात सिद्धौ च संयोग

उक्ताः सहसिद्धिभिर्यमनियमाः आसनादीनि वक्ष्यामः तत्र ।—

स्थिरसुखमासनम् ॥ ४६ ॥

तद्यथा पद्मासनं वीरासनं भद्रासनं स्वस्तिकं दण्डासनं सोपाश्रयं पर्य्यङ्कं क्रौञ्चनिषदनं हस्तिनिषदनं सुष्ठुनिषदनं समसंस्थानं स्थिरसुखं यथासुखं चेत्येवमादीति ॥ ४६ ॥

पृथक्त्वेन दर्शनत्व कृतार्थता पुरुषार्थताच । नचैव मनन्तरं ततोधारणाध्यान समाधीनां संप्रज्ञात सिद्धौ संप्रज्ञात समान गोचर तयाक्रान्तरेभ्योऽतद्गोचरेभ्योऽत्यान्तरंगत्व प्रतीतेरीश्वर प्रणिधानमपि हीश्वर गोचरं न संप्रज्ञेयगोचरमिति बहिरङ्गमिति सर्व्वमवदातं प्रजानातीति प्रज्ञाव्युत्पत्तिदर्शिता ॥ ४५ ॥

उत्तरसूत्रमवतारयति उक्ताः सहसिद्धिभि र्यमनियमाः आसनादीनि वक्ष्यामः । तत्र स्थि—नं । स्थिरं निश्चलं यत् सुखं सुखावहं तदासनमिति सूत्रार्थः आस्यते अत्र वाऽनेन इत्यासनं। तस्य प्रभेदानाह तद्यथेति पद्मासनं प्रसिद्धं । स्थितस्यैकतरः पादोभूम्यस्तः एकतरस्याकुञ्चितजानोरुपरिन्यस्तः । इत्येतद्वीरासनं । पादतले वृषण सभीपे संपुटीकृत्य तस्योपरि पाणि कच्छपिकां कुर्य्यात् तद्भद्रासनं । सव्यमाकुञ्चित चरणं दक्षिणजङ्घोर्व्वन्तरे दक्षिणञ्चाकुञ्चितं वामजङ्घोर्व्वन्तरे निक्षिपेदेतत् स्वस्तिकं । उपविश्य श्लिष्टाङ्गुलिकौ श्लिष्टगुल्फौभूमिश्लिष्ट जङ्घोरुपादौ प्रसार्य्य दण्डासन मभ्यसेत् योगपट्टक योगात्सोपाश्रयं जानुप्रसारित बाहोः शयनं पर्य्यङ्कः क्रौञ्चनिषदनादीनि । क्रौञ्चादीनां निषद्यानां संस्थानदर्शनात् प्रत्येतव्यानि पार्ष्णिपादाग्राभ्यां द्वयोराकुञ्चितयोरन्योन्य सम्पीड़नं सम संस्थान येन संस्थानेनावस्थितस्य स्थैर्यं सुखं

प्रयत्नशैथिल्यानन्त्यसमापत्तिभ्याम् ॥ ४७ ॥

भवतीति वाक्यशेषः प्रयत्नोपरमात् सिद्ध्यत्यासनं येन नाङ्गमेजयो भवति अनन्ते वा समापन्नं चित्तमासनं निर्वर्त्तयतीति ॥ ४७ ॥

ततो द्वन्द्वानभिघातः ॥ ४८ ॥

शीतोष्णादिभिर्द्वन्द्वैरसनजयान्नभिभूयते ॥ ४८ ॥

सिध्यति तदासनं स्थिरं सुखं तत् तच्च भगवतः सूत्रकारस्य सम्मतं तस्य विवरणं यथा सुखञ्चेति ॥ ४६ ॥

आसन स्वरूपमुक्त्वा तत् साधनमाह। प्र—भ्यां। सांसिद्धिकोहि प्रयत्नः शरीरधारकी न योगाङ्गत्वोपदेष्टव्यासनस्य कारणं तस्य तत् कारणत्वे उपदेश वैयर्थ्यात् सम्मत एव तत्सिद्धेः तस्मादुपदेशष्टव्यस्यासनस्यायमसाधकः विरोधीच स्वाभाविकः प्रयत्नः तस्यच यादृच्छिकासन हेतुत्वासन नियमोपक्षीणत्वात् तस्मादुपदिष्ट नियमासन मध्यस्थता स्वाभाविक प्रयत्नशैथिल्यात्मा प्रयत्न आस्थेयो नान्यथोपदिष्टमासनं सिध्यतीति स्वाभाविक प्रयत्न शैथिल्यमासन सिद्धिहेतुः अनन्ते वा नागनायके स्थिरतरफणा सहस्र विधृत विश्वम्भरा मण्डले समापन्नं चित्तमासनं निर्वर्त्तयतीति ॥ ४७ ॥

आसन विजय सूचक माह। त—तः। निगदव्याख्यातं भाष्यं ॥ ४८ ॥

तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥ ४९ ॥

सत्यासनजये बाह्यस्य वायोराचमनं श्वासः। कोष्ठस्य वायोर्निःसारणं प्रश्वासः तयोर्गतिविच्छेद उभयाभावः प्राणायामः ॥ ४९ ॥

स तु—

बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मः ॥ ५० ॥

यत्र प्रश्वासपूर्वको गत्यभावः स बाह्यः यत्र श्वासपूर्वको गत्यभावः स आभ्यन्तरः तृतीयस्तम्भवृत्तिर्यत्रोभयाभावः

आसनमप्युक्तं विष्णुपुराणे एवं भद्रासनादीनां समाख्याय गुणैर्युतं इति आसनानन्तरं तत् पूर्वकतां प्राणायामस्य दर्शयन् तल्लक्षणमाह त—मः। रेचक पूरक कुम्भकेष्वस्ति श्वास प्रश्वासयोर्गति विच्छेद इति प्राणायाम सामान्य लक्षणमेतदिति तथाहि यत्र बाह्यवायुराचम्यान्तर्धार्य्यते पूरके तत्रास्ति श्वासप्रश्वासयोर्गति विच्छेदः यत्रापि कोष्ठीवायुर्विरेच्य बहिर्धार्य्यते रेचके तत्रास्ति श्वासप्रश्वासयोर्गतिविच्छेदः एवं कुम्भकेपि इति तदेतद्व्याख्येयीक्रियते। सत्यासनेति ॥ ४९ ॥

प्राणायाम विशेष चयलक्षण परं सूत्रमवतारयति सस्तिति। वा—क्ष्मः। वृत्तिशब्दः प्रत्येकं संबध्यते। रेचक माह यत्र प्रश्वासेति। पूरकमाह यत्रश्वासेति। कुम्भक माह तृतीय इति। तदेव स्फुटयति यत्रोभयोः श्वास प्रश्वासयो. सकृदेव विधारकात् प्रयत्नादभावो भवति न पुनः पूर्ववदापरण

सकृत्प्रयत्नाद् भवति यथा तप्ते न्यस्तमुपले जलं सर्व्वतः सङ्कोचमापद्यते । तथा द्वयोर्युगपद्गत्यभावदिति त्रयोप्येते देशेन परिदृष्टाः द्रुयानस्य विषयो देशदृति । कालेन परिदृष्टाः क्षणानामियत्तावधारणेनावच्छिन्ना दृत्यर्थः । सङ्ख्याभिः परिदृष्टाः एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घात स्तद्विपरीतस्यैतावद्भिः द्वितीय उद्घातः एवं तनोयः एवं मृदुरेवं मध्य एवं तीव्र इति सङ्ख्यापरिदृष्टः स खल्वयमेवं मभ्यस्तो दीर्घसूक्ष्मः ॥ ५८ ॥

प्रयत्नौक्यप्रविधारक प्रयत्नो नापि रेचक प्रयत्नैक्य विधारण प्रयत्नोपेदाते किन्तु यथा तप्ते उपले निहितं जलं परिशुष्यत् सर्व्वतः संकोचमापद्यते एव मयमपि मारुतो वहनशीलो बलवद्विधारक प्रयत्न निरुद्धक्रियः शरीरएव सूक्ष्मीभूतोवतिष्ठते न तु पूरयति येन पूरक: न तु रेचयति येन रेचक इति । द्वयानस्य देशो विषयः प्रादेश वितस्तिहस्तादि परिमितो निवाते प्रदेशे ईषिका तूलादि क्रियानुमितो वाह्य एव मान्तरोष्मापादतलमामस्तकं पिपीलिका स्पर्शसदृशेनानुमितः स्पर्शन निमेष-क्रियावच्छिन्नस्य कालस्य चतुर्थो भागः क्षणस्तेषामियत्तावधारणेनावच्छिन्ना स्वज्ञान-मण्डलं पाणिना चिः परामृश्यत्कोटिकावच्छिन्नः कालोमात्रा ताभिः षट्विंशन्मा-त्राभिः परिमितः प्रथम उद्घातो मन्दः स एव द्विगुणीकृतो द्वितीयो मध्यमः स एव त्रिगुणीकृत स्तृतीय स्तीव्रस्तमिमं सङ्ख्यापरिदृष्टं प्राणायाममाह सङ्ख्याभिरिति । स्वस्थस्य हि पुंसः श्वास प्रश्वास क्रियावच्छिन्नेन कालेन यथोक्तं कोटिका कालः समानः प्रथमोद्घात कर्म्मतां नीतः उद्घातो विजितो वशीकृतो निरुद्धः क्षणा-नामियत्ताकालो विकचितः श्वास प्रश्वासेयत्ता संख्येति कथञ्चिद्दृष्टः स्वस्वयं प्रत्यह

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥ ५१ ॥

देशकालसङ्ख्याभिर्बाह्यविषयः परिदृष्ट आक्षिप्तः तथाभ्यन्तरविषयः परिदृष्ट आक्षिप्तः उभयथा दीर्घसूक्ष्मः तत्पूर्व्वको भूमिजयात् क्रमेणोभयोर्गत्यभावश्चतुर्थः प्राणायामः । तृतीयस्तु विषयानालोचितो गत्यभावः सकृदारब्धएव देशकालसङ्ख्याभिः परिदृष्टोदीर्घसूक्ष्मश्चतुर्थस्तु श्वासप्रश्वासयोर्व्विषयावधारणात् क्रमेण भूमिजयादुभयाक्षेपपूर्व्वको गत्यभावश्चतुर्थः प्राणायामः इत्ययं विशेषइति ॥ ५१ ॥

नभस्वो दिवसपक्षमासादिक्रमेण देशकाल प्रचय व्याप्तितया दीर्घः परमनैपुण्यं समधिगमनीयः तयाच सूक्ष्मो न तु मन्दतया ॥ ५० ॥

एवं त्रयीविशेषा लक्षिताः चतुर्थं लक्षयति वा—र्थः । व्याचष्टे देशकाल सङ्ख्याभिरिति आक्षिप्तोऽभ्यासवशीकृताद्रूपादवरोपितः सोपि दीर्घसूक्ष्म एव तत् पूर्व्वकी बाह्याभ्यन्तर विषयः प्राणायामी देशकाल संख्यादर्शन पूर्व्वकः न चासौ चतुर्थः तृतीयइव सकृत् प्रयत्नादुदाय जायते किन्त्वभ्यस्यमानस्तां तामवस्थामापन्नः तत्तदवस्था विजयानुक्रमेण भवतीत्याह भूमिजयादिति ।

नन्वभयीर्गत्यभावस्तत्रभवत्तावप्यस्तीति । कीदृशस्य विशेष इत्यत आह । तृतीय इति अनालोचन पूर्व्व सकृत्प्रयत्न निर्वर्त्तित तृतीयश्चतुर्थस्त्वालोचन पूर्वोवद्र प्रयत्न निर्वर्त्तनीय इति विशेषः तयोः पूरकरेचकयोर्विषयो नालोचितोयं तु देशकाल सङ्ख्याभिरालोचित इत्यर्थः ॥ ५१ ॥

ततः क्षीयते प्रकाशावरणम् ॥ ५२ ॥

प्राणायामानभ्यस्यतोऽस्य योगिनः क्षीयते विवेकज्ञानावरणीयं कर्म्म यत्तदाचक्षते । महामोहमयेन इन्द्रजालेन प्रकाशशीलं सत्वमाहृत्य तदेवाकार्य्ये नियुङ्क्ते इति तदस्य प्रकाशावरणं कर्म्म संसार निबन्धनं प्राणायामाभ्यासात् दुर्ब्बलं भवति प्रतिक्षणं च क्षीयते । तथाचोक्तम् "तपो न परं प्राणायामात्ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति" किञ्च धारणासु च योग्यता मनसः प्राणायामाभ्यासादेव । "प्रच्छर्द्दनविधारणाभ्यां वा प्राणस्येति" वचनात् ॥ ५२ ॥

प्राणायामस्यावान्तर प्रयोजनमाह । त—र्यं । आव्रियतेऽनेन बुद्धि सत्व प्रकाश इत्यावरणं क्लेशः पापं च व्याचष्टे प्राणायामादिति । ज्ञायतेऽनेनेति ज्ञानं बुद्धि सत्व प्रकाशः विवेकस्य ज्ञानं विवेकज्ञानमावृणोतीति विवेक ज्ञानावरणीयं भव्यगेय प्रवचनीयादीनां कर्त्तरि निपातनस्य प्रदर्शनार्थत्वात् कोपनीयरक्षनीयवत् अत्रापि कर्त्तरि कृत्यप्रत्ययः कर्म्मशब्देन तज्जन्य मपुण्यं तत् कारणं क्लेशं लक्षयति अत्रैवामिना मनुमति माह । यत्तदाचक्षत इति महामोहीरागः तदविनिर्भाग वर्त्तिन्यविद्यापि तदयहणेन गृह्यते अकार्य्यमधर्म्मः ननु प्राणायाम एव चेत्पापमानं क्षिणोति कृतं तर्हि तपसेत्यत आह दुर्ब्बलं भवतीति न तु सर्व्वथा क्षीयते अतस्तत्प्रचयाय तपोपेक्षते इति अत्राप्यागमिनामनुमतिमाह । तथा चोक्तमिति । मनुरप्याह प्राणायामैर्दहेद्दोषानिति । प्राणायामस्य योगाङ्गता विष्णुपुराणोक्ता "प्राणाख्य मनिलं वश्यमभ्यासात् कुरुते तु यः । प्राणायामः सविज्ञेय सबीजोऽबीजएव च । परम्परेणाभिभवं प्राणापानौ यदानिलौ । कुरुतस्तद्वि-

अथ कः प्रत्याहारः—

स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥ ५३ ॥

स्वविषयसम्प्रयोगाभावे चित्तस्वरूपानुकारइवेति चित्तनिरोधे चित्तवन्निरुद्धानीन्द्रियानि नेतरेन्द्रियजयवदुपायान्तरमपेक्षन्ते। यथा मधुकरराजं मक्षिका उत्पतन्तमनूत्पतन्ति निविशमान मनुनिविशन्ते तथेन्द्रियाणि चित्तनिरोधे निरुद्धानीत्येष प्रत्याहारः ॥ ५३ ॥

धानेन तृतीयं संयमाङ्गत्वं" इति। किञ्च व्यासः "प्राणायामैरिदं मनः स्थिरीकुर्व्वन् धारणासु योग्यं करोति ॥ ५२ ॥

तदेवं यमादिभिः संस्कृतः संयमाय प्रत्याहार मारभते तस्य लक्षणं सूत्रमवतारयितुं पृच्छति अथेति। स्व—रः। चित्तमपि मोहनीय रञ्जनीय क्षोपनीयैः शब्दादिभिः विषयैर्नसंप्रयुज्यते तदसंप्रयोगाभ्यासादीन्यपि न संप्रयुज्यत इति सोयमिन्द्रियाणां चित्तस्वरूपानुकारः यत् पुन स्वं चित्तमभिनिविशते न तच्चेन्द्रियाणां बाह्यविषयाणा मनुकारोपि अत उक्तं मनुकारइवेति स्वविषया संप्रयोगस्य साधारणस्य धर्म्मस्य चित्तानुकार निमित्तत्वं मनसा दर्शयति स्वेति। अनुकारं विहणोति चित्तनिरोध इति। द्वयोर्निरोधे निरोधहेतुश्च प्रयत्न सुल्यइति सादृश्यं। अत्रैव दृष्टान्त माह यथा मधुकर राजमिति। दार्ष्टान्तिके योजयति तथेति। अत्रापि विष्णुपुराण वाक्यं। "शब्दादिष्वनुषक्तानि निगृह्याचाक्षि योगवित्। कुर्य्याच्चित्तानुकारीणि प्रत्याहार परा-

ततः परमा वश्यतेन्द्रियाणाम् ॥ ५४ ॥

शब्दादिष्वव्यसनमिन्द्रियजय इति केचित् शक्तिर्व्यसनं व्यस्त्येनं श्रेयस इति अविरुद्धा प्रतिपत्तिर्न्याय्या शब्दादिसम्प्रयोगः स्वेच्छयेत्यन्ये रागद्वेषाभावे सुखदुःखशून्यं शब्दादि ज्ञानमिन्द्रियजयइति केचित् चित्तैकाग्र्यादप्रतिपत्तिरेवेति जैगीषव्यः ततश्च परमा त्वियं वश्यता यच्चित्तनिरोधे

यत्नः"। तस्य प्रयोजनं तत्रैव दर्शितं "वश्यता परमा तेन जायते निश्चलात्मनाम्। इन्द्रियाणामवश्यैस्तैर्नै योगी योगसाधकः" इति ॥ ५३ ॥

अस्यानुवादकं मूत्रं त—णां। ननु सन्ति किमन्या अपरमा इन्द्रियाणां वश्यता या अपेक्ष्य परमेयमुच्यते अत्रा ता दर्शयति। शब्दादिष्विति एतदेव विवृणोति। शक्तिः रागोव्यसनं कया व्युत्पत्त्या व्यस्यति क्षिपति निरस्त्येनं श्रेयस इति तद्भावो ऽव्यसनं वश्यता। अपरामपि वश्यतामाह अविरुद्धा श्रुत्याद्यविरुद्धं शब्दादिसेवनं तद्विरुद्धेष्वप्रवृत्तिः सैव न्याय्या न्यायादनपेता यतः अपरामपि वश्यतामाह शब्दादि संप्रयोग इति शब्दादिष्विन्द्रियाणां संप्रयोगः स्वेच्छया भोग्येषु स स्वस्यै स्वतन्त्रो न भोग्यतन्त्रइत्यर्थः। अपरामपि वश्यतामाह रागद्वेषाभावे सुखदुःखशून्यं माध्यस्थेन शब्दादि ज्ञानं इत्येके सूत्रकाराभिमता।

परमर्षि संमतामाह चित्तस्यैकाग्र्यात् सहेन्द्रियैरप्रवृत्तिरेव शब्दादिष्विति जैगीषव्यः। अस्याः परमतामाह परमात्विति तु शब्दो वश्यतान्तरेभ्यो विशिनष्टि वश्यतान्तराणि हि विषयाग्नौ विषसम्प्रयोगशालितया क्लेशविषसम्पर्कशङ्कानापक्रामन्ति नहि विषविद्यावित् प्रकृष्टोपि वशीकृत भुजङ्गमो भुजङ्गमगर्ते निधाय स्वपिति विस्रब्धः इयन्तु वश्यता विदूरीकृत निखिल विषयव्यतिषङ्गनिराशङ्कतया

निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवत् प्रयत्नान्तरमपेक्षन्ते योगिनइति ॥ ५४ ॥

इति पातञ्जले योगशास्त्रे साङ्ख्यप्रवचने
साधननिर्देशोनाम द्वितीय पादः ॥ २ ॥

परमेत्युच्यते नेतरेन्द्रिय जयवदिति। यथा यतमानसंज्ञायामेकेन्द्रिय जयेपीन्द्रियान्तर जयाय प्रयत्नान्तरं मपेक्षते नचैवं चित्तनिरोधे बाह्येन्द्रिय निरोधाय प्रयत्नान्तरापेक्षेत्यर्थः ॥ ५४ ॥

क्रियायोगं जगौ क्लेशान् विपाकान् कर्म्मणामिह।
तत् व्यूहानवं द्वितीये पादे योगस्य पञ्चकमिति ॥ २ ॥

इति महामहोपाध्याय वाचस्पतिमिश्रविरचितायां पातञ्जलभाष्यव्याख्यायां
साधननिर्देशोनाम द्वितीयपादः ॥२॥

विभूतिपादः ।

उक्तानि पञ्च बहिरङ्गानि साधनानि धारणा वक्तव्याः—

देशबन्धश्चित्तस्य धारणा ॥ १ ॥

नाभिचक्रे हृदयपुण्डरीके मूर्ध्नि ज्योतिषि नासिकाग्रे जिह्वाग्रइत्येवमादिषु देशेषु बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बन्ध इति बन्धोधारणा ॥ १ ॥

प्रथम द्वितीय पादाभ्यां समाधिस्तत्साधनं चोक्तम् । तृतीयपादे ततप्रवृत्त्यनुगुणाः अङ्गीत्पादहेतवो विभूतयो वक्तव्याः ताश्च संयमसाध्याः संयमश्च धारणाध्यानसमाधिसमुदाय इति विभूति साधनतया पञ्चभ्यश्च योगाङ्गेभ्यो बहिरङ्गेभ्योऽक्षाङ्गत्वयस्यान्तरङ्गतया विशेष ज्ञापनार्थं मत्र त्रयस्योपन्यासः तत्रापि च धारणाध्यानसमाधीनां कार्यकारणभावेन नियतपौर्वापर्यत्वात्तदनुरोधेनोपन्यासक्रम इति प्रथमं धारणा लक्षणीयेत्याह उक्तानीति । देशाध्यात्मिक देशमाह । नाभिचक्र इति । आदिशब्देन तालादयो ग्राह्याः बन्धः सम्बन्धः । बाह्यदेशमाह बाह्यइति । बाह्ये च न स्वरूपेण चित्तस्य सम्बन्धः सम्भवतीत्युक्तं वृत्तिमात्रेण ज्ञानमात्रेण इति अत्रापि पुराणं "प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियं । वशीकृत्य ततः कुर्यात्चित्तस्थानं शुभाश्रये' शुभाश्रया बाह्या हिरण्यगर्भ वासव प्रजापति प्रस्तुत्य इदञ्च तच्चोक्तम्। "मूर्त्तं भगवतोरूपं सर्व्वावयव निष्पृहम् । एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्य्यते॥ तत्र मुर्त्तं हरेरूपं तच्चिन्त्य नराधिप। तत् शून्यता मनाधारा धारणा सोपपद्यते । प्रसन्न वदनं चारु पद्मपत्रनिभेक्षणम् । सुकपोलं सुविस्तीर्णं ललाट फलकोज्वलम् । समकर्णान्त विन्यस्त चारुकुण्डलभूषणम् । कम्बुग्रीवं सुविस्तीर्णं श्रीवत्साङ्कित वक्षसम् । वलीविभङ्गिना मग्नमाभिना चोदरेणच । प्रलम्बाष्टभुजं विष्णु मथवापि चतुर्भुजम् । समस्थितोरुजङ्घञ्च खड्गिकाङ्कि करास्बुजम् । चिन्तये

तत्र प्रत्ययैकतानता ध्यानम् ॥ २ ॥

तस्मिन् देशे ध्येयालम्बनस्य प्रत्ययस्यैकतानता। सदृशप्रवाहःप्रत्ययान्तरेणापरामृष्टो ध्यानम् ॥ २ ॥

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥ ३ ॥

ध्यानमेव ध्यायाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात्तदा समाधिरित्युच्यते ॥ ३ ॥

ब्रह्मभूतं तं पीतनिर्मलवाससम्। किरीट चारु केयूर कटकादि विभूषितम्। शार्ङ्गचक्रगदा खड्ग शङ्खाच वलयान्वितम्। चिन्तयेत्तन्मयी योगी समाधायात्ममानसम्। तावत् यावत् दृढ़ीभूता तवैव नृप धारणा। एतदातिष्ठतीत्यदा स्वेच्छया कर्म्म कुर्व्वतः। नापयाति यदा चित्तं सिद्धां मर्य्यंत तां तदेति" ॥ १ ॥

धारणा साध्य ध्यानं लक्षयति। त—नं। एकतानता एकाग्रता सुगमं भाष्यम्। पुराणं "तद्रूप प्रत्ययैकाग्र्य सन्ततिश्चान्य निष्पृहा। तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृपेति" ॥ २ ॥

ध्यानसाध्यं समाधिं लक्षयति। त—धिः। व्याचष्टे। ध्यानमेवेति। ध्येयाकारनिर्भासमिति। ध्येयाकारस्य निर्भासो न ध्यानाकारस्येति अतएवाह। शून्यमिति ननु शून्यंचेत् कथं ध्येयं प्रकाशतेत्याह इवेति। अत्रैव हेतुमाह। ध्येयस्वभावावेशादिति। अत्रापि पुराणम् "तस्यैव कल्पनाहीनं स्वरूप

त्रयमेकत्र संयमः ॥ ४ ॥

तदेतत् धारणाध्यानसमाधित्रयमेकत्र संयमः एक विषयाणि त्रीणि साधनानि संयम इत्युच्यते तदस्य त्रयस्य तान्त्रिकी परिभाषा संयमः इति ॥ ४ ॥

तज्जयात् प्रज्ञालोकः ॥ ५ ॥

तस्य संयमस्य जयात् समाधिप्रज्ञाया भवत्यालोको यथा यथा संयमः स्थिरपदो भवति तथा तथा समाधिप्रज्ञा विशारदी भवति ॥ ५ ॥

ग्रहणं हि यत् । मनसा ध्याननिष्ठाय समाधिः सोभिधीयते" इति । ध्येयात् ध्यानस्य भेदः कल्पना तद्धीनमित्यर्थं अष्टाङ्ग योगमुक्ता खाङ्किकाय. केशिध्वज उपसंहारः । "चेतन्न करणी ज्ञाणं करणं तदचेतनं । निष्पाद्य-मुक्तिकार्य्यं वै कृतकृत्यं निवर्त्तते" इति ॥ ३ ॥

धारणा ध्यान समाधि रित्येतत् त्रयस्य तत्र तत्र नियुज्यमानस्य प्रातिस्विक संज्ञोच्चारणे गौरवं स्यादिति लाघवार्थं परिभाषा सूत्रमवतारयति च—मः । व्याचष्टे । एकविषयाणीति वाचकत्र अङ्गाम नयति तदस्येति । तन्त्रायते व्युत्पाद्यते योगी येन शास्त्रेण तत्तन्त्रं तदभवा तान्त्रिकी संयमः प्रदेशः परिणाम-त्रय संयमादित्येवमादयः ॥ ४ ॥

संयम विजयस्याभ्यास साधनस्य फलमाह । तत्—कः प्रत्ययान्तरानभिभूतस्य निर्मले प्रवाहेऽवस्थानमालोकः प्रज्ञायाः सुगमं भाष्यं ॥ ५ ॥

तस्य भूमिषु विनियोगः ॥ ६ ॥

तस्य संयमस्य जितभूमेर्यानन्तराभूमिस्तत्र विनियोगः। नह्यजिताधरभूमिरनन्तर भूमि विलङ्घ्य प्राप्तभूमिषु संयमं लभते तद्भावाच्च कुतः तस्य प्राज्ञालोक ईश्वरप्रसादाज्जितोत्तर भूमिकस्य च नाधारभूमिषु परचित्तज्ञानादिसंयमोयुक्तः कस्मात् तदर्थस्यान्यतएवावगतत्वात् भूमेरस्या इयमनन्तरा भूमिरित्यत्र योग एवोपाध्यायः कथमेवमुक्तम्। "योगेन योगोज्ञातव्यो योगोयोगात् प्रवर्त्तते। योऽप्रमत्तस्तु योगेन स योगे रमते चिरमिति" ॥६॥

क्व पुनर्विनियुक्तस्य संयमस्य फलमेतदित्यत आह तस्य—मः। भूमिं विशेषयति भाष्यकारः तस्येति जिताद्याभूमेः यानन्तरा भूमिरवस्था अजिता तत्र विनियोगः स्थूलविषये वितर्के समाधौ वशीकृते संयमेन संयमस्याविजिते निर्वितर्के विनियोगः तस्मिन्नपि वशीकृते सविचारे विनियोगः एवं निर्विचारे विनियोगः इत्यर्थः अतएव स्थूलविषय समापत्ति सिद्धौ सत्यां पुराणे "तत्तदायुध भूषणापनयेन सूक्ष्म विषयः समाधिरवतारितः ततः। शंखगदाचक्रशार्ङ्गादि रहितं बुधः। चिन्तयेत् भगवद्रूपं प्रशान्तं साक्षसूत्रकं। यदा च धारणा तस्मिन्नवस्थानवती ततः। किरीट केयूर सुखैर्भूषणै रहितं स्मरेत्। तदेकावयवं देव सोऽहं चेति पुनर्बुधः। कुर्य्यात् ततीक्ष्णमिति प्रणिधानपरीभवेदिति। कस्मात् पुनरधरांभूमिं विजित्योत्तरां विजयते विपर्ययः कस्मान्न भवति इत्यत आह। नह्यजिताधरभूमिरिति। न हि शिलाशकलात् नद्यां प्रतिप्रस्थिती प्राप्य नैवत्वं नद्यां प्राप्नोति ईश्वरप्रसादाज्जितोत्तर भूमिकस्येति। कस्मात्तदर्थस्य उत्तर भूमि विजयस्य प्रत्यासन्नस्यान्यत एवेश्वर

त्रयमन्तरङ्गं पूर्व्वेभ्यः ॥ ७ ॥

तदेतद्धारणाध्यानसमाधित्रयमन्तरङ्गं सम्प्रज्ञातस्य समाधेः पूर्व्वेभ्यो यमादिभ्यः पञ्चभ्यः साधनेभ्यः इति ॥७॥

तदपि बहिरङ्गं निर्व्वीजस्य ॥ ८ ॥

तदप्यन्तरङ्गं साधनत्रयं निर्व्वीजस्य योगस्य बहिरङ्गं भवति कस्मात् तदभावेऽभावादिति ॥ ८ ॥

प्रणिधानादेवावगतत्वात् । निष्पादितक्रियेषु कर्माशयविशेषाधायिनः साधनस्य साधनव्यापादिति । स्यादेतदागमतः सामान्यतोवगतानामप्यवान्तरभूमिभेदानां कुतः पौर्व्वापर्य्योवगतिरित्यत आह । भूमीरस्या इति जितः पूर्व्वो योग उत्तरस्य योगस्य ज्ञान प्रवर्त्यधिगमहेतुः अवस्थेवावस्थावानित्यभिप्रेत्य तत् द्रष्टव्यम् ॥ ६ ॥

कस्मात् पुनर्योगाङ्गत्वाविशेषेपि संयमस्य तत्र तत्र विनियोगः नेतरेषां पञ्चानामित्यत आह । त्र—भ्यः । तदिदं साधनत्रयं साध्यसमान विषयत्वेनान्तरङ्गं भवति यस्मादयमस्मात् ते बहिरङ्गाइत्यर्थः साधनत्रयस्य संप्रज्ञात एवान्तरङ्गत्वं नत्वसंप्रज्ञाते ॥ ७ ॥

तस्य निर्व्वीजतया तैः सह समानविषयत्वाभावात् तेषु चिरनिरुद्धेषु संप्रज्ञात परमकाष्ठाऽपरनाम । ज्ञानप्रसादरूप परवैराग्यानन्तर मुत्पादार्हत्वाह तदिति । तस्य समान विषयत्व मन्तरङ्गत्व प्रयोजकमिह न तु तदनन्तरभावस्य बहिरङ्गेश्वर प्रणिधानवत्तिं तया स व्यभिचारत्वादिति स्थिते स व्यभिचार मप्यन्तरङ्ग लक्षणं तदनन्तर भावित्वमस्य नास्ति तस्माद् दूरापेतान्तरङ्गता संयमस्यासंप्रज्ञात इति दर्शयितुं तदभावे भावादित्युक्तं ॥ ८ ॥

अथ निरोधचित्तक्षणेषु चलं गुणवृत्तमिति कीदृग-स्तदाचित्तपरिणामः—

व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥९॥

व्युत्थानसंस्काराश्चित्तधर्मा न ते प्रत्ययात्मका इति प्रत्ययनिरोधेन निरुद्धा निरोधसंस्कारा अपि चित्तधर्मा-स्तयोरभिभवप्रादुर्भावौ व्युत्थानसंस्कारा ह्रीयन्ते निरोध-संस्कारा आधीयन्ते निरोधक्षणं चित्तमन्वेति तदेकस्य

परिणामत्रय संयमादित्यत्रोपयोगमाण परिणाम त्रयं प्रति विपादयिषुः निर्बीज प्रसङ्गेन पृच्छति अथेति व्युत्थान संप्रज्ञातयो चित्तस्य स्फुटतर परिणाम भेद प्रचया-नुभवान्न प्रशान्तवाही निरोधे तु नानुभूयते परिणामो नास्ति चित्तस्य त्रिगुणतया चलत्वेन गुणानां क्षणमपि अपरिणामस्यासम्भवादित्यर्थः । प्रश्नोत्तरं सूत्रं । व्युत्थान निरोधपरिणामः असंप्रज्ञातं समाधिमपेक्ष्य संप्रज्ञातो व्युत्थानं निरुध्यतेऽनेनेति निरोधो ज्ञान प्रसादःपरवैराग्यं तयो व्युत्थाननिरोध संस्कारयोरभिभव प्रादुर्भावौ तत्र व्युत्थान संस्कारस्याभिभवो निरोध संस्कारस्याभिर्भावः चित्तस्य धर्मिणो निरोध क्षणस्य निरोधावसरस्य द्वयोरवस्थयोरन्वयः न हि चित्तं धर्मि संप्रज्ञातावस्थायाञ्च संस्काराभिभवप्रादुर्भावयोः स्वरूपेण भिद्यते इति । ननु यथोत्तरं क्लेशा अविद्या निवृत्तौ निवर्त्तन्ते इति तन्निवृत्तौ न पृथक् प्रयत्नान्तरमाश्रीयते एवं व्युत्थान दृप्रत्यय मूलाः संस्कारा व्युत्थान निरुद्धावेव निवर्त्तन्ते इति तन्निवृत्तौ न निरोध

चित्तस्य प्रतिक्षणमिदं संस्काराभ्यथात्वं निरोधपरिणामं तदा संस्कारशेषं चित्तमिति निरोधसमाधौ व्याख्यातम् ॥ ९ ॥

तस्य प्रशान्तवाहिता संस्कारात् ॥ १० ॥

निरोधसंस्काराभ्यासपाटवापेक्षात्प्रशान्तवाहिता चित्तस्य भवति । तत्संस्कारमान्द्ये व्युत्थानधर्मिणा संस्कारेण निरोधधर्मः संस्कारोभिभूयत इति ॥ १० ॥

संस्कारोपेक्षितव्य इत्यत आह । व्युत्थान संस्कारा इति न कारण मात्र निवृत्तिः कार्यनिवृत्तिहेतुर्भावूत् कुविन्द निवृत्तावपि पटस्य निवृत्तिरपितु यत् कारणात्मकं यत् कार्यं तत् कारण निवृत्तौ तत् कार्यं निवृत्तिः उत्तरे च क्लेशा अविद्यात्मान इत्यतः अतस्तन्निवृत्तौ तेषां निवृत्तिरूपपन्ना नत्वेवं प्रत्ययात्मनः संस्काराश्चिर निरुद्धं प्रत्ययं संप्रतिसंधानदर्शनात्संस्कात् प्रत्ययं निवृत्तावपि तन्निवृत्तौ निरोध संस्कार प्रचय एवोपासनीय इत्यर्थः सुगममन्यत् ॥ ९ ॥

सर्व्वथा व्युत्थान संस्काराभिभवेतु बलवता निरोध संस्कारेण चित्तस्य कीदृशः परिणाम इत्यत आह । व्युत्थान संस्कार मलरहित निरोध संस्कार परम्परा मात्र वाहिता प्रशान्तवाहिता । कस्मात् पुनः संस्कार पाटवमपेक्षते नतु संस्कार मात्र मित्यत आह । तत् संस्कारमान्द्य इति तदिति निरोध परामृशति ये तु नाभिभूयत इति पठन्ति ते तद्व्युत्थानं परामृशन्ति ॥ १० ॥

सर्व्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ॥ ११ ॥

सर्व्वार्थता चित्तधर्म्मः एकाग्रता चित्तधर्म्मः सर्व्वार्थतायाः क्षयस्तिरोभाव इत्यर्थः एकाग्रताया उदय आविर्भाव इत्यर्थः तयोर्धर्म्मिणि नानुगतं चित्तं तदिदं चित्तमपायोपजननयोः स्वात्मभूतयोधर्म्मयोरनुगतं समाधीयते स चित्तस्य समाधिपरिणामः ॥ ११ ॥

ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्र्यया परिणामः ॥ १२ ॥

समाहितचित्तस्य पूर्व्वप्रत्ययः शान्त उत्तरस्तत्सदृग उदितः समाधिचित्त मुभयोरनुगतं पुनस्तथैव। आस-

सम्प्रज्ञात समाधि परिणामावस्थां चित्तस्य दर्शयति। स—मः। विक्षिप्तता सर्व्वार्थता सन्नविनश्यतीति क्षयस्तिरोभावः नासदुत्पद्यत इति उदय आविर्भावः आत्मभूतयोः सर्व्वार्थतैकाग्रतयोः धर्म्मयोः यो अपायोपजनौ सर्व्वार्थताया अपाया एकाग्रताया उपजनस्तयोरनुगतं चित्त समाधीयते पूर्व्वापरीभूत साध्यमान समाधि विशेषं भवतीति। ११ ॥

त—मः पुनः समाधेः पूर्व्वापरीभूताया अवस्थायाः निष्पन्नौ सत्यां शान्तोदितावतीत वर्त्तमानौ तुल्यौच तौ प्रत्ययौ चेति तुल्यप्रत्ययौ एकाग्रतायान्तु क्षयोः

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः॥१३॥

माधिभ्रेषादिति। स खल्वयं धर्मिणश्चित्तस्यैकाग्रता परिणामः॥ १२॥

एतेन पूर्व्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्थारूपेषु भूतेन्द्रियेषु धर्मपरिणामो लक्षणपरिणामश्चोऽवस्थापरिणामश्चोक्तोवेदितव्यः तत्र व्युत्याननिरोधयोर्धर्म्मयोरभिभवप्रादुर्भावौ धर्म्मिणि धर्मपरिणामो लक्षणपरिणामश्च निरोधस्त्रिलक्षणः त्रिभिरध्वभिर्युक्तः स खल्वनागतलक्षणमध्वानं प्रथमं हित्वा धर्म्मत्वमनतिक्रान्तो वर्त्तमानं लक्षणं प्रतिपन्नः

साक्षस्यं समाहित चित्तस्येति समाधि निष्पत्तिः दर्शिता॥ तथैवैकाग्रमेव अवधिमाह भासमाधि भेषात्। भंशादिति॥ १२॥

प्रासङ्गिकञ्च वक्ष्यमाणौपयिकञ्च भूतेन्द्रिय परिणामं विभजते एतानिः। व्याचष्टे। एतेनेति ननु चित्तपरिणतिमात्रमुक्तं न तु तत्प्रकारा धर्म्मलक्षणावस्थापरिणामास्तत् कथं तेषामतिदेश इत्यत आह। तच्च व्युत्थाने निरुद्धयोरिति धर्म्मलक्षणावस्था ग्रन्थः परं नीद्धारिताः न तु धर्म्म लक्षणावस्था परिणामा नीक्ता इति संक्षेपार्थः तथा हि व्युत्थान निरोध संस्कारयोरित्यत्रैव सूत्रे धर्म्म परिणाम उक्त इमत्र धर्म्मपरिणामं दर्शयता तेनैव धर्म्माधिकारयो लक्षणपरिणामोपि सूचित एवेत्याह लक्षण परिणाम इति लक्ष्यते अनेनेति लक्षणं कालभेदः तेन हि क्षणिकवस्तु वस्त्वन्तरेभ्यः कालान्तर युक्तेभ्योव्यवच्छिद्यत इति

यचास्य स्वरूपेणाभिव्यक्तिरेषोस्य द्वितीयोध्वा न चातीतानागताभ्यां वियुक्तः तथा व्युत्थानं विलक्षणं त्रिभिरध्वभिर्युक्तं वर्त्तमानं लक्षणं हित्वा धर्म्मत्वमनतिक्रान्तमतीतलक्षणं। प्रतिपन्नमेषोस्य तृतीयोध्वा नचानागतवर्त्तमानाभ्यां लक्षणाभ्यां वियुक्तः। एवं पुन व्युत्थानमुपसम्पद्यमानमनागतलक्षणं हित्वा धर्म्मत्वमनतिक्रान्तं वर्त्तमानं लक्षणं प्रतिपन्नं यचास्य स्वरूपाभिव्यक्तौ सत्यां व्यापार एवोस्य द्वितीयोध्वा न चातीतानागताभ्यां लक्षणाभ्यां विमुक्तमित्येवं पुनर्निरोध एवं पुनर्व्युत्थानमिति। तथाऽवस्थापरिणामो निरोधलक्षणेषु निरोधसंस्कारा बलवन्तो भवन्ति दुर्व्वला व्यु-

निरोध त्रिलक्षणः अस्यैव व्याख्यानं त्रिभिरध्वभिर्युक्तः अध्वशब्दः कालवचनः स खल्वनागत लक्षण मध्वानं प्रथमं हित्वा तत् किमध्ववत् धर्म्मनिरोधत्व मध्यति पतति नेत्याह धर्म्मत्वमनतिक्रान्तो वर्त्तमानं लक्षणं प्रतिपन्नं यत्र विरोधी ऽनागत आसीत् सएव संप्रति वर्त्तमानो न तु निरोधी ऽनिरोध इत्यर्थः। वर्त्तमानता स्वरूप व्याख्यानं यचास्य स्वरूपेण खोचितार्थः क्रियाकारिणाभिव्यक्तिः समुदाचारः एषोस्य प्रथम मनागत मध्वानमपेक्ष्य द्वियोऽध्वा। स्यादेतत् अनागत मध्वानं हित्वा चेदवर्त्तमानता मापन्नस्तर्हि हित्वा अतीता मापत्स्यते इत्यभी रध्वना मुत्पादविनाशौ स्यातां न चेष्यते नह्यसतोत्पादो नापि सतोविनाश इत्यत आह। नचातीता नागताभ्यां सामान्यात्मनावस्थिताभ्यां वियुक्तइति। अनागतस्य निरोधस्य वर्त्तमानता लक्षणं दर्शयित्वा वर्त्तमान व्युत्थानस्यातीततां तृतीय मध्वानमाह तथा व्युत्थानमिति तत् किं निरोध एवानगतो न व्युत्थानं नेत्याह। एवं पुनर्व्युत्थानमिति व्युत्थान जात्यपेक्षया पुनर्भावः न व्यक्त्यपेक्षया न ह्यतीतं

त्यानसंस्कारा इत्येव धर्माणामवस्थापरिणामः तत्र धर्मिणोधर्मैः परिणामो धर्माणां अध्वनां लक्षणैः परिणामो लक्षणानामप्यवस्थाभिः परिणामः इत्येवं धर्मलक्षणावस्था परिणामैः शून्यं क्षणमपि गुणवृत्तमवतिष्ठते। चलञ्च गुणवृत्तं गुणस्वाभाव्यन्तु प्रवृत्तिकारणमुक्तं गुणानामिति। एतेन भूतेन्द्रियेषु धर्मधर्मिभेदात् त्रिविधपरिणामो वेदितव्यः। परमार्थतस्त्वेक एव परिणामो धर्मिस्वरूपमात्रो

पुनर्भवतीति। स्वरूपाभिव्यक्तिरेव क्रियाचमस्येविर्भावः सचैव लक्षणपरिणाम उक्तः तत्क्रमातीयेषु पौनः पुन्येन वर्त्तत इत्यत आह। एवं पुनरिति धर्मपरिणामगूचितमेवावस्था। परिणाममाह तथेति धर्माणां वर्त्तमानाध्वनां बलवत्ता बलवत्ते ऽवस्था तस्याः प्रतिक्षणं तारतम्यं परिणामः उपसंहरति एव इति परिणाम भेदानां सम्बन्धिभेदान्निर्धारयति। तत्क्रमानुभवानुसारात् धर्मिण इति॥ तत् त्रिभेष परिणामो गुणानां कादाचित्कौ नेत्याह। एवमिति कस्मात् पुनरयं परिणामः सदातन इत्यत आह। चलश्चेति। चोद्देत्यर्थः वृत्तं प्रचारः एतदेव कुत इत्यत आह। गुणस्वाभाव्यमिति उक्तमर्थं पुरस्तात् सोयं त्रिविधोपि चित्तपरिणामः भूतेन्द्रियेषु सत्वकारेण निर्दिष्ट इत्याह। एतेनेति। एव धर्मधर्मिभेदो धर्मधर्मिणोर्भेदमालक्ष्य नव भूतानां पृथिव्यादीनां धर्मिणां गवादि घटादि वा धर्मपरिणामः। धर्माणां चातीतानागत वर्त्तमान रूपता लक्षण परिणामः वर्त्तमान लक्षणापन्नस्य गवादेर्बाल्य कौमार यौवनवार्द्धक्यमवस्थापरिणामः घटादीनामपि नव पुरातनतावस्था परिणाम एवमिन्द्रियाणामपि धर्मिणां तत्तन्नीलाद्याकारेण धर्मपरिणामो धर्मस्य वर्त्तमानादि लक्षण परिणामो वर्त्तमान लक्षणस्य रक्षाद्याकारेण स्फुटत्वादिरवस्था परिणामः सोयमेवंविधो भूतेन्द्रिय परिणामो धर्मिणो धर्म-

हि धर्मोधर्मिविक्रियैवेष धर्मद्वारा प्रपञ्चते इति तत्र धर्मस्य धर्मणि वर्त्तमानस्यैवाध्वसंतीतानागतवर्त्तमानेषु भावान्यथात्वं भवति न द्रव्यान्यथात्वं यथा सुवर्णभाजनस्य भिन्नान्यथाक्रियमाणस्य भावान्यथात्वमिति अपर आह "धर्मानभ्यधिको धर्मी पूर्वतत्वानतिक्रमात् पूर्वपरावस्थाभेद मनुपतितः कौटस्थ्येन विपरिवर्त्तते यद्यवयवी स्यादियं मदोषः कस्मात् एकान्तानभ्युपगमात् तदेतत्त्वैलोक्यं व्यक्ते

क्षणावस्थानां भेदमाश्रित्य वेदितव्यः। अभेदमाश्रित्याह। परमार्थतस्त्रिति तु शब्दोभेदपक्षाद्विशिनष्टि पारमार्थिकत्वमस्य प्राप्यते नवत्वस्य परिणामस्य निषिध्यते। कस्मात् धर्मिस्वरूपमाचक्षीतेति नन्वु यदि धर्मिक्रियैव धर्मः कथमसङ्कर प्रत्ययो लोके परिणामेष्विष्यत आह। धर्मद्वारेति धर्मशब्देन धर्मलक्षणावस्थाः परिगृह्यन्ते तत् द्वारेण धर्मिण एव विक्रियेत्येकाधासङ्गीर्णा च द्वाराधामवेदीपि धर्मिणः परस्परासङ्करात्। ननु धर्माणामभिन्नत्वे धर्मिणोऽध्वनाच्च भेदे धर्मिणोऽनन्यत्वेन धर्मेणापि इहधर्मिवदुपेतव्यमित्यत आह तत्र धर्मस्येतिभावः संस्थानभेदः सुवर्णादेर्यथा भाजनस्य कचक स्वस्तिक व्यपदेशभेदो भवति तस्मात्तमन्यथा भवति न तु द्रव्यं सुवर्णतामुपैति अत्यन्तभेदाभावादिति वक्ष्यमाणोभिसन्धिः एकान्तवादिनं चोदयत्यपरयति अपर आहेति धर्म्यापत्ति कचकादयस्त्वयोव्यक्ताः परमार्थ सन्तो न पुनः सुवर्णं नाम किञ्चिदेकमनेकेष्वनुगतं द्रव्यमिति यदि पुनर्निवर्त्तमानेष्वपि धर्मेषु द्रव्यमनुगतं भवेत्तती न चितिशक्तिवत् परिणमेत अपितु कौटस्थ्येनैव परिवर्त्तते परिणामात्मकं रूपं परिहाय रूपान्तरेण कौटस्थ्येन परिवर्त्तनं परिणतिः यथा चितिशक्तिरन्यथान्यथाभावं भजमानेष्वपि गुणेषु स्वरूपाद् प्रच्युता कूटस्थनित्यैवं सुवर्णादिपि स्यान्न चेष्यते तस्मान्न द्रव्यमतिरिक्तं धर्मेभ्य इति परि-

रपैति नित्यत्वप्रतिषेधात् अपेतमप्यस्ति विनाशप्रतिषेधात् संसर्गाच्चास्य सौक्ष्म्यं सौक्ष्म्याच्चानुपलब्धिरिति। लक्षणपरिणामः धर्मोऽध्वसु वर्त्तमानः अतीतोऽतीतलक्षणयुक्तोऽनागतवर्त्तमानाभ्यां लक्षणाभ्यामवियुक्तस्तथाऽनागतोऽनागतलक्षणयुक्तः वर्त्तमानातीताभ्यां लक्षणाभ्यामवियुक्तस्तथा वर्त्तमानलक्षणयुक्तोऽतीतानागताभ्यामवियुक्तइति यथापुरुष एकस्यां स्त्रियां रक्तो न शेषासु विरक्तो भवतीति। अत्र लक्षणपरिणामे सर्व्वलक्षणयोगाद्ध्वसंङ्करः प्राप्नोतीति परैर्दोषयोद्यत इति तस्य परिहारो

इरति अयमदोष इति कस्यादेकान्तानभ्युपगमात् यदि चितिशक्तिरिव द्रव्यस्यैकान्तिकीं नित्यतामभ्युपगच्छेम अतएवमुपालभ्येमहि नत्वैकान्तिकीं नित्यतामतिष्ठामहे किन्तु तदेतत् त्रैलोक्यं न तु द्रव्यमात्रं व्यक्तेरर्थक्रियाकारित्वोदयादपैति कस्यान्नित्यत्व प्रतिषेधात् प्रमाणेन यदिह घटोव्यक्तेर्नापेयात् कपाल शर्करा चूर्णादिष्ववस्थास्वपि व्यक्तोघट इति पूर्ववत् उपलब्ध्यर्थक्रिये कुर्य्यात्तस्मादनित्यं त्रैलोक्यं अस्तु तस्यंऽनित्यमेवोपलब्ध्यर्थ क्रियारहितत्वेन गगणारविन्दवदति तुच्छत्वादित्यत आह। अपेतमप्यस्ति नात्यन्त तुच्छता येनैकान्ततोऽनित्यं स्यादित्यर्थः कस्यादिनाश प्रतिषेधात् प्रमाणेन तथाहि यत्तुच्छं न तत् कदाचिदप्युपलब्ध्यर्थं क्रिये करोति यदा गगणारविन्दं करोति चैतत् त्रैलोक्यं कदाचिदुपलब्ध्यर्थक्रिये इति अथोत्पत्तिमत् द्रव्यत्व धर्म्मलक्षणावस्था योगित्वादयोप्यत्यन्त तुच्छ यननलिन नरविषाणादि व्यावृत्ताः सत्वेतव उदाहार्य्या तथाच नात्यन्त नित्यो येन चितिशक्तिवत् कूटस्थ नित्यः स्यात् किन्तु कथं चिन्नित्यः तथाच परिणामीति सिद्धं एतेन मृत्पिण्डाद्यवस्थासु कार्य्याणां घटादीनामनागतानां सर्व

धर्माणां धर्मत्वप्रसाध्यं। सति च धर्मत्वे लक्षणभेदोपि वाच्यो न वर्त्तमान समय एवास्य धर्मस्यं एवं हि चित्तं राग धर्मकं स्यात् क्रोधकाले रागस्यासमुदाचारादिति किञ्च त्रयाणां लक्षणानां युगपदेकस्यां व्यक्तौ नास्ति सम्भवः क्रमेण तु खव्यञ्जकाञ्जनस्य भावोभवेदिति। उक्तञ्च रूपातिशया दृत्यतिशयाश्च विरुध्यन्ते सामान्यानित्वतिशयैः सह प्रवर्त्तन्ते तस्मादसङ्करो यथा रागस्यैव क्वचित् समुदाचार इति न तदानीमन्यतराभावः किन्तु केवलं सामान्येन समन्वागत

वैदितव्यं स्यादेतदपेतमपि चेदस्ति। कस्मात्पूर्वत्रोपलभ्यत इत्यत आह। संसर्गात् स्वकारणं लयात् सौक्ष्यं दर्शनानर्हत्वं ततश्च अनुपलब्धिरिति। तदेव धर्मपरिणामं लक्षणपरिणाममपि लक्षणानां परस्परानुगमनेन समर्थयते। लक्षण परिणाम इति एकैकं लक्षणं लक्षणान्तराभ्यां समनुगतमित्यर्थः। नन्वेक लक्षणयोगे लक्षणान्तरेणानुभूयेते तत्कथं तद्योग इत्यत आह। यथा पुरुष इति। नह्यनुभवाभावः प्रमाण सिद्धमपलपित तदुत्पादश्च तत्र तत्सद्भावे प्रमाणमसत उत्पादासम्भवात् नरविषाणवदिति।

परीक्ष दीपमुत्थापयति। अत्र लक्षण परिणाम इति यदा धर्मोवर्त्तमान स्तदैव यद्यतीती नागतश्च तदाचक्षीथ्वध्वानः सङ्गीर्येरन् अनुक्रमेण च अध्वनां भावे असदुत्पाद प्रसङ्ग इति भावः। परिहरति तस्य परिहार इति वर्त्तमानत्वेव हि धर्मेणामनुभवसिद्धा ततः प्राक् पश्चात् काल स्वस्य मवगमयति न खल्वसदुत्पद्यते न च सदिनश्यति। तदिदमाह एवं हि न चित्तमिति क्रोधेतर कालं हि चित्तं राग धर्मैकमनुभूयते यदा च रागः क्रोध समयेऽनागतत्वेन नासीत्तत्कथमसावुत्पद्येत अनुत्पन्नश्च कथमनुभवेयेतेति भवत्वेवं तथापि कुतोध्वनामसङ्कर इति पृच्छति किञ्चेति

स्त्यस्ति तदा तत्र तस्य भावः। तथा लक्षणस्येति न धर्म्यो लक्ष्यो धर्मास्तु लक्ष्यास्ते लक्षिता अलक्षिताश्च तां तामवस्थां प्राप्नुवन्तोऽन्यत्वेन प्रतिनिर्दिश्यन्ते अवस्थान्तरतो न द्रव्यान्तरतः यथैका रेखा शतस्थाने शतं दशस्थाने दशैका चैकस्थाने यथाचैकत्वेपि स्त्रीमता चोच्यते दुहिता च स्वसा चेति। अवस्थापरिणामे कौटस्थ्याप्रसङ्गदोषः कैश्चिदुक्तः कथं अध्वनो व्यापारेण व्यवहितत्वात् यदा धर्मः स्वव्यापारं

किं कारणमसङ्करे च पुनरर्थे उत्तरमाह यथा यां लक्षणानां युगपन्नास्ति सम्भवः कस्मिन्क्षणे चित्तवृत्तौ क्रमेण क्रमेण तु लक्षणा एकतमस्य स्वव्यञ्जकाञ्जनस्य भावी-भवेत् सम्भवेत् लक्ष्याधीन निरूपण तया लक्षणानां लक्ष्यानुसारेण तदुक्ता। अर्थेन धर्मिणाधार्थ सम्बति माह उक्तमिति एतच्च प्रागेव व्याख्यातं उपसंहरति तस्मादिति आविर्भाव तिरोभाव रूप विरुद्धधर्म्म संसर्गात् सङ्करोध्वनामिति दृष्टान्त माह। यथा रागस्येति पूर्वं क्रोधस्य रागसम्बन्धावगमो दर्शित इति। इदानीन्तु विषयान्तरवर्त्तिनी रागस्य विषयान्तरवर्त्तिना रागान्तरेण सम्बन्धावगम इति। दार्ष्टान्तिक माह। तथा लक्षणस्येति। ननु सत्यप्यनेकान्ताभ्युपगमे भेदोस्तीति धर्म्मलक्षणावस्थात्रये तद्भिन्नस्य धर्म्मिणोप्यन्यत्व प्रसङ्गः स एव च नेष्यते तदनुग-मानुभव विरोधादित्यत आह। न धर्म्मस्यध्वायते तद्भिन्नाधर्म्माख्यानः धर्म्मा-ध्वानमध्वय योग मेव स्वीरयति। ते लक्षिता अभिव्यक्ता वर्त्तमाना इति यावत् अलक्षिता अनभिव्यक्ता अनागता अतीता इति यावत् तत्र लक्षितानां तामवस्थां बलवत्त्व दुर्ब्बलत्वादिकां प्राप्नुवन्तो इत्यत्वेन प्रतिनिर्दिश्यन्ते। अवस्थान्तरतो न द्रव्यान्तरतः। अवस्था शब्देन धर्म्मलक्षणावस्था उच्यते। एतदुक्तं भवत्यनुभव एव हि धर्म्मिणो धर्म्मादीनां भेदाभेदौ व्यवस्थापयति नत्वैकान्तिके ऽभेदधर्म्मादीनां

न करोति तदानागतः यदा करोति तदा वर्त्तमानः यदा-कृत्वा निवृत्तस्तदातीत इत्येवं धर्मधर्मिणो लक्षणानामवस्थानाच्च कौटस्थं प्राप्नोतीति परैरेष उच्यते नासौ दोषः कस्मात् गुणनित्यत्वेपि गुणानां विमर्दवैचित्र्यात् यथासंस्थानमादिमद्धर्ममात्रं शब्दादीनां विनाश्यविनाशिनामेवं लिङ्गमादिमद्धर्ममात्रं सत्वादीनां गुणानां विनाश्यविनाशिनां तस्मिन् विकारसंज्ञेति तत्रेदमुदाहरणं मृद्धर्मीपिण्डाकाराद्धर्माद्धर्मान्तरमुपसम्पद्यमानोधर्मतः परिणमते

धर्मिणो धर्मिरूपवद्धर्मादित्वं नाप्यैकान्तिकभेदे गवाश्ववत् धर्मादित्वं स चानुभवो नैकान्तिकत्व मवस्थापयन्नपि धर्मादिषूपजनापाय्र धर्मैकेष्वपि धर्मिण मेक मनुगमयन् धर्म्यांश्च परस्परतोव्यावर्त्तयन् प्रत्यात्म मनुभूयते इति तदनुसारिणी वयं न तमति वर्त्त खेच्छया धर्मानुभवान् व्यवस्थापयेतु मीशते इति अथैव लौकिकं दृष्टान्त माह। यथैकावेरेति। यथा तदेव रेखारूपं तत्तत्स्थानापेक्षया शतादित्वेन व्यपदिश्यते एवं तदेव धर्मिरूपं तत्तत् धर्म लक्षणावस्था भेदेनान्यत्वेन प्रतिनिर्दिश्यते इत्यर्थः। दार्ष्टान्तिकार्थं दृष्टान्तान्तर माह। यथा चैकत्वेपीति। अवान्तरे परीक्षां दोषमुत्थापयति अवस्थेति। अवस्था परिणामे धर्मलक्षणावस्था परिणामे कौटस्थ्य दोष प्रसङ्ग उक्तो धर्मिधर्म्म लक्षणावस्थानां पृच्छति। कथमिति उत्तरं अध्वनो व्यापारेणेति दृष्टः किल योऽनागतोऽध्वा तस्य व्यापारः वीरस्य वर्त्तमानत्वं तेन व्यवहितत्वाद्धेतोः यदा धर्म्म दधिलक्षणः स्वव्यापारं दाधिकाव्यापारं भं वीरे सन्नपि न करोति तदा नागतः यदा करोति तदा वर्त्तमानः यदा कृत्वा निवृत्तः सन्नेव स्वव्यापारात् दाधिकाव्यापारात् तदातीत इति। एवं चैकाल्येपि सत्वाद्धर्मधर्मिणो लक्षणानामवस्थानाच्च कौटस्थं प्राप्नोति सर्व्वदा सत्वाद्धि

घटाकार इति घटाकारोनागतं लक्षणं हित्वा वर्त्तमान लक्षणं प्रतिपद्यते इति लक्षण परिणमते घटोनवपुराणतां प्रतिक्षणमनुभवन् अवस्थापरिणामं प्रतिपद्यत इति धर्म्मिणोपि धर्म्मान्तरमवस्था धर्म्मस्यापि लक्षणान्तरमवस्थेति एक एव द्रव्यपरिणामः भेदेनोपदर्शित इति एवं पदार्थान्तरेष्वपि योज्यमिति एते धर्म्मलक्षणावस्था परिणामा धर्म्मिस्वरूपमनतिक्रान्ता इत्येक एव परिणामः सर्व्वानमून् विशेषानभिप्लवते। अथ कथं परिणामः अवस्थितस्य द्रव्यस्य पूर्व्वधर्म्मान्निवृत्तौ धर्म्मान्तरोत्पत्तिः परिणामइति ॥१३॥

नित्यत्वं चतुर्णामपि च सर्व्वदा सत्वे असत्वे वा नीत्यादः तावन्मात्रच्च लक्षण कूटस्थ नित्यतायाः न हि चितिशक्तेरपि कूटस्थ नित्यायाः कश्चिदन्योविशेष इति भावः परिहरति नासौ दोषः कस्मात् गुणिनित्यत्वेपि गुणानां विमर्द्दो अन्योन्यभिभाव्याभिभावकत्वं तस्य वैचित्र्यात् एतदुक्तं भवति यद्यपि सर्व्वदा सत्वच्चतूर्णामपि गुणि गुणानां तथापि विमर्द्दं वै चित्र्येण तदात्मभूत तद्विकारावि र्भाव तिरोभाव भेदेन परिणामप्रालित्या न कौटस्थ्यं चितिशक्तेस्तु न स्वात्मभूत विकारावि र्भावः तिरोभाव इति कौटस्थ्यं यथाहुः "नित्यत्वमाहु विद्वांसो यत्स्वभावो न नश्यति" इति विमर्द्दं वैचित्र्यमेव विकार वैचित्र्यं हेतुं प्रकृतौ विकृतौ च दर्शयति यथा संस्थानं पृथिव्यादि परिणाम लक्षण मादिमद्धर्म्ममात्रं विनाशि तिरोभावि शब्दादीनां शब्दस्पर्शरूप रसगन्ध तन्मात्राणां स्वकार्य्यमपेक्षाविनाशिनाम तिरोभाविनाम्। प्रकृतौ दर्शयति एवं लिङ्गमिति तस्मिन् विकार संज्ञा सत्वेवं विकारवती चिति शक्तिरिति तदेवं परीक्षक सिद्धां विकृतिञ्च प्रकृतिञ्चोदाहृत्य विकृतावेव लोकसि-

तत्र शान्तोदिताव्यपदेश्यधर्म्मानुपाती धर्म्मी ॥ १४ ॥

योग्यतावच्छिन्ना धर्म्मिणः शक्तिरेव धर्म्मः सच फलप्रसवभेदानुमितिसद्भावः एकस्यान्योन्यञ्च परिहृतः तत्र वर्त्तमानः स्वव्यापार मनुभवधर्म्मो धर्म्मान्तरेभ्यः शान्तेभ्यश्चाव्यपदेश्येभ्यश्च भिद्यते। यदा तु सामान्येन समन्वागतो भवति। तदा धर्म्मिस्वरूपमात्रत्वात् कोसौ केन भिद्येत। तत्र ये खलु धर्म्मिणो धर्म्माः शान्ता उदिता ऽव्यपदेश्याश्चेति तत्र शान्ता ये क्षत्वा व्यापारानुपरताः स्वव्यापारा उदितास्तैचानागतस्य लक्षणस्य समनन्तराः वर्त्तमानस्यानन्तरा अतीताः किमर्थमतीतस्यानन्तरा

द्वार्या गुणविमर्दैवैचित्र्यं धर्म्मलक्षणावस्था परिणाम वैचित्र्य हेतुमुदाहरति। तच्चेद मुदाहरणमिति न चायं नियमो लक्षणानामेवावस्थापरिणाम इति सर्व्वेषामेव धर्म्मलक्षणावस्था भेदानामवस्थाशब्दा वाच्यत्वादेक एवावस्था परिणामः सर्व्वसाधारण इत्याह धर्म्मिणोपीति व्यापकं परिणाम लक्षणमाह अवस्थिवस्येति। धर्म्मशब्द आश्रितत्वेन धर्म्मलक्षणावस्थावाचकः ॥१३॥

यस्येव. त्रिविध परिणामस्तं धर्म्मिणं सूत्रेण लक्षयति। तत्र शान्तोदिती व्यपदेश्य धर्म्मानुपाती धर्म्मी। धर्म्मांस्त्यक्तीति धर्म्मीति भाविज्ञाते धर्म्मे स शक्ती ज्ञातुमिति धर्म्मं दर्शयति। योग्यस्येति धर्मिणो द्रव्यस्य मृदादेः शक्तिरेव चूर्ण पिण्ड घटादयुत्पत्ति शक्तिरेव धर्म्मास्तेषां तत्राव्यक्तत्वेन भावइति यावत् ॥

न भवन्ति वर्त्तमानाः पूर्व्वपश्चिमताया अभावात् यथानागत वर्त्तमानयोः पूर्व्वपश्चिमता नैवमतीतस्य तस्मान्नातीतस्यास्ति समनन्तरस्तदानागत एव समनन्तरो भवति वर्त्तमानस्येति ॥

नन्वेवमव्यक्तत्वया सत्त्वे ततः प्रादुर्भवन्तु उदकाहरणादयस्तुतेः खकारणाद नासादिताः कुतः प्राप्ता इत्यत उक्तम् । योग्यतावच्छिन्न इति यासौ घटादीनामुत्पत्तिशक्तिः सोदकाहरणादि योग्यतावच्छिन्ना तेनोदकाहरणादयो घटादिभिः खकारणादेव प्राप्ता इति नाकस्मिका इतिभावः । अथवा के धर्म्मिण इत्यपेक्षायां योग्यतावच्छिन्ना धर्म्मिण इति कोधर्म्म इत्यपेक्षायां शक्तिरेव धर्म्मस्तेषां योग्यतेव धर्म्मीत्यर्थः अतस्तद्वान् धर्म्मी इति सिद्धं भवति तत्प्राप्तावे प्रमाणमाह स च फल प्रसव भेदानुमित एकस्य धर्म्मिणोन्यस्यान्यश्च चूर्णपिण्ड घटादिरूप इत्यर्थः कार्य्यभेददर्शनाच्च भिन्न इति यावत् परिदृष्ट उपलब्धः तत्रानुभवारोहिणो वर्त्तमानस्य पिण्डस्य शान्ताव्यपदेश्याभ्यां चूर्ण्ण घटाभ्यां भेदमाह तत्र वर्त्तमान इति । यदि न भिद्यते पिण्डस्तच्चूर्ण्णं घटयोरपि तदेव स्वव्यापार व्याप्ति प्रसङ्ग इति भावः अन्यस्य तु पिण्डस्य नोक्तं भेदसाधनं सम्भवति इत्याह । यदालिति कोसौ केन भेदसाधनेन भिद्यत । तदेवं धर्म्माणां भेदसाधन मभिधाय तं भेदं विभजते तत्र येखल्विति उदिता इति वर्त्तमाना इत्यर्थः अध्वनां पौर्व्वापर्य्यं निगमयति तेषेति चोदयति किमर्थमिति । किं निमित्तमतीतस्यानन्तरा न भवन्ति वर्त्तमानाः । हेतुमाह पूर्व्वपश्चिमतायां अभावात् विषयेण विषयिणो मनुपलब्धिं सूचयति अनुपलब्ध मेवोपलब्ध वैधर्म्म्यं च दर्शयति । यथा वर्त्तमानाऽनागतयोरिति । उपसंहरति तत्तस्मादनागत एव समनन्तरः पूर्व्वत्वेन भवति वर्त्तमानस्य

अथाव्यपदेश्याः के सर्वं सर्वात्मकमिति यत्रोक्तम् जलभूम्योः परिणामिकं रसादिवैश्वरूप्यं स्थावरेषु दृष्टं तथा स्थावराणां जङ्गमेषु जङ्गमानां स्थावरेष्वित्येवं जात्यनुच्छेदेन सर्वं सर्वात्मकमिति। देशकालाकारनिमित्तोपबन्धान्न खलु समानकालमात्मनामभिव्यक्तिरिति यत्र तेष्वभिव्यक्तानभिव्यक्तेषु धर्मेषु अनुपाती सामान्य विशेषात्मा सोऽन्वयी धर्मी यस्य तु धर्ममात्रमेवेदं निरन्वयं तस्य भोगाभावः कस्मात् अन्येन विज्ञानेन ज्ञातस्य कर्मणो-

नातीतः अतीतस्य वर्त्तमानः पूर्ववेन समनन्तरो नाव्यपदेश्यः तस्माद्धानां यविष्ठीतीत इति सिद्धं स्यादेतदनुभूयमानावनुभूततया उदितातीतौ अक्षावुन्नेतु अव्यपदेश्यास्तु पुनर्धर्मा अव्यपदेश्यतयैव अक्षा नीत्वेतु मित्याशयवान् पृच्छति। अथाव्यपदेश्या के। केषु समीक्ष्यामहे। अत्रोत्तरमाह। सर्वं सर्वात्मकमिति यत्रोक्तमिति। एतदेवोपपादयति जलभूम्योरिति जलस्यहि रसरूपस्पर्शं शब्दवती भूमेश्च मन्यरसरूपस्पर्शं शब्दवत्याः पारिणामिकं वनस्पतिलता गुल्मादिषु मूलफल प्रसव पल्लवादिगत रसादि वैश्वरूप्यं दृष्टं सीयमनेन मात्मिकाया भूमेरनीदृशस्य वा जलस्य परिणामी भवतु नहीति उपपादितं हि नासत् उत्पाद्यत इति तथा स्थावराणां पारिणामिकं जङ्गमेषु मनुष्य पशु मृगादिषु रसादिवैचित्र्यं दृष्टं उपभुञ्जाना हि ते फलादीनि रूपादि भेदमन्यदमासादयन्ति एवं जङ्गमानां पारिणामिकं स्थावरेषु दृष्टं रुधिरावसेकात् किल दाडिमीफलानि तालफलमात्राणि भवन्ति उपलब्धरति। एवमिति एवं सर्वं जलभूम्यादि सर्वरसाद्यात्मकम्। तत्र हेतुमाह

ऽन्यत् कथं भोक्तृत्वेनाधिक्रियेत। तत् स्मृत्यभावश्च नान्यदृष्टस्य स्मरणमन्यस्यास्तीति वस्तुप्रत्यभिज्ञानाच्च स्थितोऽन्वयी धर्म्मी यो धर्म्मान्यथात्वमभ्युपगतः प्रत्यभिज्ञायते तस्मान्नेदं धर्म्ममात्रं निरन्वयमिति ॥ १४ ॥

क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥ १५ ॥

एकस्य धर्म्मिण एक एव परिणामइति प्रसक्तेः क्रमा-

ज्यानुच्छेदेन जलजलभूमित्यादिजातेः सर्व्वच प्रत्यभिज्ञायमानत्वे नानुच्छेदात् ननु सर्वं चेत् सर्व्वात्मकं इत्त भोः सत्वस्य सर्व्वदा सर्व्वच सर्व्वथा सन्निधानात् समानकालीनाभावानांव्यक्तिःप्रसज्येत न खलु सन्निहिताविकलकारणं कार्य्यं विलम्बितुमर्हति इत्यत आह। देशकालेति यद्यपि कारणं सर्व्वं सर्व्वात्मकं तथापि यो यस्य कार्य्यस्य देशो यथा कुङ्कुमस्य काश्मीरः तेषां सत्वेपि पाषाणादिषु न समुदाचार इति न कुङ्कुमस्य पाषाणादिष्वभिव्यक्तिरेवं निदाघेव प्रावृषः समुदाचार इति न तदा शालीनां एवं न समो मनुष्यं प्रसूते न तस्यां मनुष्याकारसमुदाचार इति एवं नापुण्यवान् सुखरूपं भुङ्क्ते न तस्मिन् पुण्यनिमित्तस्य समुदाचार इति तस्माद्देशकालाकारनिमित्तानामुपलम्भादुपगमान्न समानकालमात्मनां भावानामभिव्यक्तिरिति तदेवं धर्म्मान् विभज्य तेषु धर्म्मिणोनुगमं दर्शयति। यत्रवेष्विति। 'सामान्यं धर्म्मिरूपं विशेषोधर्म्मस्तदात्मोभयात्मक इत्यर्थः तदेव मनुभवसिद्धमनुगतं धर्म्मिणं दर्शयित्वातमनिच्छतो वैनाशिकस्य चयिकं विज्ञानमात्रं चित्तमिच्छतोनिष्ट प्रसङ्गमुक्त्वा आरयति यस्मादिति वस्तुप्रत्यभिज्ञानाच्चेति न हि देवदत्तेन दृष्टं यज्ञदत्तः प्रत्यभिजानाति तस्मादयमनुभविता स एव प्रत्यभिज्ञातेति ॥ १४ ॥

न्यत्वं परिणामान्यत्वे हेतुर्भवतीति तद्यथा चूर्णमृत्पिण्ड मृद्घट मृत्कपाल मृत्कण मृदिति च क्रमः। यो यस्य धर्म्मस्य समनन्तरो धर्म्मः स तस्य क्रमः। पिण्डः प्रच्यवते घट उपजायते इति धर्म्मपरिणामक्रमः लक्षणपरिणामक्रमो घटस्यानागतभावाद्वर्त्तमानभावक्रमः तथा पिण्डस्य वर्त्तमानभावादतीतभावक्रमः। नातीतस्यास्ति क्रमः कस्मात्

क्र—तुः। किमेकस्यधर्म्मिणएकएव धर्म्मलक्षणावस्थालक्षणः परिणामः उत बहवो धर्म्मलक्षणावस्थालक्षणाः परिणामास्तत्र किं प्राप्तं एकत्वाद्धर्म्मिण एक एव परिणामः न हि एकरूपात् कारणात् कार्य्यभेदो भवितुमर्हति तस्याकस्मिकत्व प्रसङ्गादिति। एवं प्राप्ते उच्यते। क्रमान्यत्वात् परिणामान्यत्वं एकस्यामृद्द्रव्यपिण्ड घटकपाल कलाकारा परिणतिपरम्परा क्रमवती लौकिक परीक्षकै रध्यक्षं समीक्ष्यते अस्त्येवं चूर्णपिण्डयो रानन्तर्य्यमन्यत्र पिण्डघटयोरन्यत्र घटकपालयोरेकत्र परस्मान्यत्र पूर्व्वत्वात्सोयं क्रमभेदः परिणामे एकस्मिन्नवकल्प्यमानः परिणामभेदमापादयति एकोपि च मृद्धर्म्मी क्रमोपनिपातित तत्तत्सहकारि समवधान क्रमेण क्रमवतीं परिणाम परम्परामूहहेतुनामाकस्मिकयतीति भावः धर्म्मपरिणामान्यत्ववत् लक्षणपरिणामान्यत्वे वस्थापरिणामान्यत्वे च समानं क्रमान्यत्वं हेतुरिति तदेतत् भाष्येणावद्योत्यते एकस्य धर्म्मिण इति क्रम क्रमवतीरभेदमाक्षाय स तस्य क्रम इत्युक्तं तथावस्था परिणाम क्रम इति तथाहि कौनाशेन कौष्टागारे प्रयत्न संरचिता अपि हि श्रीहयो हायनैरति बहुभिः पाणिस्पर्शमात्र विशीर्य्यमाणावयव संस्थानाः परमाणुभाव मनुभवन्ती दृश्यन्ते न चायमभिनवानामकस्मादेव प्रादुर्भवितु मर्हति तस्मात् चय परम्पराक्रमेण सूक्ष्म सूक्ष्मतर सूक्ष्मतम: बृहत् बृहत्तर बृहत्तमादि क्रमेण प्राप्तेषु विशिष्टोयं लक्षत इति। तदिदं क्रमान्यत्वं धर्म्मधर्म्मिभेदापेक्षं। तत्र वैत्याह। तत्रत इति आविकारेभ्यः आचालिङ्गादापेक्षिक धर्म्मधर्म्मिभावो सदा-

पूर्व्वापरतायां सत्यां समनन्तरत्वं सा तु नास्त्यतीतस्य तस्मात् द्वयोरेव लक्षणयोः क्रमः । तथावस्थापरिणाम क्रमोपि घटस्याभिनवस्य प्राप्ते पुराणता दृश्यते सा च क्षणपरम्परानुपातिना क्रमेणाभिव्यज्यमाना परां व्यक्ति मापद्यतइति धर्म्मलक्षणाभ्याञ्च विभिन्नोयं तृतीयपरिणाम इति । तत्र ते क्रमा धर्म्मांधर्म्मिभेदे सति प्रतिलब्धस्वरूपाः धर्म्मोपि धर्म्मी भवत्यन्यधर्म्मस्वरूपापेक्षयेति यदा तु पर-मार्थतो धर्म्मिन्यभेदोपचारास्तद्वारेण सएवाभिधीयते धर्म्म-स्तदायमेवं त्वेनैव क्रमः प्रत्यवभासते चित्तस्य ये धर्म्माः परिदृष्टाश्च अपरिदृष्टाश्च तत्र प्रत्ययात्मकाः परिदृष्टा वस्तु मात्रात्मका अपरिदृष्टास्ते च सन्तेव भवन्त्यनुमानेन प्रापित-

देरपि तन्मात्रापेक्षया धर्म्मत्वादित्याह धर्म्मोपीति यदा परमार्थं धर्म्मिण्यभिन्न भेदोपचारप्रयोगस्तद द्वारेण सामानाधिकरण्य द्वारेण धर्म्मोव धर्म्म इति यावत् तदेकएव परिणामः धर्म्मिपरिणाम एवेत्यर्थः धर्म्मलक्षणावस्थानां धर्म्मि स्वरूपाभि-निवेशात् तदनेन् धर्म्मिणो दूरोत्सारितं कूटस्थनित्यत्वमित्युक्तप्रायं धर्म्मपरिणामं प्रतिपादयन प्रसङ्गेन चित्तधर्म्माणां प्रकारभेदमाह चित्तस्येति परिदृष्टाः प्रत्ययाः अपरिदृष्टाः परीक्षाः तत्र प्रत्ययात्मकाः प्रमाणादयो रागादयश्च वस्तुमात्रा इत्यप्र-काशरूपतामाह । स्यादेतदपरिदृष्टाश्चेन्न सन्त्येवेत्यत आह । अनुमानेन प्रापित वस्तुमात्र सद्भावो येषां ते तथोक्ताः पश्चात्कालसा धर्म्मादागमीष्यनुमानं । सन्ता परिदृष्टान् कारिकया संगृह्णाति । निरोधेति निरोधोवृत्तीनामसम्प्रज्ञातावस्था चित्तस्यागमतः संस्कारशेषभावोनुमानञ्च समाधिगम्यते धर्म्मग्रहणेन पुण्यापुण्ये

वस्तुमात्रसङ्गावा। "निरोधधर्मसंस्काराः परिणामोऽथ जीवनं। चेष्टाशक्तिश्च चित्तस्य धर्मादर्शनवर्जिता" इति अतोयोगिन उप्राप्तसर्वसाधनस्य बुभुत्सितार्थप्रतिपत्तये संयमस्य विषय उपचिप्यते ॥ १५ ॥

परिणामत्रयसंयमादतीतानागतज्ञानम् ॥१६॥

धर्मलक्षणावस्थापरिणामेषु संयमात् योगिनां भवत्यतीतानागतज्ञानं धारणाध्यानसमाधित्रयमेकत्रसंयम उक्तस्तेन परिणामत्रयं साक्षात् क्रियमाणमतीतानागतज्ञानं तेषु सम्पादयति ॥ १६ ॥

उपलक्षयति क्वचित् कर्मेतिपाठस्तत्रापि तज्जनिते पुण्यापुण्ये एव गृह्यते ते चागमतः सुखदुःखोपभोग दर्शनाद्वानुमानतो गम्यते संस्कारस्तु स्मृतेरनुमीयते एवं त्रिगुणत्वाच्चित्तस्य चञ्चलगुणवृत्तिमिति प्रतिक्षण परिणामोऽनुमीयते एवं जीवनं प्राणधारणं प्रयत्नभेदो असंविदितः चित्तस्य धर्मश्वासप्रश्वासाभ्यामनुमीयते एवं चेतसश्चेष्टाक्रिया यथा यथा तैस्तैरिन्द्रियैःशरीर प्रदेशैर्वा सं प्रयुज्यते सापि तस्य योगादेवानुमीयते एवं शक्तिरपि उद्भूतानां कार्याणां सूक्ष्मावस्था चेतसोधर्मः स्थूलकार्यानुभवादेवानुमीयते इति ॥ १५ ॥

अतः परमापाद परिसमाप्तेः संयमविषयः तदङ्गीकार सूचनो विभूतिश्च वक्तव्या तत्रोक्तप्रकारं परिणामत्रयमेव तावत् प्रथममुपात्त सकल योगाङ्गस्य योगिनः संयमविषयतयोपचिपेति। प-नं। ननु यत संयमः तत्रैव साक्षात्करणं तत्

शब्दार्थप्रत्ययानामितरेतराध्यासात् सङ्करस्तत् प्रविभागसंयमात् सर्वभूतरुतज्ञानम् ॥१७॥

तत्र वाग् वर्णेष्वेवार्थवती। श्रोत्रञ्च ध्वनिपरिणाममात्र विषयं पदं पुनर्नादानुसंहारबुद्धिनिर्ग्राह्यमिति वर्णा एकसमयासम्भवित्वात् ॰ परस्परनिरनुग्रहात्मानस्तेपदम

कथं परिणामत्रयसंयमोतीतानागतं साक्षात्कारयेदित्यत आह। तेन परिणामत्रयं साक्षात् क्रियमाणं तेषु परिणामेष्वनुगते ये अतीतानागते तद्विषयज्ञानं सम्पादयति परिणामत्रय साक्षात् करणमेव तदन्तर्भूतातीतानागत साक्षात्करणात्मकमिति न विषयभेदः संयम साक्षात्कारयोरित्यर्थः ॥ १६ ॥

अथमपरसंयमस्य विषय उपक्षिप्यते। श—नं। अत्र वाचकं शब्दमाचिख्यासुः प्रथमं तावत् वाग्व्यापारविषयमाह। तत्र वाग्वागिन्द्रियं वर्णव्यञ्जकमष्टस्थानं यथाह। "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालुचेति" सा वाग्वर्णेष्वेव यथा लोकप्रतीति सिद्धेष्वर्थवती न च वाचक इत्यर्थः श्रोत्रव्यापारविषयं निरूपयति श्रोत्रं पुनर्ध्वनेरुपादानस्य वागिन्द्रियाभिघातिनो यः परिणतिभेदो वर्णात्मा तेनाकारेण परिणतं तन्मात्रविषयं न तु वाचकविषयमित्यर्थः यथा लोकप्रतीति सिद्धेभ्यो वर्णेभ्यो वाचकं भिनत्ति पदं पुनर्नादानुसंहारबुद्धिनिर्ग्राह्यं यथाप्रतीति सिद्धान्नादान् वर्णान् प्रत्येकं गृहीत्वा अनु पश्चाद् या संहरत्येकत्वमापादयति गौरित्येतदेकं पदमिति तया पदं गृह्यते यद्यपि प्राच्यापि बुद्धयो वर्णाकारं पदमेव प्रत्येकं गोचरयन्ति तथापि न विशदं प्रथते चरमे तु विज्ञाने तदतिविशदमिति नादानुसंहार बुद्धिनिर्ग्राह्य-

संस्पृश्यानुपस्थाप्याविर्भूतास्तिरोभूताश्चेति प्रत्येकमपद-
स्वरूपाउच्यन्ते वर्णाः पुनरेकैकः पदात्मा सर्व्वाभिधानशक्ति-
प्रचितः सहकारिवर्णान्तरप्रतियोगित्वाद्वैरूप्यमिवापन्नः
पूर्व्वश्चोत्तरेणोत्तरश्च सहकारिवर्णान्तरप्रतियोगित्वाद्वैर-
रूप्यमिवापन्नः पूर्व्वश्चोत्तरेणोत्तरश्च पूर्व्वेण विशेषेत्रस्थापित

मूलं यस्तु वैजात्यादेकपदानुभवमविज्ञाय वर्णानेव वाचकानातिष्ठते तं प्रत्याह वर्णा इति ते खल्वमी वर्णाः प्रत्येकं वाच्यविषयां धियमादधीरन्नागदन्तका इव शिक्षावलक्षणं संहतावा यावाण इव पिठरधारणं न तावत् प्रथमकल्पः एकस्या-र्थे प्रतीतेरुत्पत्तेरुत्पत्तौ वा द्वितीयादीनामनुच्चारण प्रसङ्गो निष्पादितक्रियं कर्म्मणि विशेषणाधायिनः साधनस्य साधन न्यायातिपातात् तस्मात् द्वितीय: परिशिष्यते सम्भवति हि यावर्णा संहतानां पिठरधारणं एक समयभावित्वात् वर्णा-नान्तु यौगपद्यासम्भवीतः परस्परमनुग्राह्यानुग्राहकत्वायोगात् सम्भूयापि नार्थे धियमादधते । ते पदरूपमेकमसंस्पृशन्तः तदात्मनातएवानुपस्थापयन्तः आविर्भू-तास्तिरोभूता अयञ्चलाकाकल्पा प्रत्येकमपदस्वरूपा उच्यन्ते यदि पुनः पदमेकं तादात्म्येन स्पृशेयुः वर्णास्ततो नीलादीव प्रसङ्ग इत्याह । वर्णः पुनरेकैकः पदात्मा सर्व्वाभिरभिधानशक्तिभिर्निश्चितो गौर्गच्छः गौरनड इत्यादिषु हि गकारो गोत्वा-द्यर्थाभिधायिषु दृष्ट इति तत्तदभिधान शक्तिः एवं सौमश्रौचिरित्यादिश्रीश्वराद्यर्था-भिधायिषु पदेषु तु वर्णदृष्टः सौपि तत्तदभिधानशक्तिः एवं सर्व्वत्रौहनीयं सचे-कैको वर्णः गकारादिः सहकारि यद्वर्णान्तरं औकारादि तदेव प्रतियोगि प्रति-सम्बन्धि यस्य स तथोक्तस्य भावस्तत्वं तस्माद्वैरूपं नानात्वमिवापन्नो न तु नानात्वमापन्नः तस्मादेव पूर्व्ववर्णो गकारः उत्तरेण औकारेण गणादिपदेभ्यो

इत्येवं बहवोवर्णाः क्रमानुरोधिनोर्थसङ्केतेनावच्छिन्ना इयं तत्र ते सर्व्वाभिधानशक्तिपरिहृता गकारौकारविसर्ज्जनीया साक्षादिमन्तमर्थं द्योतयन्तीति। तदेतेषां अर्थ सङ्केतेनावच्छिन्नानामुपसंहृतध्वनिक्रमाणां यत्रकोबुद्धि

व्यावर्त्तोत्तरत्र औकारो गकारेण श्रीचिरादि पदेभ्यो व्यावर्त्य विशेषे गोवाचके गीपद स्फोटेवस्थापितोनुसंहार दुष्टो अयमभिसन्धिरर्थं प्रत्ययो हि वर्णैर्नियत क्रमतया परस्परमसम्भवद्भिरशक्यः कर्त्तुं न च संस्कार द्वारापि यादीनामिव परमा- पूर्व्वं वा स्वर्गे वा जनयितव्ये नियत क्रमाणामपि साहित्यमर्थबुध्युपजनने च वर्णानामिति साम्प्रतं विकल्पासहत्वात्। स खल्वयं वर्णानुभवजन्यः संस्कार स्मृति- प्रसवहेतुरन्त्यो वाय्वेयादि जन्य इवा पूर्व्वाधानो न तावदन्तरः कल्पनागौरवापत्तेः स एव तावददृष्ट पूर्व्वं कल्पनीयं तस्य च क्रमवद्भिर्वर्णानुभवैरेकस्य जन्यत्वं न सम्भव- तीति तज्जातीयानेकावान्तर संस्कार कल्पनेति गौरवं न चैष ज्ञापकहेत्वङ्गमज्ञात- रूपङ्गतामनुभवतीति न खलु सम्बन्धीयं प्रत्ययानां गमज्ञातीङ्गतामुपेति स्मृतिफल- प्रसवानुन्मितस्तु संस्कारः स्वकारणानुभव विषय नियतो न विषयान्तरे प्रत्ययमाधातु- मुत्सहते अन्यथा यत्किञ्चिदेवैकैकमनुभूय सर्व्वः सर्व्वं जानियादिति न च प्रत्येकवर्णानुभव जनित संस्कार पिण्डलब्ध जन्मस्मृतिदर्शन समारोहिणी वर्णाः समधिगत सहभावा वाचका इति साम्प्रतं क्रमाक्रम विपरीत क्रमानुभूतानां तत्रोविशेषेणार्थ धीजनन प्रसङ्गात् न चैतत्स्मरण ज्ञानं पूर्व्वानुभववर्त्तिनौ परा परतां गोचरयितु मर्हति तस्मादर्णेभ्यो सम्भवन्नर्थ प्रत्यय एकपदानुभवमेव स्व निमित्तं उपकल्पयति न चैकपदेपि प्रसङ्गः तद्धि प्रत्येकमेव प्रयत्नभेदे भिन्ना- भिनयो व्यञ्जयन्तः परस्पर सदृश तत्तत्पदव्यञ्जक ध्वनिभिस्तुल्य स्थानकरण

निर्भागस्तत्पदं वाचकं वाच्यस्य सङ्केत्यते। तदेकं पादमेकबुद्धिविषयएकप्रयत्नाच्चिन्नभागक्रममवर्णं बौद्धमन्तवर्णप्रत्ययोव्यापारोपस्थापितं परत्र प्रतिपिपादयिषया बलैरेवाभिधीयमाणैः अयमाणैश्च ओत्पभिरनादिवाग्व्यव-

निष्पन्नाः सदृशाः सन्तोन्योन्य विसदृशैः पदैः पदमेकं सदृशमापादयन्तः प्रतियोगिभेदेन तत्तत् सादृश्यानां भेदात्तदुपधानादेकमपि अनवयवमपि सावयवमिवानेकात्मकमिवाव भासयन्ति यथा नियत वर्ण परिमाण संस्थानं मुखमेकमपि मणिकृपाण दर्पणादिभिर्विभिन्न वर्ण परिमाण संस्थानमनेक दर्शयन्ति न परमार्थतः सादृश्योपधान भेदकल्पिता भागाएव निर्भागस्य पदस्य वर्णाः तेन तद्बुद्धि वर्णात्मना पदभेदे स्फोटमभेदमेव निर्भागमेव सभेदमिव सभागमिवाखण्डते अतो गोपदस्फोट भेदस्यैकस्य गकारीभाग गौरादि पद स्फोट सादृश्येन न निर्द्धारयति स्वभागिगोमित्योकारेण विशिष्टो निर्द्धारयत्येव ओकारोपि भागः शौचिरादि पदसदृशतया न शक्तो निर्द्धारयितुं स्वभागिनं गोपदस्फोटमिति गकारेण विशिष्टो निर्द्धारयति असहभाविनामपि च संस्कार द्वारेणास्ति सहभावः इति विशेषण विशेष्य भावोपपत्तिः न च भिन्नविषयत्वं संस्कारयोर्भागद्वयविषययोरनुभवयो स्तज्जन्यनीय संस्कारयोरेक विषयत्वात् केवलभागानुभवेन पदमव्यक्तमनुभूयते अनुसंहारविषया तु भागानुभवयोर्नि संस्कारलब्ध जन्मनाव्यक्तमिति विशेषः अव्यक्तानुभवाश्च प्राच्यः संस्काराधान क्रमेण व्यक्तमनुभवमादधाना दृष्टाः यथा दूराद्दनस्यतावस्तिप्रत्यया अव्यक्ताव्यक्त वनस्पति प्रत्ययहेतवः न चैयं विधारणानामर्थ प्रत्यायनी सम्भविनी खलु वर्णाः प्रत्येकमव्यक्तमर्थं प्रत्ययमादधत्यन्ते व्यक्तमिति शक्यं वक्तुं प्रत्यक्षज्ञानएव नियमात् व्यक्ताव्यक्तत्वस्य वर्णधियस्तथं प्रत्ययो न प्रत्यक्षः तदेष वर्णेभ्यो जायमानः स्फुटएव जायेत न वा जायेत तत्स्फुट स्फोटस्य तु

हारवासनानुविद्धया लोकबुद्ध्या सिद्धवत् संप्रतिपत्त्या प्रतीयते। तस्य सङ्केतबुद्धितः बुद्धिप्रविभागः एतावतामेव जातीयकानुसंहारः एकस्यार्थस्य वाचकइति सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मकोयंशब्दः

ध्वनिव्यङ्ग्यस्य प्रत्यक्षस्य सतः स्फुटास्फुटत्वे कल्प्येते इत्यसमानं एवं प्रत्येक वर्णानुभव जनित संस्कार सहित शीचरम जन्मन्यनु संहार बुद्धी संहतावर्णा एकपद स्फोटभावमापन्नाः प्रयत्न विशेष व्यङ्ग्यतया प्रयत्नविशेषस्य च नियत क्रमापेक्षतया क्रमस्यान्यत्वे तदभिव्यङ्गक प्रयत्न विशेषाभावेन तदभिव्यक्तभाव प्रसङ्गात् क्रमानुरोधिनीर्थं सङ्केतेनावच्छिन्ना सङ्केतावच्छेदमेव लौकिकं सभागपदविषयं दर्शयन्ति इयन्तोदिचाखिचतुराः पचषड्वा एते सर्व्वाभिधानशक्ति परिहृता गकारौकार विसर्ज्जनीयाः साक्षादिमन्तमर्थमवद्योतयन्ति तत् किमिदानीं सङ्केतानुसारेण वर्णानामेव वाचकत्वं तथाच न पदं नाम किञ्चिदेकमित्यत आह।

तदेतेषामिति ध्वनि निमित्तः क्रमोध्वनि क्रमः। उपसंहृतीध्वनिक्रमोयेषु ते तथोक्ता बुद्धा निर्भासते प्रकाश्यत इति बुद्धिनिर्भासः सङ्केतावच्छिन्नाः स्थूलदर्शि लोकाश्रयानुरोधेन गकारौकार विसर्ज्जनीया इत्युक्तं गकारादीनामपि तदभाग तया तादात्म्येन वाचकत्वात् प्रतीत्यनुसारतश्चैकमेव पदं वाचकमित्यर्थः। एतदेव स्पष्टयति। तदेकं पदं लोक बुद्धा प्रतीयत इति सम्बन्धः। कस्मादेक मित्यत आह एक बुद्धि विषयी गौरित्येकं पदमित्येकाकारायाः बुद्धेर्विषयो यतः तस्मादेकं तस्य व्यञ्जकमाह। एकप्रयत्नाचिप्तमिति रस इति पदव्यञ्जकात् प्रयत्नात् विलक्षणः सर इति पदव्यञ्जकः प्रयत्नः सचोपक्रमतः सर इति पदव्यक्तिः लक्षण क्षणावच्छिन्न पूर्व्वापरीभूत एकस्तदाचिप्तं भागानां सादृश्योपधान भेद कल्पितानां

सोयमर्थायोर्थः सशब्दइत्येवमितरेतराध्यासरूपः सङ्केतो भवति इत्येवमेते शब्दार्थप्रत्यया इतरेतराध्यासात् सङ्कीर्णगौरितिशब्दो गौरित्यर्थो गौरिति ज्ञानं यएषां प्रविभागज्ञः स सर्ववित्। सर्वपदेषु चास्ति वाक्यशक्तिश्च इत्युक्ते

परमार्थसतां सभावादभागं अतएव पूर्वापरीभूत भागाभावादक्रमं ननु वर्णाः पूर्वापरीभूताः तेचास्य भागाइति कथमक्रममभागं चेत्यत आह। अवर्णे नक्षस्य वर्णा भागाः किन्तु सादृश्योपधानभेदात् पदमेव तेन तेनाकारेणापरमार्थसता प्रथते न हि मणिकृपाण दर्पणादि वर्त्तीनि मुखानि मुखस्य परमार्थसतोऽवयवा इति बौद्धमनुसंहारः बुद्धौविदित मन्त्यवर्ण प्रत्ययस्य व्यापार संस्कारः पूर्ववर्णानुभवजनित संस्कारसचिवस्तेनोपस्थापितं विषयीकृतं वर्णानुभव तत्तत्संस्काराणाच्च पदविषयत्वं उपपादित मधस्तात् स्यादेतदभागमक्रममवर्णं चेत् पदतत्वं कस्यादेवं विधं कदाचिन्न प्रथते नहि लाक्षारसावसेकोपधानापादितारुण भावः स्फटिक मणिस्तदपगमे स्वच्छधवलो नानुभूयते तस्मात् पारमार्थिका एव वर्णा इत्यत आह। परत्रेति प्रतिपिपादयिषया वर्णैरेवाधीयमाने क्वचार्थ्यमाने: श्रूयमाणैश्चगौडभिरनादिः योयं वाग्व्यवहारो विभक्तवर्ण पद निबन्धनः तज्जनिता वासना साध्यनादिरेव तदनुविद्धया तद्वासितया लोकबुद्ध्या विभक्त वर्णरचित पदावगाहिन्या सिद्धवत् सम्प्रतिपत्त्या सम्बादेन ह्रस्वानां पदं प्रतीयते एतदुक्तं भवति अस्ति कश्चिदुपाधिर्व उपधियेन संयुज्यते वियुज्यते च यथा लाक्षादिसचिवे तद्वियोगे स्फटिकः स्वाभाविकेन स्वच्छधवलेन रूपेण प्रकाश इति युज्यते पदप्रत्ययस्य तु प्रयत्नभेदोपनीत ध्वनिभेदादन्यतीनुत्पादात्तस्य च सदासादृश्य दोषभूयिततया वर्णात्मनैव प्रत्यय जनकत्व मिति कुतोनिरूपाधिनः पदस्य प्रथमा यथाहुर्ध्वनयः सादृश्यात्मनो विपर्यासस्य हेतव

ऽस्तीति गम्यते न सत्तां पदार्थो व्यभिचारयतीति तथानच्छ साधना क्रियास्तीति तथा च पचतीत्युक्ते सर्व्वकारकाणा मात्तेपोनियमार्थोऽनुवादः कर्त्तृकरणकर्म्मणां चैत्राग्नितण्ड-लान्यमिति। दृष्टश्च वाक्यार्थे पदरचनं श्रोत्रियश्छन्दोधीते जीवति प्राणान धारयति। तत्र वाक्ये पदपदार्थोभिव्यक्ति-

उपलभ्यक मेतेषां विपर्यासस्य कारणं उपायत्वाच्च नियतः पददर्शितं दर्शिनां ज्ञान-स्यैवच बाधेयं लोकेष्वसुपपन्न इति। यतः पदात्मा विभक्तवर्णरूपितः प्रकाशते अतः स्थूलदर्शिलोको वर्णानेक पदमभिमन्यमानस्तानेव प्रकारभेदभाजीर्थे भेदे सङ्केत यतीत्याह। तस्येति तस्य पदस्याजानतः एकस्यापि सङ्केत बुद्धितः स्थूलदर्शिलोक हितये वर्णात्मना विभागः। विभागमाह एतावता न न्यूनानधिकानां वा एवं जातीयको नैरन्तर्य क्रमविशेषः अनुसंहार एक बहुरूपग्रहः। एकस्यार्थस्य गोलादे-र्वाचक इति। ननु यद्येकस्यार्थस्यायं शब्दोवाचक इति सङ्केतः इत्तभो: शब्दार्थ-योर्नेतरेतराध्यासस्तर्हीत्यत आह। सङ्केतस्तिति। स्मृतावात्मा स्वरूपं यस्य स तथोक्तः तद्विकृतस्त्वेवं सङ्केतीर्थमवधारयत्यपितुस्मर्यमाणःएतदुक्तं भवतिअभिन्नाकारएवसङ्केते कथञ्चिद्भेदं विकल्प्य षष्ठीप्रयुक्तेति। यएषां प्रविभागज्ञःसतचसंयमेभवतिसर्व्ववित् सर्व्वभूतरुतज्ञइति। तदेवं विकल्पितवर्णभागमेकमनयवयवं पदं व्युत्पाद्यकल्पित पदविभागं वाक्यं एकमनवयवं व्युत्पादयितुमाह। सर्व्वपदेषुचास्तिवाक्यशक्तिःअयमस्ति सन्धिः परप्रत्यायनायशब्दःप्रयुज्यते तदेवचपरं प्रतिप्रतिपादयितव्यं यत्तेःप्रतिपिप्रिसितं यदुपदानादिगीचरीनचपदार्थमात्रं तद्गोचरःकिन्तुवाक्यार्थइतिवाक्यपराएवसर्व्वे शब्दा स्तेनसएवतेषामर्थःअतीयवापिकेवलस्यपदस्यप्रयोगस्तत्रापिपदान्तरेणसङ्केतीकृत्यततो-द्योगम्यतेनतुकेवलात्तस्मात्तन्मात्रस्यासामर्थ्यात्तथाचवाक्यमेवतत्तत्तवं चकंनतुपदानि

स्तत: पदं प्रविभज्य व्याकरणीयं क्रियावाचकं कारकवाचकं वा अन्यथा भवत्यऽश्वोऽजापयदित्येवमादिषु नामाख्यातसारूप्यादनिर्ज्ञातं कथं क्रियायां कारके वा व्याक्रियेतेति तेषां शब्दार्थप्रत्ययानां प्रविभागः। तद् यथा श्वेतते प्रसादइति क्रियार्थः श्वेतश्वेतः प्रसादइति कारकार्थः शब्दः क्रिया कारकात्मा तदर्थः प्रत्ययश्च कस्मात्

तद्भागतयातुतेषामप्यस्तिवाक्यार्थवाचकशक्तिपदार्थ इव पदभागतयावर्णानांतेन यथा वर्णएकैकः सर्व्वपदार्थाभिधानशक्तिप्रचितएवं पदमप्येकैकंसर्व्ववाक्यार्थाभिधानशक्तिप्रचितंतदिदमुक्तंसर्व्वपदेषुचास्तिवाक्यशक्तिःश्वेतइत्युक्तेअस्तीतिगम्यतेअध्याहृतास्तिपदसहितंश्वेतइतिपदं वाक्यार्थेवर्त्ततइतितद्भागत्वाच्चपदंतत्रवर्त्ततेतस्मात्पुनरस्तीतिगम्यतइत्यतआह। नसत्तांपदार्थो व्यभिचरतीतिलोकएवहिपदानामर्थावधारणोपायःसचकेवलंपदार्थमस्त्यर्थेनाभिसमस्यसर्व्वंचवाक्यार्थीकरोतिसीयमाभिचारःसत्तयापदार्थस्यअतएवशब्दवृत्तिविदोव्यवहारीयंयच्चान्यक्रियापदंनास्तिनास्तिभवन्तिपरःप्रयोक्तव्यइतिक्रियाभेदाव्यभिचारिप्रातिपदिकमुक्त्वाक्रियाभेदंकारकाव्यभिचारिणंदर्शयति तथाचपचतौल्युक्तेहिकारकमाचक्षतेदन्वययोग्यत्वमात्रमन्यव्यावृत्तिपरमतइदानींअनुवादःतदेवंभेदएववाक्यार्थइति। तथानपेक्षमपिपदंवाक्यार्थेवर्त्तमानंदृश्यतइति सुतरामस्तिवाक्यशक्तिःपदानामित्याह। दृष्टंचैतावतापिश्रोत्रियादिपदस्यस्वतन्त्रस्यैवंविधार्थप्रत्यायनंनयावदन्त्यादिभिरभिसमासीस्यभवति तथाचास्यापिवाक्यावयवत्वात्कल्पितत्वमेवेतिभावःस्यादेतत्पदानामेवचेद्वाक्यशक्तिः कृतंतर्हिवाक्येनतेभ्य एवतद्वसायादित्यतआह।

तत्रवाक्यइति । उक्तमेतत्तत्रकेवलात्पदात्पदार्थप्रतिपित्सितः प्रतीयतेनयाव-

सोयमित्यभिसम्बन्धादेकाकारएव प्रत्ययः सङ्केत इति यस्तु खेतोर्थः स शब्दप्रत्ययययोरालम्बनीभूत सहिताभिरवस्थाभिर्व्विक्रियमाणो न शब्दसहगतो न बुद्धिसहगतः। एवं शब्द एवं प्रत्ययोनितरेतरसहगतइति। अन्यथार्थोन्यथा शब्दोन्यथा प्रत्ययइति विभागः। एवं तत् प्रविभागसंयमात् योगिनः सर्व्वभूतरुतज्ञानं सम्पद्यते इति ॥१७॥

दितत्पदान्तरेणाभिसमस्यतइतितथाचवाक्यात्पदान्यपीष्टमित्य कल्पितानिवाक्यार्थाश्चापीष्टमित्यतदेकदेशंकारकं वाक्रियांवातत्पदंप्रकृत्यादिविभागकल्पनयाव्याकरणीयमन्वाख्येयंकिमर्थं पुनरेतावताक्लेशेनान्वाख्यायतइत्यतआह। अन्यथेतिघटीभवतिभवतिभित्वादेहि भवतितिष्ठतीतिनामाख्यातयोश्च सामान्यतएवमभस्तं अस्तीयातीति एवमजापयः पिबश्रजापयःश्रवूनितिनामाख्यातसारूप्यादनिर्ज्ञातंनामत्वेनाख्यातत्वेन वाअन्वाख्यानाभावेनिष्कृष्यज्ञातंकथंक्रियायांकारकेवाव्याक्रियेततस्माद्वाक्यात्पदान्यपीष्टमित्यव्याख्यातव्यानिनतुअन्वाख्यानादेवपारमार्थिकीविभागःपदानामिति। तदेवंशब्दरूपंव्युत्पाद्यशब्दार्थप्रत्ययानांसङ्केतापादितसङ्कराणामसङ्करमाख्यातुमुपक्रमते। तेषांशब्दार्थप्रत्ययानांविभागः। तदयथाश्वेतेप्रसादइति। क्रियार्थःशब्दःस्फुटतरोह्यंपूर्व्वपरीभूतायाः क्रियायाःसाध्यरूपायाःसिद्धरूपक्रियार्थःश्वेतइति। भिन्नःशब्दः। यद्यपिशब्दार्थयोःसिद्धरूपत्वंतथाप्यर्थादस्तिशब्दस्यभेदइत्याह। श्वेतःप्रसादइतिकारकार्थःशब्दोभिहितत्वान्नकारकविभक्तेरभावः। अर्थंविभजतेक्रियाकारकात्मातदर्थस्तयोःशब्दयोरर्थःक्रियात्मकारकात्मच। प्रत्ययंविभजते प्रत्ययश्चेति चशब्देनतदर्थइत्येतत् पदमवान्तरवाक्यतेतदवान्तरपदार्थप्रधानंसम्बध्यतेसएवक्रियाकारकात्मार्थोयस्यसतथोक्तः। नन्वभेदेनप्रतीतेः शब्दार्थप्रत्ययानांसङ्करात्कुतःप्रविभागइत्याशयवान्

संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्॥१८॥

द्वये खल्वमी संस्काराः स्मृतिः क्लेशहेतवोवासनारूपा विपाकहेतवः धर्माधर्मरूपास्ते पूर्वभवाभिसंस्कृताः परिणामचेष्टा निरोधशक्तिजीवनधर्मवदपरिदृष्टा चित्तधर्मास्तेषु संयमः संस्कारसाक्षात्क्रियायै समर्थः । न च देशकालनिमित्तानुभवैर्विनातेषामस्ति साक्षात्करणम् । तदित्थं संस्कारसाक्षात्करणात् पूर्वजातिज्ञानमुत्पद्यते योगिनः । परत्राप्येवमेव संस्कारसाक्षात्करणात् परजातिसंवेदनम् । अत्रेदमाख्यानं श्रूयते भवगतोजैगीषव्यस्य संस्कारसाक्षात्करणाद्दशसु महासर्गेषु जन्मपरिणामक्रममनुपश्यतो विवेकजं ज्ञानं प्रादुरभवत् अथ भगवानावटास्तनुधरमुवाच दशसु महासर्गेषु भव्यत्वादनभिभूतबुद्धिसत्वेन त्वया

पृच्छविकल्पादिति । उत्तरमाह सीयमित्यभिसम्बन्धादिति । सङ्केतोपाधिरेकाकार प्रत्ययीमनुवालिकइत्यर्थः सङ्केतस्यनिमित्तताद्गृहीतासङ्केतइतिसम्यापरमार्थमाह । यस्तु सङ्केतोर्थइतिअवस्थानवपुराणत्वादय:सङ्गतसङ्केतार्थएवचप्रविभागसंयमात्योगिनः सर्वेषांभूतानांपशुमृगसरीसृपवयःप्रभृतीनांयानिरुतानितत्राप्यव्यक्तं पदं तदर्थःप्रत्ययश्चेतिदिङ्मात्रमनुव्यवचनवाच्यप्रत्ययेषुकृतः संयमःसमानजातीयतया तेष्वपिकृतएवेति तेषां स्वसंतदर्थभेदंतत्प्रत्ययचयीगीजानातीतिसिद्धम् ॥ १७ ॥

सं–नं ज्ञानजाहिसंस्काराःस्मृतेर्हेतवो अविद्यादिसंस्काराअविद्यादीनां क्लेशानां हेतवः । विपाको जात्यायुर्भोगरूपस्य हेतवो धर्माधर्मरूपाः पूर्वेषु भवेष्वभि

नरकतिर्य्यग् गर्भसम्भवं दुःखं सम्यग्यता देवमनुष्येषु पुनः पुनरुत्पद्यमानेन सुखदुःखयो किमधिकमुपलब्धमिति भगवन्तमावटयं जैगीषव्य उवाच दग्धसु महासर्गेषु भव्यत्वादनभिभूतबुद्धिसत्वेन मया नरकतिर्य्यग्भवं दुःखं सम्यग्यता देवमनुष्येषु पुनः पुनरुत्पद्यमानेन यत्किञ्चिदनुभूतं तत् सर्व्वं दुःखमेव प्रत्यवैमीभगवानावट्य उवाच यदिदमायुषतः । प्रधानवशित्वमनुत्तमञ्च सन्तोषसुखं किमिदमपि दुःखपक्षे निःक्षिप्तमिति भगवान् जैगीषव्य उवाच विषयसुखापेक्षयैवेदमनुत्तमं सन्तोषसुखमुक्तं कैवल्यापेक्षया दुःखमेव बुद्धिसत्वस्यायं धर्म्मस्त्रिगुणः त्रिगुणस्य प्रत्ययोहेयपक्षे न्यस्तइति । दुःखस्वरूपतृष्णातन्तुस्तृष्णादुःखसन्तापापगमात् प्रसन्नमबाधं सर्व्वानुकूलं सुखमिदमुक्तमिति ॥ १८ ॥

संस्कृताः निष्पादिताः स्वकारणैर्यथा संस्कृतं व्यञ्जनं हृतमिति गम्यते परिणामचेष्टा निरोध शक्ति जीवनान्येव धर्म्माश्चित्तस्य तद्वपरिदृष्टाश्चित्तधर्म्मास्तेषु श्रुतेष्वनुमितेषु सपरिकरेषु संयम संस्काराणां हेयेषां साक्षात्क्रियायै समर्थः । अस्तु तत्र संयमात्तत्साक्षात्कारः पूर्व्वजाति साक्षात्कारस्तु कुत इत्यतआह । तत्र हेयेति निमित्तं पूर्व्वं शरीर मिन्द्रियादि च सानुबन्ध संस्कारसाक्षात्कार एव मान्तरीयक तया जात्यादि साक्षात्कार माक्षिपतीत्यर्थः स्वसंस्कार संयमं परकीयेष्यति दिशति। परशास्त्रेवमिति अत्र श्रद्धोत्पादे हेतु मनुभवत आवटस्य जैगीषव्येन संवाद मुपन्यस्यति । अथानुश्रूयत इति । महाकल्पः महासर्गैः तनुधरइति निर्म्माणकायसम्पदुक्ता भव्यः श्रीमती विगलित रजस्तमीमल इत्यर्थः प्रधान वशित्वमैश्वर्यं तेन हि

प्रत्ययस्य परचित्तज्ञानम् ॥१९॥

प्रत्यये संयमात् प्रत्ययस्य साक्षात्करणात्ततः परचित्तज्ञानं न च तत्तालम्बनं तस्याविषयीभूतत्वात् रक्तं प्रत्ययं जानात्यमुष्मिन्नालम्बने रक्तमिति न जानाति परप्रत्ययस्य यदालम्बनं तद् योगिचित्तेन नालम्बनीकृतं परप्रत्ययमात्रन्तु योगिचित्तस्यालम्बनीभूतमिति ॥ १९ ॥

कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंप्रयोगेऽन्तर्द्धानम् ॥२०॥

कायरूपे संयमाद्रूपस्य या ग्राह्यशक्तिस्तां प्रतिबध्नाति ग्राह्यशक्तिस्तम्भे सति चक्षुःप्रकाशासंयोगेऽन्तर्द्धानमुत्प-

प्रधानं विवेकाः यस्मै यादृशीं कार्येन्द्रिय सम्पदं दित्सति तस्मैतादृशीं ददाति परकीयानि च कार्येन्द्रिय सहस्राणि निर्म्मायान्तरिक्षे दिवि भुवि च यथेच्छं विहरतीति। सन्तोषो हि तृष्णाक्षयो बुद्धिसत्वस्य प्रशान्तता धर्म्मः ॥ १८ ॥

प्र—नं। परप्रत्ययस्य चित्तमात्रस्य साक्षात्करणादिति यथा संस्कार साक्षात्कार. तदनुबन्ध पूर्व्वजन्म साक्षात्कार माक्षिपत्येवं परचित्त साक्षात्कारः अपि तदालम्बन साक्षात्कार माक्षिपेदिति प्राप्ते आह नचेति। सानुबन्ध संस्कार विषयो सीयं यत्नः अयन्तु परचित्तमात्र विषय इत्यभिप्रायः ॥ १९ ॥

का – नम्। पञ्चात्मकः कायः स च रूपवत्तया चाक्षुषो भवति रूपेण हि कायस्य तद्रूपस्य चक्षुर्ग्राह्य कर्म्मशक्ति मनुभवति तच्च यदा रूपे संयम विशेषो योगिना

दते योगिनः । एतेन शब्दाद्यन्तर्द्धानमुक्तं वेदितव्यम् ॥२०॥

सोपक्रमं निरुपक्रमञ्च कर्म्म ततसंयमादि-परान्तज्ञानमरिष्टेभ्योवा ॥२१॥

आयुर्व्विपाकं कर्म्म द्विविधं सोपक्रमं निरुपक्रमं । तत्र यथार्द्रवस्त्रं वितानितं लघीयसा कालेन शुष्येत् तथा सोपक्रमं । यथाच तदेव सपिण्डितं चिरेण संशुष्येत् एवं निरुपक्रमं । यथावाग्निः शुष्के कच्चे मुक्तोवातेन समं ततो युक्तः क्षेपीयसा कालेन दहेत्तथा सोपक्रमं यथा वा सएवाग्निस्तृणराशौ क्रमशोवयवेषु न्यस्तश्चिरेण दहेत् तथा निरुपक्रमं । तदेकभविकभायुष्करं कर्म्म द्विविधं सोपक्रमं निरुपक्रमञ्च तत्संयमादपरान्तस्य प्रायणस्य ज्ञानमरिष्टेभ्यो वेति त्रिविधमरिष्टमाध्यात्मिकमाधिदैविकञ्चेति तत्राध्या

क्रियते तदा रूपस्य ग्राह्यशक्तौ रूपवत्काय प्रत्यक्षता हेतु स्तथाते तस्मात् ग्राह्यशक्ति स्तस्मै स्वस्यन्तर्द्धान योगिन स्तत: परकीय चक्षु र्जनितेन प्रकाशेन ज्ञानेनासम्प्रयोग चक्षुर्ज्ञानाविषयत्वयोगिनः कायस्येति यावत् तस्मिन् कर्त्तव्ये ऽन्तर्द्धानं कारणमित्यर्थः। एतेनेति काय शब्दस्पर्श रसगन्ध संयमात्तद्ग्राह्यशक्ति स्तस्मै श्रोत्रत्वयसन घ्राण प्रकाशा सम्प्रयोगेन्तर्द्धानमिति ॥ २० ॥

सूत्र मूहनीयं सो—वा । आयुर्व्विपाकञ्च कर्म्म द्विविधं सोपक्रमं निरुपक्रमञ्च यत्खल्वेकं भविकं कर्म्म जात्वायुर्भोग हेतु स्तदायुर्व्विपाकं चित्क्षणापेक्षमेव भोगदानाय प्रस्थितं दत्त बहुभोगमल्पावशिष्टफलं प्रवृत्तव्यापारं

त्मिकं घोषं स्वदेहे पिहितकर्णो न शृणोति ज्योतिर्वा नेत्रे वष्टब्धे पश्यति। तथाधिभौतिकं यमपुरुषान् पश्यति पितृननीतानकस्मात् पश्यति। आधिदैविकं स्वर्गमकस्मात् सिद्धान् वा पश्यति विपरीतं वा सर्व्वमिति अनेन वा जानात्यपरान्तं मरणमुपस्थितमिति॥ २१॥

मैत्र्यादिषु बलानि॥२२॥

मैत्रीकरुणामुदितेति तिस्रोभावनास्तत्र भूतेषु सुखिभूतेषु मैत्रीं भावयित्वा मैत्रीबलं लभते दुःखितेषु करुणां

केवलं तत्फलस्य सहसा भोक्तुं एकेन शरीरेणाशक्यत्वादिलम्बितं तदिदं सोपक्रमं सुपक्रमीव्यापारस्थत् सङ्क्षिप्तमित्यर्थः तदेव तु दत्तस्त्रीकफलं तत्कालमपेक्ष्य फलदानाय व्याप्रियमाणं कादाचित्कं मन्दव्यापारं निरुपक्रमं एतदेव निदर्शनार्थां विशदयति तत्र यथेति अत्रैवाति वैशद्याय निदर्शनान्तरं दर्शयति। यथा वा वह्निरिति परान्तं महाप्रलयमपेक्षापरान्तो मरणं तस्मिन् कर्म्मणि धर्म्माधर्म्मयोः संयमात् परान्तज्ञानं ततः एव योगी सोपक्रम मात्मनः कर्म्म विज्ञाय वक्ष्यन् कायाग्निर्माय सहसा फलं भुक्त्वा स्वेच्छया म्रियते। प्रासङ्गिकमाह अरिष्टेभ्यो वा अरिवत् त्रासयन्तीत्यरिष्टानि विविधानि मरणचिह्नानि विपरीतवासर्व्वं माहेन्द्रजालानि व्यतिरेकेण ग्रामनगरादि स्वर्गमभिमन्यते मनुष्यलोकमेव देवलोकमिति॥ २१॥

मै—नि। मैत्र्यादिषु संयमात् मैत्र्यादिवन्नान्यस्य भवन्ति तत्र मैत्रीभावनातो बलं येन जीवलोकं सुखाकरोति ततः सर्व्वहितोभवति एवं करुणाबलात् प्राणिनो दुःखाद् दुःखहेतोर्वा समुद्धरति एवं मुदितावलाज्जीवलोकस्य माध्यस्थ माधत्ते

भावयित्वा करुणाबलं लभते पुण्यशीलेषु मुदितां भावयित्वा मुदिताबलं लभते। भावनातः समाधिर्यः स संयमस्ततो बलान्यवन्ध्यवीर्याणि जायन्ते पापशीलेषूपेक्षा न तु भावना ततश्च तस्यां नास्ति समाधिरिति अतो न बलमुपेक्षातस्तत्र संयमाभावादिति ॥ २२ ॥

बलेषु हस्तिबलादीनि ॥२३॥

हस्तिबले संयमाद्धस्तिबलोभवति वैनतेयबले संयमाद्वैनतेयबलोभवति वायुबले संयमाद्वायुबल इत्येवमादि ॥ २३ ॥

प्रवृत्त्या लोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ॥२४॥

ज्योतिष्मती प्रवृत्तिरुक्ता मनसस्तस्यायमालोकस्तं

वक्ष्यमाणौपधिकं भावना कारणत्वं समाधेराह भावनातः समाधिर्यः स संयमः यद्यपि धारणाध्यान समाधि त्रयमेव संयमः न समाधिमात्रं तथापि समाध्यनन्तरं कार्यो त्पादात् समाधेः प्राधान्यात् तत्र संयम उपचरितः। क्वचित् भावना समाधिरितिपाठः तत्र भावना समाधौ समूहस्य संयमस्यावयवौ हेतू भवतः वीर्यं प्रयत्नः तेन मैत्र्यादि बलवतः पुंसः सुखितादिषु परेषां कर्त्तव्येषु प्रयत्नोवश्यो भवतीति उपेक्षौदासीन्यं न तत्र भावना नापि सुखादिवद्ग्राह्यं किञ्चिदस्तीति ॥ २२ ॥

ब—णि। यस्य बले संयमस्तस्य बलं लभते इति ॥ २३ ॥

योगी सूक्ष्मे वा व्यवहिते वा विप्रकृष्टे वार्थे चित्तस्य तमर्थं मधिगच्छति ॥ २४ ॥

भुवनज्ञानं सूर्य्ये संयमात् ॥२५॥

ततः प्रस्तारः सप्त लोकास्तत्रावीचेः प्रभृति मेरुपृष्ठं यावदित्येवं भूर्लोको मेरुपृष्ठादारभ्याध्रुवात् ग्रहनक्षत्र तारा विचित्रोन्तरिक्षलोकस्तत्परः स्वर्लोकः पञ्चविधो-माहेन्द्रस्तृतीयलोकश्चतुर्थः प्राजापत्योमहर्लोकस्त्रिविधोब्राह्मः तद् यथा—जनलोकस्तपोलोकः सत्यलोकइति ब्राह्म-स्त्रिभूमिकोलोकः प्राजापत्यस्ततोमहान्। माहेन्द्रश्च स्वरित्युक्तोदिवि तारा भुवि प्रजा इति। संग्रहश्लोकः। तत्रावीचेरुपर्य्युपरि निविष्टाः सन्महानरकभूमयोघनसन्नि-

प्र—नं। सूक्ष्मे व्यवहिते विप्रकृष्टे वार्थे संयमेन चित्तस्य तं मधिगच्छति ॥२४॥

भु—मात्। ध्रुवादितो मेरुपृष्ठात् तदेवमनेन संग्रह श्लोकात्मेन संदेपतः सप्तलोकानुपन्यस्य विस्तरेणाह। तत्रावीचेरिति घनग्रहणेन पृथिव्युच्यते भूमिः स्थानमित्यर्थः एतेमहानरकपरिवारा बोद्धव्याः एतानेव नामान्तरेणोपसंहरति महेति तस्य सूर्यप्रचाराद्राचिन्दिवं लग्नमिव विवर्त्तते यमेवास्तभागं सूर्यस्त्यजति तत्रात्रि यमेव भागमलङ्करोति तत्र दिनमिति।

सकलजम्बुद्वीपपरिमाणमाह। तदेतद् योजनशतसहस्रं सुमेरोर्दक्षिणदिशि तदर्द्धेन पञ्चाशद् योजन सहस्रेण व्यूढं संचिप्तं यतोस्य मध्यस्थः सुमेरुः समुद्राश्च सर्षपराशि कल्पा इति द्विगुणा द्विगुणा इति सत्यस्थः यथा सर्षपराशिर्नवीहिराशि-

लानलानिलाकाशतमःप्रतिष्ठाः महाकालाम्बरीषरौरव महारौरवकालसूत्रान्धतामिस्राः यत्र स्वकर्मोपार्जित-दुःखवेदनाः प्राणिनः कष्टमायुर्दीर्घमाक्षिप्य जायन्ते ततोमहातलरसातलातलसुतलवितलतलातलपातालाख्यानि सप्त पातालानि भूमिरियमष्टमी सप्तद्वीपा वसुमती यस्याः सुमेरुर्मध्ये पर्व्वतराजः काञ्चनः तस्य राजत वैदूर्य-स्फटिकहेममणिमयानि शृङ्गानि तत्र वैदुर्य्यप्रभानुरागा-न्वितोत्पलपत्रश्यामनभसोदक्षिणभागः श्वेतः पूर्व्वः स्वच्छः पश्चिमः कुरण्डकाभउत्तरः। दक्षिणपार्श्वे चास्य जम्बूर्यतोयं जम्बूद्वीपः। तस्य सूर्य्यप्रचाराद्रात्रिन्दिवं लग्नमिव विवर्त्तते॥ तस्य नीलश्वेतं शृङ्गवन्त उदीचानास्त्रयः पर्व्वता द्विसहस्रा यामास्तदन्तरेषु त्रीणि वर्षाणि नव नव योजनसाहस्राणि

रिवीक्षितोनापि भूमिसमस्तथा समुद्राश्चपीत्यर्थः विचिचैः शैलरवतसैरिव सङ्क वर्त्तन्ते इति स विचित्रशैलादतसा द्वीपासदेतत् सर्व्वं सद्वीप विपिन नग नगर-नीरधिमाला वलयं लोकालोक परिवृतं विश्वम्भरा मण्डलं ब्रह्माण्डमध्ये व्यूढं संचित्र सुप्रतिष्ठितं संस्थावं सन्निवेशो यस्य तत्तथोक्तं ये यत्र प्रतिवसन्ति तत्र तान् दर्शयति तत्र पाताल इति। सुमेरोः सन्निवेशमाह। सुमेरुरिति। तदेवं भूर्लोकं सप्तप्रकारमुक्त्वा सप्तप्रकारमेवान्तरिक्ष लोकमाह यद्वेति विचेपी व्यापारः स्वर्लोकमा-दर्शयति माहेन्द्र निवासिन इति। देवनिकाया देवजातयः षण्णामपि देवनिकाया-नां रूपोत्कर्षमाह। सर्व्वे सङ्कल्पसिद्धा इति सङ्कल्पमात्रादेवेषां विषया उपन-सन्ति। इन्द्रारक्षाः पूज्याः कामभोगिनी मैथुन प्रिया: औपपादिक देहाः पित्रोः

रमणकं हिरण्मयमुत्तराः कुरव इति निषेध हेमकुट हिमशैलाद् दक्षिणतो हिसाहस्रयामास्तदन्तरेषु त्रीणि वर्षाणि नव नव योजनसाहस्राणि हरिवर्षं किंपुरुषं भारतमिति। सुमेरोः प्राचीना भद्राश्वमाल्यवत्सीमानः प्रतीचीनाः केतुमालगन्धमादनसीमानौ मध्ये वर्षमिलावृतम्। तदेतद् योजनशतसहस्रं सुमेरोर्दिशि दिशि तदर्द्धेन व्यूढं स खल्वयं शतसहस्रायामो जम्बुद्वीपस्ततो द्विगुणेन लवणोदधिना वलयाकृतिना वेष्टितः। ततश्च द्विगुणाःशाककुशक्रौञ्चशाल्मलगोमेधपुष्करद्वीपाः सप्त समुद्राश्च सर्षपराशिकल्पाः स विचित्रशैलावतंसा इक्षुरससुरासर्पिर्दधिमण्डक्षीरस्वादूदकसप्तसमुद्रवेष्टिता वलयाकृतयोलोकाः पर्व्वतपरिवाराः पञ्चाशद्योजनकोटी परिसङ्ख्याता स्तदेतत्सर्व्वं सुप्रतिष्ठितसंस्थानमण्डमध्ये व्यूढम् अण्डञ्च प्रधानस्याणीरवयवो यथाकाशे खद्योत इति तत्र पाताले जलधौ पर्व्वतेष्वेतेषु देवनिकायासुरगन्धर्व्वकिन्नरकिम्पुरुषयक्षराक्षसभूतप्रेतपिशाचापस्मारकाप्सरो ब्रह्म राक्षसकुष्माण्डविनायकाः प्रतिवसन्ति। सर्व्वेषु द्वीपेषु पुण्या-

संयोग मन्तरेणाकस्मादेव दिव्यं शरीरमेषां धर्म्मविशेषातिसंस्कृतेभ्योऽण्भ्योभूतेभ्यो भवतीति महर्लोकमाह। महतीति महाभूत वशिनः यदयदेतेभ्योरोचते तत्तदेव महाभूतानि प्रयच्छन्ति तदिच्छातश्च महाभूतानि तेन तेन संस्थानेनावतिष्ठन्ते। ध्यानाद्धारा ध्यानमावहन्ताः पुष्टाभवन्ति। जनलोकमाह। प्रथम इत्युक्त क्रमेव

ज्ञानो देवमनुष्याः। सुमेरुस्खिदयानामुद्यानभूमिस्तत्र मिश्रवनं नन्दनं चैत्ररथं सुमानस मित्युद्यानानि। सुधर्म्मा देवसभा। सुदर्शनं पुरं। वैजयन्तःप्रासादः ग्रहनक्षत्रतारकास्तु ध्रुवे निबद्धा वायुविपक्षेपनियमेनोपलक्षितप्रचाराः सुमेरोरुपर्युपरि सन्निविष्टा विपरिवर्त्तन्ते माहेन्द्रनिवासिनः षट् देवनिकायास्त्रिदशा अग्निष्वात्तायाम्यास्तुषिता अपरिनिर्म्मितवशवर्त्तिनः परिनिर्म्मितवशवर्त्तिनश्चेति। सर्व्वे संकल्पसिद्धाः। अणिमाद्यैश्वर्य्योपपन्नाः कल्पायुषो ह्युन्दारकाः कामभोगिनः औपपादिक देहा उत्तमानुकूलाभिरप्सरोभिः कृतपरिवाराः महति लोके प्राजापत्ये पञ्चविधा देवनिकायाः कुमुदा ऋभव प्रतर्द्दना अञ्जनाभाः प्रतिताभाइत्येते महाभूतवशिनो ध्यानाहाराः कल्पसहस्रायुषः प्रथमे ब्रह्मणो जनलोके चतुर्व्विधो देवनिकायो ब्रह्मपुरोहिताः ब्रह्मकायिकाः ब्रह्ममहाकायिका अमरा इति ते भूतेन्द्रियवशिनो द्विगुणोद्विगुणोत्तरायुषो द्वितीये तपसि लोके त्रिविधो देवनिकायः आभास्वरा महाभास्वरा सत्यमहाभास्वरा इति ते भुतेन्द्रियप्रकृति-

भूतेन्द्रिय वशिन इति भूतानि पृथिव्यादीनि इन्द्रियाणि श्रोत्रादीनि यथा नियुक्तमिच्छन्ति तथैव नियुञ्जते। उक्त क्रमापेक्षाद्वितीय ब्रह्मणस्तपोलोकमाह द्वितीय इति भूतेन्द्रिय प्रकृतिवशिन इति प्रकृतिः पञ्चतन्मात्राणि तद्वशिनः तदिच्छातो तन्मात्राण्येव कायाकारेण परिणमन्त इत्यागमिनः। द्विगुणेति भास्वरेभ्यो द्विगुणायुषो

वह्निनः द्विगुणद्विगुणोत्तरायुषः सर्व्वे ध्यानाहाराः ऊर्द्ध-रेतसऊर्द्धमप्रतिहतज्ञानाः। अधरभूमिध्वनाहतज्ञानविषयः तृतीये ब्रह्मणः सत्यलोके चत्वारो देवनिकाया अच्युताः शुद्धनिवासाः सत्याभाः संज्ञासंज्ञिनश्चेति अक्षत-भुवनन्यासाः स्वप्रतिष्ठा उपर्य्युपरिस्थिताः प्रधानवह्निनो यावत् स्वर्गायुषः तत्राच्युताः सवितर्कध्यानसुखाः शुद्ध-निवासाः सविचारध्यानसुखाः सत्याभा आनन्दमात्र ध्यान-सुखाः संज्ञासंज्ञिनश्चास्मितामात्रध्यानसुखास्तेपि त्रैलोक्य-मध्ये प्रतितिष्ठति। तत्र ते सप्त लोकाः सर्व्वे एव ब्रह्मलोकाः विदेहप्रकृतिलयास्तु मोक्षपदे वर्त्तन्ते न लोकमध्ये न्यस्ता इत्येतद् योगिना साक्षात्कर्त्तव्यं सूर्य्यद्वारे संयमं कृत्वा ततोन्यत्रापि एवं तावद्भ्यसेद् यावदिदं सर्वं दृष्टमिति॥२५॥

चन्द्रे ताराव्यूहज्ञानम् ॥२६॥

चन्द्रे संयमं कृत्वा ताराव्यूहं विजानीयात् ॥ २६ ॥

महाभास्वरा तेभ्योपि द्विगुणायुषः सत्यमहाभास्वरा इत्यर्थः। ऊर्द्धमिति ऊर्द्धं सत्य लोके अप्रतिहत ज्ञानाश्चवीचेस्तु प्रभृत्यातपीलोकं सूक्ष्मव्यवहितादि सर्व्वं विजा-नन्तीत्यर्थः। तृतीयं ब्रह्मणः सत्यलोकमाह। तृतीय इति अक्षत भवनस्य न्यासो यैस्तेतथोक्ताः। आधाराभावादेव स्वप्रतिष्ठाः खेषु शरीरेषु प्रतिष्ठा येषां ते तथोक्ताः प्रधान वह्निनस्तदिच्छातः सत्वरजस्तमांसि प्रवर्त्तन्ते यावत् स्वर्गायुषः तथाच श्रूयते "ब्रह्मणा सह ते सर्व्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं

ध्रुवे तद्गतिज्ञानम् ॥२७॥

ततो ध्रुवे संयमं कृत्वा तारायां गतिं जानीयात्। ऊर्ध्वविमानेषु कृतसंयमस्तानि विजानीयात् ॥ २७ ॥

नाभिचक्रे कायव्यूहज्ञानम् ॥२८॥

नाभिचक्रे संयमं कृत्वा कायव्यूहं विजानीयात् वात-पित्तश्लेष्माणस्त्रयो दोषाः सन्ति धातवः सप्त। त्वक्लोहित-मांसस्नायुस्थिमज्जाशुक्राणि पूर्वं पूर्वमेषां वाह्यमित्येष विन्यासः ॥ २८ ॥

यदमिति" तदेवं चतुर्णां देवनिकायानां साधारणधर्मानुक्त्वा नामविशेष ग्रहणेन धर्म-विशेषानाह। तत्रेति अच्युता नाम देवाः स्थूलविषय ध्यानसुखाः तेन ते हृष्यन्ति। शुद्धनिवासा नाम देवाः सूक्ष्मविषयध्यानसुखाः तेन ते हृष्यन्ति। सत्याभा नाम देवा इन्द्रिय विषय ध्यान सुखास्तेन ते हृष्यन्ति। संज्ञासंज्ञिनो नाम देवा अस्मितामात्र ध्यान सुखास्तेन ते हृष्यन्ति तत्र ते सम्प्रज्ञात समाधिमुपासते अथासम्प्रज्ञात समा-धि निष्ठा विदेह प्रकृतिलयाः कस्मान्न लोकमध्ये व्यश्नुत इत्यत आह विदेह प्रकृति लया स्थिति बुद्धिवृत्तिमन्तो हि दर्शिता विषया लोकयात्रां वहन्तो लोकेषु वर्त्तन्ते नचैवं विदेहप्रकृतिलयाः सत्यपि साधिकारत्व इत्यर्थः। तदेतदासत्यलोकमाचा-रिणा योगिना साक्षात्करणीयं सूर्यद्वारेण सुषुम्नायां नाड्यां नचैतावतापि तत् साक्षात्कारीभवतीत्यत आह एवं तावदन्यत्रापि सुषुम्नाया अन्यत्रापि योगोपा-ध्यायोपदिष्टेषु यावदिदं सर्वं जगद्दृष्टमिति। बुद्धि सत्वं हि स्वभावत एव विश्व-

कण्ठकूपे क्षुत्पिपासानिवृत्तिः ॥२९॥

जिह्वाया अधस्तात् तन्तुस्तन्तोरधस्तात्कण्ठस्ततोधस्तात् कूपस्तत्र संयमात् क्षुत्पिपासे न बाधेते ॥ २९ ॥

कूर्म्मनाड्यां स्थैर्य्यम् ॥३०॥

कूपादधउरसि कूर्म्माकारा नाड़ी तस्यां कृतसंयमः स्थिरपदं लभते यथा सर्पोगोधावेति ॥ ३० ॥

मूर्द्धज्योतिषि सिद्धदर्शनम् ॥३१॥

शिरः कपाले अन्तः छिद्रं प्रभास्वरं ज्योतिस्तत्र संयमात्सिद्धानां द्यावापृथिव्योरन्तराचारिणां दर्शनं तम् ॥३१॥

प्रातिभाद्वा सर्व्वम् ॥३२॥

प्रातिभं नाम तारकं तद्विवेकजस्यज्ञानस्य पूर्वरूपं प्रकाशन समर्थं तमोमलावृतं यथैव रजसोद्घाट्यते तदेव प्रकाशयति सूर्य्यवार संयमोद्घाटितं भुवनं प्रकाशयति न चैवमन्यत्रापि प्रसङ्गात् संयमस्य तावन्मात्रोद्घाटन सामर्थ्यादिति सर्व्वमवदातं तत्र तत्र जिज्ञासायां योगिनस्तत्र तत्र संयमः। एवं क्षुत्पिपासा निवृत्तिः स्थैर्य्यहेतुश्च सूत्रपदैरुपदिष्टो भाष्ये च न निबद्ध व्याख्यातेन व्याख्यात इति न व्याख्यातः॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

मू—र्द्धं। मूर्द्धशब्देन सुषुम्नानाड़ी लक्ष्यते तत्र संयम इति ॥ ३१ ॥

प्रा—र्वं। प्रतिभा ऊहजदभवं प्रसङ्गज्ञान हेतु संयमवती हि तत् प्रकर्षं

यथोदये प्रभा भास्करस्य तेन वा सर्व्वमेव जानाति योगी प्रातिभस्य ज्ञानस्योत्पत्ताविति ॥ ३२ ॥

हृदये चित्तसंवित् ॥३३॥

यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म तत्र विज्ञानं तस्मिन् संयमात् चित्तसम्बित् ॥ ३३ ॥

सत्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषोभोगः परार्थत्वात् स्वार्थसंयमात् पुरुषज्ञानम् ॥३४॥

बुद्धिसत्वं प्रख्याशीलं समानसत्वोपनिबन्धने रजस्तमसी वशीकृत्य सत्वपुरुषान्यता प्रत्ययेन परिणतं तस्माच्च

प्रसङ्खानोदय पूर्व्व लिङ्गं यदूहजं ज्ञानं तेन सर्व्वं विजानाति योगीतच्च प्रसंख्यान सन्निधापनेन संसारात्तारयति इति तारकं ॥ ३२ ॥

हृ—वित्। हृदयपदं व्याचष्टे । यदिदमस्मिन् ब्रह्मपुरे दहरादाप्ता ब्रह्मलब्धपुरं निलयः तद्धि तत्र विजानाति खमिति। दहरं गर्त्तं तदेव पुण्डरीकं अधोमुखं वेश्म मनसः चित्त संवेदनत्वे हेतुमाह । तत्र विज्ञानं तत्र संयमाच्चित्तं विजानाति स्ववृत्तिविशिष्टं ॥ ३३ ॥

स—नं। सत्वप्रकाशरूपस्यापि स्वच्छस्य नितान्ताभिभूत रजस्तमस्तया विवेकख्या-

सत्वात् परिणामिनोत्यन्तविधर्म्मात् शुद्धोन्यश्चितिमात्ररूपः पुरुषस्तयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः पुरुषस्य दर्शितविषयत्वात् स भोगप्रत्ययः सत्वस्य परार्थत्वादृश्यः । यस्तु तस्माद्विशिष्टश्चितिमात्ररूपोन्यः पौरुषेयप्रत्ययस्तत्र संयमात् पुरुषविषया प्रज्ञा जायते । न च पुरुषप्रत्ययेन बुद्धिसत्वात्मना पुरुषोदृश्यते पुरुषएव प्रत्ययं स्वात्मावलम्बनं पश्यति । तथाह्युक्तं विज्ञातारमरेकेन विजानीयादिति ॥ ३४ ॥

तिरूपेण परिणतस्यबुद्धिसत्वस्यात्यन्तिकयैतत्यादसङ्करस्तत्रकैवकथा रजस्तमसी जड़-स्वभावयो रित्याशयवान् सूत्रकारः सत्वपुरुषयो रित्युवाच इममेवाभिप्रायं गृहीत्वा भाष्यकारोप्याह बुद्धि सत्वं 'प्रख्याशीलमिति न प्रख्याशीलमात्रं मपि तु विवे-कख्यातिरूपेण परिणतमतोनितान्त शुद्ध प्रकाशतयात्यन्त सारूप्यं चैतन्येनेति सङ्कर इत्यतआह । समानेतिसत्वे नोपनिबन्धनमविनाभावःसत्वस्यरुमानं सत्वोप निबन्धनं ययो रजस्तमसी ते तथोक्ते वशीकारोभिभवः । असङ्करमाह तस्मादिति चकारोऽ-प्यत्र न केवलं रजस्तमोभ्यामित्यर्थःपरिणामिन् इति वैधर्म्म्या परिणामिनःपुरुषादुक्तं प्रत्ययाविशेषः शान्तघोर मूढरूपाया बुद्धे र्यैतन्य विम्बोदग्राहिण चैतन्यस्य शान्ता-द्याकाराध्यारोप चन्द्रमसइव स्वच्छ सलिल प्रतिविम्बितस्य तत्कल्पनात् कल्पना-रोपः भोगहेतुमाह दर्शित विषयत्वादिति असङ्कद्व्याख्यातं । ननु बुद्धि सत्वमस्तु पुरुषभिन्नं भोगस्तु पुंसः कुतोभियते इत्यतआह । सभोग प्रत्ययो भोगरूपप्रत्ययः सत्वस्यातः परार्थत्वाद् दृश्योभोग्यः सत्वं हि परार्थं संहतत्वाद्धर्म्मश्चभोगः इति सोपि परार्थः । यस्यै च परस्या असौ तस्य भोक्तृभोग्यः अथवानुकूल प्रतिकूल वेदनीयस्तु सुखदुःखानुभवो भोगः नचाय मात्मान मेवानुकूलयति प्रतिकूलयति

ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते ॥३५॥

प्रातिभात् सूक्ष्मव्यवहितविप्रकृष्टातीतानागतज्ञानंश्रावणादिव्यशब्दश्रवणम् वेदनादिव्यस्पर्शाधिगमः आदर्शादिव्यरूपसम्बित् आस्वादादिव्यरससंसम्बित् वार्त्तातो दिव्यगन्धविज्ञानमित्येतानि नित्यं जायन्ते ॥ ३५ ॥

वा स्वात्मनिष्ठत्ति विरोधादतीवानुकूलनीयः प्रतिकूलनीयार्थोभोगः। सभोक्ता आत्मातस्य दृश्योभोग्य इति। यस्तु तस्मात् परार्थादिभिन्न इति परार्थादिति। पञ्चम्यन्तपदाध्याहारेण व्याख्याता स्यादेतत्पुरुष विषयाचेत्प्रज्ञा हन्त भोः पुरुषः प्रज्ञायाः प्रज्ञेय इति प्रज्ञान्तरमेव तच्च तच्चेति अनवस्थापातइत्यत आह। न च पुरुषप्रत्ययेनेति। अयमभिसन्धिः चिन्मात्रजड़:प्रकाश्यते न जडेन चितिः पुरुषप्रत्ययस्वचिदात्मा कथं चिदात्मानं प्रकाशयेत् चिदात्मात्मपराधीनप्रकाशोजड़ः प्रकाशयतीति युक्तम्। बुद्धि स्वात्मनेति अचिद्रूप तादात्म्येन जड़त्वमाह। बुद्धि सत्वगत पुरुष प्रतिबिम्बालम्बनात् पुरुषालम्बनं दर्पणवन्मुखालम्बनं न तु पुरुष प्रकाश्यनात् पुरुषालम्बनं बुद्धि सत्वमेव तु तेन प्रत्ययेन संक्रान्त पुरुष प्रतिबिम्बं पुरुष च्छायापन्नं चेतनमालम्बत इति पुरुषार्थः। अर्थवं श्रुति मुदाहरति तथा च्युक्तमीश्वरेण विज्ञातारमिति। न केनचिदित्यर्थं ॥ ३४ ॥

स च स्वार्थं संयमी न यावत् प्रधानं स्वकार्यं पुरुषज्ञानमभिनिवर्त्तयति तावत्तस्य पुरस्ताद् या विभूतीराधत्ते ता: सर्व्वा दर्शयति। त—ले। तदनेन

ते समाधावुपसर्गा व्युत्थाने सिद्धयः ॥३६॥

ते प्रातिभाद्यः समाहितचित्तस्योत्पद्यमाना उपसर्गाः तद्दर्शनप्रत्यनीकत्वात् व्यूत्थितचित्तस्योत्पद्यमानाः सिद्धयः ॥ ३६ ॥

बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ॥ ३७॥

लोलीभूतस्य मनसोप्रतिष्ठस्य शरीरे कर्माशयवशाद्बन्धः प्रतिष्ठेत्यर्थः तस्य कर्मणोबन्धकारणस्य शैथिल्यं-

योगज धर्मानुग्रहीतानां मनः श्रोत्र त्वक चक्षु जिह्वा घ्राणानां यथा संख्यं प्रातिभ श्रावणदिव्य श्रद्वाद्यपरोक्ष हेतु भाव उक्तः श्रोत्रादीनां पञ्चानां दिव्य शब्दाद्युपलब्धकानां तान्त्रिक संज्ञाः श्रावणाद्याः सुगमं भाष्यम् ॥ ३५ ॥

कदाचिदात्मविषय संयमे प्रवृत्त स्वप्रभावादसूर्यान्तर सिद्धीरधिगम्य कृतार्थं मन्यः संयमादिरमेदतश्चाह । ते – यः । व्युत्थितचित्तोदिताः सिद्धीरभिमन्यते । जन्मदुर्गत दुःखदुरित कणिकामपि द्रविण सम्भारं योगिनातु समाहित चित्तेनोपनताभ्योपिताभ्यो विरलभ्यं अभिसंहित ताप त्रयाद्यन्तिकोपशमरूप परम पुरुषार्थः स चैवंयं कथं तत्प्रत्यनीका सुसिद्धिषु रज्येतेति सूत्र भाष्ययोरर्थः ॥ ३६ ॥

तदेवं ज्ञानरूपमैश्वर्यं पुरुष दर्शनान्तं संयमफलमुक्त्वा क्रियारूपमैश्वर्यं संयम फलमाह । बं—यः । समाधि बलादिति । बन्धकारण संयमबलात् प्राधान्यात्

समाधिबलाच्चेति प्रचारसंवेदनञ्च चित्तस्य समाधिजमेव कर्मबन्धक्षयात् स्वचित्तस्य प्रचारसंवेदनाच्च योगी चित्तं स्वशरीरान्निष्कृष्य शरीरान्तरेषु निक्षिपति निक्षिप्तं चित्तञ्चेन्द्रियाण्यनुपतन्ति यथा मधुकरराजानं मक्षिका उत्पतन्तमनुत्पतन्ति निविशमानमनुनिविशन्ते तथेन्द्रियाणि परशरीरावेशे चित्तमनुविधीयन्त इति ॥ ३७ ॥

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च ॥ ३८ ॥

समस्तेन्द्रियवृत्तिः प्राणादिलक्षणा जीवनं तस्य क्रिया पञ्चतयी । प्राणोमुखनासिकागतिराहृदयवृत्तिः । समं नय-

समाधियहणं प्रचरत्यनेनाभिनिति प्रचारः चित्तस्य समागमाधानी नाड्याः तस्मिन् प्रचारेसंयमात्तद्वेदनं तस्माच्च बन्धकारणशैथिल्यात् न तेन प्रतिबध्यते अप्रतिबद्धमपूर्वमार्गेण गच्छन्न स्वशरीरादप्रत्यूहं निष्क्रामति न च परशरीरं सा विशति तस्मात्तत्प्रचारोपि ज्ञातव्यः इन्द्रियाणि च चित्तानुसारीणि परशरीरे यथाधिष्ठानं निविशन्ते इति ॥ ३७ ॥

उ—च । समस्तेन्द्रियवृत्तिर्जीवनं प्राणादिलक्षणा प्राणादयो लक्षणं यस्याः सातथोक्ता त्रयोन्द्रियाणां वृत्तिर्वाह्याभ्यन्तरौच वाह्यास्तु पादादीचनलक्षणा आभ्यन्तरी तु जीवनं सहितयत्नभेदः शरीरोपग्रहीत मारुतक्रियाभेदहेतुः सर्वकरण-

,नात् समानयानाभिवृत्तिः। अपनयनादपानआपादतल-वृत्तिः। उन्नयनादुदानआशिरोवृत्तिः। व्यापी व्यानवृत्ति एषां प्रधानः प्राणः। उदानजयाज्जलपङ्ककण्टकादिष्व-सङ्गः उत्क्रान्तिश्च प्रायणकाले भवति तां वशित्वेन प्रति-पद्यते ॥ ३८ ॥

समानजयाज्ज्वलनम् ॥३९॥

जितसमानस्तेजसस्तदुपधानं कृत्वा ज्वलति। ३९।

साधारणःयमाद्दः सामान्यकरणावृत्तिः प्राणाद्यावायवः पञ्चेति तेरस्य लघवीयत्वात्। तस्य प्रयत्नस्य क्रियाकार्यं पञ्चतयी प्राण आनासिकायादाचहृदयादवस्थितः॥ अशितपीताहारपरिणतिभेदं रसं सप्तधातुस्थाने समंनतरूपं नयन्समानः आहृद-यादाच नाभेरवस्थानं। मूत्रपूरीषगर्भादीनामपनयनहेतुरपानः आनाभेराच-पादतलादवस्थितिः। उन्नयना दुर्ध्वनयना द्रसादीनामुदानः आनासिकायात् आ च शिरसो वृत्तिरस्य। व्यापी व्यानः एषामुक्तानां प्रधानं प्राणस्तदुत्क्रमे सर्वोत्-क्रमश्रुतेः प्राणमुत्क्रामन्तमनुसर्वे प्राणा उत्क्रामन्तीति तदेवं प्राणादीनां क्रिया-स्थानभेदेन भेदं प्रतिपाद्य सूत्रार्थमवतारयति उदानजयादिति। उदाने कृतसंय-मस्तज्जयाज्जलादिभिर्नप्रतिहन्यते उत्क्रान्तिश्चार्चिरादिमार्गेण भवति प्रायणकाले तस्मात्तामुत्क्रान्तिं वशित्वेन प्रतिपाद्यते प्राणादिसंयमात्तद्विजये भूतजयएताः क्रियास्थानविजयादिभेदात् प्रतिपत्तव्याः ॥ ३८ ॥

स—नं। तेजसः शारीरस्थोपधानं उत्तेजनं स्वार्थसंयमादन्वाचयशिष्टं श्रवणाद् युक्तं संप्रति श्रवणाद्यर्थादेव संयमाच्छ्रावणादि भवतीत्याह ॥ ३९ ॥

श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम् ४०॥

सर्व्वश्रोत्राणामाकाशं प्रतिष्ठासर्व्वशब्दानाञ्च। यथोक्तम् तुल्यदेशश्रवणानामेकदेशश्रुतित्वं सर्व्वेषां भवतीति। तच्चैतदाकाशस्य लिङ्गं अनावरणञ्चोक्तम्। तथाह मूर्त्तस्यानावरणदर्शनाद्विभूत्वमपि प्रख्यातमाकाशस्य शब्दग्रहणनिमित्तं श्रोत्रं बधिराबधिरयोरेकः शब्दं गृह्णात्यपरो न गृह्णातीति तस्मात् श्रोत्रमेव शब्दविषयं श्रोत्राकाशयोः सम्बन्धे कृतसंयमस्य योगिनोदिव्यं श्रोत्रं प्रवर्त्तते ॥ ४० ॥

श्रो—चं। संयमविषयं श्रोत्राकाशयोः सम्बन्धमाधाराधेयभावमाह। सर्व्व श्रोत्रानामाहंकारिकाणामप्याकाशं कर्णशष्कुली विवर प्रतिष्ठा तदायतनं श्रोत्रं तदुपकारापकारार्थां श्रोत्रस्योपकारापकार दर्शनात् शब्दानाञ्च श्रोत्रसहकारिणा पार्थिवादि शब्दग्रहणे कर्त्तव्ये कर्णशष्कुलीसुषिरवर्त्ति श्रोत्रं खाश्रयण भोग्यता साधारण शब्दमपेक्षते। गन्धादि गुण सहकारिभि र्घ्राणादिभिर्वाह्यं पृथिव्यादिवर्त्ति गन्धाद्या लोचनं कार्य्यं दृष्टं। आहङ्कारिकमपि घ्राण रसन त्वक् चक्षुः श्रोत्रं भूताधिष्ठानमेव भूतोपकारापकारार्थां घ्राणादीनामुपकारापकार दर्शनादित्युक्तं तच्चेदं श्रोत्रमाहङ्कारिकमयःप्रतिममयस्कान्तमणि कल्पेन वक्तृ वक्तृ समुत्पन्नेन वक्तृस्थेन शब्देनाकृष्टं स्वशक्ति परम्परया वक्तृ वक्तृगत शब्दमालोचयति तथाच दिग्देशवर्त्ति शब्दप्रतीतिः प्राणभृन्मात्रस्य नासति बाधकेऽप्रमाणीकृता भविष्यतीति। तथाच पञ्चशिखस्य वाक्यं। तुल्यदेश श्रवणानामेकदेश श्रुतित्वं सर्व्वेषां भवतीति। तुल्य देशानि श्रवणानि श्रोत्राणि

कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् ॥४१॥

यत्र कायस्तत्राकाशं तस्यावकाशदानात् कायस्य तेन येषां चैत्रादीनां ते तथोक्ताः सर्वेषां श्रवणान्याकाशं वर्त्तिनीत्यर्थः। तच्च श्रोत्राधिष्ठानमाकाशं शब्दगुणतन्मात्रादुत्पन्नं शब्दगुणकंयेन शब्देन सहकारिणां पार्थिवादीन् शब्दान् गच्छति तस्मात्सर्वेषामेकजातीया श्रुतिः शब्द इत्यर्थः तदनेन श्रोत्राधिष्ठानत्वमाकाशस्य शब्दगुणत्वञ्च दर्शितमिति तच्चैकदेशं श्रुतित्वमाकाशस्य लिङ्गं साप्येकजातीया शब्दव्यक्तिकाश्रुतिर्यैर्दाश्रया तदेवाकाशं शब्दवाच्यं नहीदृशी श्रुतिमन्तरेण शब्दव्यक्तिः न चेदृशी श्रुतिः पृथिव्यादिगुणस्य स्वात्मनि व्यङ्ग्यव्यञ्जकत्वानुपपत्तेरिति अनावरणञ्चाकाशलिङ्गं। यद्याकाशन्ना भविष्यत् अन्योन्य सम्पीड़ितानि मूर्त्तानि न सूचिभिरप्यभेत्स्यन्त ततश्च सर्व्वैरेव सर्व्वमावृतं स्यात् न च मूर्त्तद्रव्याभावमात्रादेवानावारणस्याभावस्य भावाश्रितत्वेन तदभावेऽभावात् न च चितिशक्तिस्तदाश्रया भवितु मर्हति अपरिणामितया अवच्छेदकत्वाभावात् न च दिक्कालादयः पृथिव्यादि द्रव्य व्यतिरिक्ताः सन्ति तस्मात्तादृशः परिणति भेदो नभस एवेति सर्व्वमवदातं अनावरणे चाकाश लिङ्गे सिद्धे यत्र यत्रानावरणं तत्र तत्र सर्व्वगताकाशमिति सर्व्वगतत्वमप्यस्य सिद्धमित्याह। तथाऽमूर्त्तेरिति श्रोत्रसद्भावे प्रमाणमाह। शब्दग्रहणेति क्रियाहि करणसाध्या दृष्टा। यथा छिदादि र्वास्यादि साध्या तद्वद्दि शब्दग्रहण क्रिययापि करणसाध्यया भवितव्यं यच्च करणं तच्च श्रोत्रमिति। अथास्याश्चक्षुरादयः एव कस्मात् कारणं न भवन्तीत्यत आह। बधिराबधिरयोरिति अन्वयव्यतिरेकाभ्य मवधारणं। उपबृंहणञ्चैतत् लब्ध्वा तयोश्चक्षुस्तेजसोः रसनोदकयोर्नासिकापृथिव्योः सम्बन्ध संयमाद्दिव्यत्वगाद्याप्यूहनीयं ॥ ४० ॥

सम्बन्धप्राप्तिस्तत्र कृतसंयमोजित्वा तत् सम्बन्धं लघुषु तूलादिष्वापरमाणुभ्यः समापत्तिं लब्ध्वा जितसम्बन्धो लघु भवति लघुत्वाच्च जले पादाभ्यां विहरति ततस्तूर्णनाभि तन्तुमात्रे विहृत्य रश्मिषु विहरति ततो यथेष्टमाकाशगतिरस्य भवतीति ॥ ४१ ॥

बहिरकल्पिता वृत्तिर्म्महाविदेहा ततः प्रकाशावरणक्षयः ॥ ४२ ॥

शरीराद्बहिर्मनसोवृत्तिलाभोविदेहा नाम धारणा सा यदि शरीरप्रतिष्ठस्य मनसोबहिर्वृत्तिमात्रेण भवति सा कल्पितेत्युच्यते या तु शरीरनिरपेक्षा बहिर्भूतस्यैव मनसो

का—नं । कायाकाश सम्बन्ध संयमाद्वा लघुषि वातूलादौ कृत संयमात्समापत्तिं चेतसस्तत्प्रवतदञ्जनतां लब्धेति । सिद्धक्रममाह । जल इति ॥ ४१ ॥ अपरमपि परशरीरावेश हेतु संयमं क्लेशकर्मविपाक क्षयहेतुमाह । ब—यः। विदेहामाह शरीरादिति । अकल्पिताया महाविदेहाया य उपायस्तत्प्रदर्शनाय कल्पितां विदेहामाह सा यदीति । वृत्तिमात्रं कल्पनाज्ञानमात्रं तेन । महाविदेहामाह यात्रिति । उपाय उपेयते कल्पिताकल्पितयोराह । तत्रेति किं परशरीरावेश माचक्षिती त्याह । ततश्चेति । ततो धारणातो महाविदेहाय मनः प्रवृत्ते सिद्धेः क्लेशस्य कर्मणश्च ताभ्यां विपाकक्षयं जात्यायुर्भोगाः तदेतद्रजस्तमोमूलं विगलित रजस्तमसः सत्वमात्रात् विवेक ख्यातिमात्रसमुत्पादात्तदेतद्विपाकक्षयं रजस्तमोमूलतया तदात्मकं सद्वृत्ति सत्वमात्रणेति तत्क्षयाच्च निरावरणं योगिचित्तं यथेच्छं विहरति जानाति । ४२ ॥

बहिर्वृत्तिः सा खल्वकल्पिता। तत्र कल्पितया साध्वयत्वकल्पितां महाविदेहामिति यया परशरीराण्याविशन्ति योगिनः ततश्च धारणातः प्रकाशावरणं क्लेशकर्मविपाकक्षयं रजस्तमोमूलं तस्य च क्षयोभवति ॥ ४२ ॥

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्वसंयमाद्भूतजयः ॥४३॥

तत्र पार्थिवाद्याः शब्दादयोविशेषाः सहकारादिभिर्धर्मैः स्थूलशब्देन परिभाषिता एतद् भूतानां प्रथमं रूपं द्वितीयं रूपं स्वसामान्यं मूर्त्तिभूमिः स्नेहोजलं वह्नि-

भू—यः। स्थूलश्च स्वरूपञ्च सूक्ष्मश्चान्वयश्चार्थवत्त्वञ्चेति स्थूलस्वरूप सूक्ष्मान्वयार्थवत्त्वानि तेषु संयमात्तज्जयः। स्थूलमाह तत्रेति पार्थिवाः पार्थसीयास्तैजसा वायवीया आकाशीयाः शब्दस्पर्शरूप रसगन्धा यथासम्भवं विशेषाः षड्जगान्धारादयः श्वेतीत्यादयो नीलपीतादयः कषाय मधुरादयः एतेहि नामरूप प्रयोजनैः परस्परतोभिद्यन्तइति विशेषाः एतेषां पञ्च पृथिव्यां गन्धवत्त्वञ्चतुरीषु गन्धरसवर्जं त्रयस्तैजसि गन्धरसरूपवर्जं द्वौ नभस्यति शब्दएवाकाशे तत्र त एतादृशा विशेषाः सहकारादिभिर्धर्मैः स्थूलशब्देन परिभाषिताः शास्त्रे तत्रापि पार्थिवास्तावद्धर्माः। "आकारो गौरवं रौक्षं वरत्वं स्थैर्यमेवच। इत्तिभेदः क्षमा कार्ष्यं काठिन्यं सर्व्वभौम्यता॥" अपां धर्माः—"स्नेहः शैत्यं प्रभाशौक्ल्यं गौरवञ्च यत्। श्लैत्यं रक्षा पवित्रत्वं सन्धानं क्लेदका गुणाः"। तैजसाधर्माः—"ऊर्द्धभाक् पाचकं दग्धपावकं लघुभास्वरं। प्रभं सौम्यमि वै तेजः मूर्व्वाभ्यां भिन्न लक्षणं"। वायवीयाधर्माः—तिर्य्यग्यानं पवित्रत्वमाक्षेपी नीदनं बलं। सूक्ष्मच्छायता रौक्षं वायौ धर्माः पृथग्विधाः"॥ आकाशीया धर्माः—"सर्व्वतो गति

रूपता वायुः प्रणामी सर्व्वतोगतिराकाशइत्येतत् स्वरूप-शब्देनोच्यते अस्य सामान्यस्य शब्दाद्योविशेषाः तथाचोक्तं एकजातिसमन्वितानामेषां धर्म्ममात्रव्याहृत्तिरिति सामान्य विशेषसमुदयोत्र द्रष्टव्यम्। द्वितोहि समूहः प्रत्यस्तमितभेदावयवानुगतःशरीरं वृक्षोयूथं वनमिति शब्दोनोपात्तभेदावयवानुगतः समूह उभये देवमनुष्याः समूहस्य देवा एकोभागो मनुष्या द्वितीयोभागस्ताभ्यामेवाभिधीयते समूहः। स च भेदाभेदविवक्षित आम्नाणां वत्सं ब्राह्मणानां सङ्घइति।

रव्यूही विष्टम्भ इति च त्रयः। आकाशधर्म्मो व्याख्याता पूर्व्वधर्म्मे विलक्षणा" इति। तत्र त आकार प्रभृतयो धर्म्माः के सहेति आकारस्य सामान्य विशेषौ गोत्वादि द्वितीयरूप माह। द्वितीयं रूपं स्वसामान्यं मूर्त्तौ सांसिद्धिकं काठिन्यं कठिनत्वं मृज्जापुष्टिबलाधानहेतुः वह्नि रुष्णता औदर्य्यं सौर्य्यं भौमे च सर्व्वत्रैव तेजसि समवेतीष्यतेति सर्व्वत्रैव तद्धर्म्मधर्म्मिक्षीरभेद विवक्षयाभिधानं। वायुः प्रणामी वहनशीलः तदाह "चलनेन त्वगादीनां शरीरस्याटनेन च। सर्व्वत्रं वायुसामान्यं नामित्व मनुमीयते" सर्व्वतोगतिराकाशः सर्व्वत्र शब्दोपलब्धि दर्शनात् श्रोत्राश्रयाकाश गुणेन हि शब्देन पार्थिवादि शब्दोपलब्धिरित्युपपादित मधस्तात् एतत् स्वरूपशब्देनोक्तं। अस्यैव मूर्त्यादि सामान्यस्य शब्दाद्यः षड्जादयः उष्णत्वादयः शुक्लत्वादयः कषायत्वादयः सुरभित्वादयो मूर्त्यादीनां सामान्यानां भेदाः सामान्यान्यपि मूर्त्यादीनि जम्बीर पनसामलकफलादीनि रसादि भेदात् परस्परं व्यावर्त्तन्ते तैनैतेषां एते रसादयो विशेषाः तथा चोक्तं एकजाति समन्वितानां प्रत्येकं पृथिव्यादीना मेकैकया जात्या मूर्त्ति र्वृक्षादीना समन्वितानां मेषां षड्जादि धर्म्ममात्र व्याहृत्ति रिति। तदेव

स पुनर्द्विविधोयुतसिद्धावयवोऽयुतसिद्धावयवश्च युतसिद्धावयवः समूहोवनं सङ्घइति। अयुतसिद्धावयवः सङ्घातः शरीरं वृक्षः परमाणुरिति। अयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिति पतञ्जलिः एतत्स्वरूपमित्यर्थः। अथ किमेषां सूक्ष्मरूपं तन्मात्रं भूतकारणं तस्यैकोवयवः परमाणु सामान्यविशेषात्मा अयुतसिद्धावयवभेदानुगतः समुदाय

सामान्यं मूर्त्यायुक्तं विशेषणाश्च शब्दादय उक्ताः येचाहु "सामान्यविशेषाश्रयी द्रव्यमिति तान् प्रत्याह सामान्यविशेष समुदायोवदर्थेन द्रव्यं येपि तदाश्रयो द्रव्यमाश्रियत तैरपि तत्समुदायो न भूयमानो नापक्षीतव्यः नचतदपक्षवे तयोराधारो द्रव्यमिति भवति तस्मात्तदेवासु द्रव्यं न तु ताभ्यां तत्समुदायाच्च तदाधारमपरद्रव्य मुपलभामहे यावयो यावसमुदायादि वच्च तदाधारमपरं पृथग्विधं शिखरं समूहो द्रव्यमित्युक्तं। तच्च समूह मात्रं द्रव्यमिति सामान्यमुक्तत्वे समूहे विशेषोद्रव्यमिति निर्द्धारयितुं समूहप्रकारानाह। द्विष्ठोहीति यस्मादेवं तस्मान्न समूहमात्रं द्रव्यमित्यर्थः। द्वाभ्यां प्रकाराभ्यां तिष्ठतीति द्विष्ठः। एकं प्रकारमाह। प्रत्यक्षमितेति प्रत्यक्षमिती भेदो येषामवयवानां ते तथोक्ता प्रतिक्षमित भेदा अवयवा यस्य स तथोक्तः एतदुक्तं भवति — शरीर वृक्षयूथ वनशब्देभ्यः समूह प्रतीयमानो प्रतीतावयव भेद स्वदवाचक शब्दाप्रयोगात् समूह एकीवगम्यते इतियुतायुत सिद्धावयवत्वे न चेतनाचेतनत्वे नचोदाहरणचतुष्टयं। युतायुतसिद्धावयवत्वञ्चाग्रे वक्ष्यते। द्वितीयं प्रकारमाह। शब्दैनोपात्त भेदावयवानुगतः समूहः उभये देव मनुष्याइति देव मनुष्याइति हि शब्दैनोभय शब्दवाच्यस्य समूहस्य भागौभिन्नावुपात्तौ। मनुभय शब्दाभावदवयवभेदो न प्रतीयते तत्कथमुपात्त भेदावयवानुगत इत्यतआह। ताभ्यां

इत्येवं सर्वतन्मात्रादि एतत् तृतीयं। अथ भूतानां चतुर्थं रूपं ख्यातिक्रियास्थितिशीलागुणाः कार्यस्वभावानुपातिनोन्वयशब्देनोक्ताः। अथैषां पञ्चमरूपमर्थवत्वं भोगापवर्गार्थता गुणेष्वन्वयिनो गुणास्तन्मात्रभूतभौतिकेष्विति सर्वमर्थवत् तेष्विदानीं भूतेषु पञ्चसु पञ्चरूपेषु संयमात्तस्य तस्य रूपस्य स्वरूपदर्शनं जयश्च प्रादुर्भवति तत्र

भागाभ्यामिव समूहीभिधीयते उभयशब्देन भागद्वयवाचि शब्दसङ्केतेन समूहीवाच्यः वाक्यस्य वाक्यार्थः वाचकत्वादिति भावः। पुनर्द्वैविध्यमाह सचेति। भेदेन चा भेदेन च विवक्षितः। भेद विवक्षित माह। आत्मानां वनं ब्राह्मणानां समूहः इति। भेदएव षष्ठीयुतेः यथा गर्गाणां गौरिति। अभेद विवक्षितमाह। आत्मवनं ब्राह्मणसङ्घः। आत्मायते वनयतेति समूह समूहिनोरभेदं विवक्षित्वा सामान्याधिकरण्यमित्यर्थ विधान्तरमाह। स पुन र्द्विविधः युतसिद्धावयवः समूह युतसिद्धाः पृथक्सिद्धाः सान्तराला अवयवा यस्य स तथोक्तः यूथं वनमिति सान्तरालाहितदवयवा इत्यत्र तावत्यायुतसिद्धावयवत्व समूही इत्युक्तौ परमाणुरिति निरन्तराहितदवयवाः सामान्य विशेषो वा साक्षादयोक्तेति। तदेतेषु समूहिषु द्रव्यभूतं समूहं निर्धारयति अयुतसिद्धेति तदेवं प्रासङ्गिकं द्रव्यं व्युत्पाद्य प्रकृत मुपसंहरति। एतत्स्वरूप मित्युक्तमिति तृतीयं रूपं विवक्षुः पृच्छति—अथेति। उत्तरमाह।

तन्मात्रमिति। तस्यैकावयवः परिणामभेदः परमाणु सामान्यं मूर्त्तिः शब्दादयोविशेषाः तदात्मा अयुत सिद्धा निरन्तरावयवाः सामान्यविशेषाः स्वभेदैष्वनुगतः समुदायः यथा च परमाणुः सूक्ष्मं रूपं एवं सर्वतन्मात्रादि सूक्ष्मरूपमिति उपसंहरः

पञ्चभूतस्वरूपाणि जित्वा भूतजयो भवति तज्जयाद्देहानुसारिण इव गावोऽस्य सङ्कल्पानुविधायिन्योभूतप्रकृतयो भवन्ति ॥ ४३ ॥

ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च ॥ ४४ ॥

तत्राऽणिमा भवत्यणुः। लघिमा लघुर्भवति। महिमा महान् भवति। प्राप्तिरङ्गुल्यग्रेणापि स्पृशति चन्द्रमसं। प्राकाम्यमिच्छानभिघातः भूमावुन्मज्जति मज्जति यथोदके।

रति एतदिति। अथभूतानां चतुर्थं रूपं ख्यानिक्रिया स्थितिशीलागुणाः कार्यस्वभाव मनुपतितुमनुमन्तुं शीलं येषां ते तथोक्ताः अतएवान्वय अष्टिनोक्ताः अथैषां पञ्चमं रूपमर्थवत्वं विवृणोति। भोगेति। नन्वेवमपि सत्वगुणा अर्थवत्तरत् कार्यांशां तु कृतीर्थवत्वमित्यत आह। गुणा इति। भौतिका गोघटादयः तदेवं संयमं विषय सृक्ता संयमं तत् फलत्वाह। तेजिति। भूतप्रकृतयोभूतस्वभावाः॥ ४३ ॥

सङ्कल्पानुविधाने भूतानां किं योगिनः सिद्धतीत्यत आह—

त—च। स्थूलसंयम जयात्ततः सिद्धयो भवन्तीत्याह। तत्राणिमा महानपि भवत्यणुः। लघिमा महानपि लघुर्भूत्वा तूलवत्तूल इवाकाशे विहरति महिमा-स्यापि नाग नभ गगन परिमाथी भवति। प्राप्तिः सर्वेभावाः सन्निहिती भवन्ति योगिन स्तदयथा भूमिष्ठ एवाङ्गुल्यग्रेण स्पृशति चन्द्रमसं स्वरूप संयम विजयात् सिद्धिमाह। प्राकाम्यमिच्छानभिघातो नाम्नरूपभूत स्वरूपे सुर्ष्यादिभिरभिहन्यते

वशित्वं भूतभौतिकेषु वशीभवत्यवश्यस्यान्येषां ईशिष्टत्वं तेषां प्रभवाप्ययव्यूहानामीष्टे यत् कामावसायित्वं सत्य सङ्कल्पता यथासङ्कल्पस्तथाभूतप्रकृतीनामवस्थानम्। न च शक्तोपि पदार्थविपर्य्यासं करोति, कस्मात् अन्यस्य यत् काम वसायिनः पूर्वसिद्धस्य तथाभूतेषु सङ्कल्पादिति एतान्यष्टा-वैश्वर्य्याणि कायसम्पद्यमाना तद्धर्म्मानभिघातश्च पृथ्वीमू-र्त्तिगानानरुणद्धि योगिनः शरीरादिक्रियाशिलामप्यनुविश तीति नापः स्निग्धाः क्लेदयन्ति नाग्निरुष्णोदहति न

भूमावुन्मज्जति मज्जति च यथोदके। सूक्ष्मविषय संयमजयात् सिद्धिमाह वशित्वं भूतानि पृथिव्यादीनिभौतिकानि गोघटादीनि तेषुवशी खतन्त्रीभवति। तेषां त्व-वश्यः तत्कारणतन्त्राच्च पृथिव्यादि परमाणु वशीकारात्तत् कार्य्यवशीकारस्तेन यानि यथावस्थापयति तानि तथावतिष्ठन्ते इत्यर्थः। अन्वयविषय संयमजयात् सिद्धिमाह ईशित्वं तेषां भूतभौतिकानां विजित मूलप्रकृतिः सन्यः प्रभव उत्पादो यश्चापायो विनाशो यश्चव्यूहो यथावदवस्थापनं तेषामिष्टे अर्थवत्वसंयमात् सिद्धिमाह। यत्र कामावसायित्वं सत्यसङ्कल्पता विजितगुणार्थवत्वो हि योगी यद्यदर्थंतथा सङ्कल्प-यति तत्तथैव प्रयोजनायकल्पते। विषमप्यमृतकार्य्यं सङ्कल्प्य भोजयन् जीवयतीति। स्यादेतद् यथा शक्तिविपर्य्यासङ्करोत्येवं पदार्थविपर्य्यासमपि कस्मान्नकरोति तथा चन्द्रमसमादित्यं कुर्य्यात् कुड्यसिनीवालीमित्यत आह न च शक्तोपीति। न खल्वेते यत्रकामावसायिनश्च भवतः परमेश्वरस्याज्ञानमतिक्रमितु मुत्सहन्ते। यस्तु पदार्थानां जातिदेशकालावस्था भेदेना नियत स्वभावा इति युज्यतेतासु तदिच्छानुविधानमिति। एतान्यष्टावैश्वर्य्याणि तद्धर्म्मानभिघात इति। अणिमादि

वायुः प्रणामी वहत्यनावरणात्मकेप्याकाशे भवत्याहतकायः सिद्धानामप्यदृश्योभवति ॥ ४४ ॥

रूपलावण्य नलवज्रसंहननत्वानि कायसम्पत् ॥ ४५ ॥

दर्शनीयः कान्तिमान् अतिशयबलः । वज्रसंहननश्चेति ॥ ४५ ॥

ग्रहणस्व रूपास्मितान्वयार्थवत्वसंयमादिन्द्रियजयः ॥ ४६ ॥

सामान्यविशेषात्मा शब्दादिग्राह्यः तेष्विन्द्रियाणां वृत्तिग्रहणम् । न च तत् सामान्यमात्रग्रहणाकारं कथमनालोचितः सविषयविशेष इन्द्रियेण मनसानुव्यवसीयतेति ।

आदुर्भाव इत्यनेनैव तज्जन्मानभिघात सिद्धौ पुनरुपादानं काय सिद्धिवत् एतत् सूचीपवच्च सकल विषय संयम फलवत्त्वज्ञापनाय । सुगममन्यत् ॥ ४४ ॥

काय सम्पद माह । रूप—सम्पत् । वज्रस्येव संहन नवयवव्यूहो दृढो निबिडो यस्य स तथा ॥ ४५ ॥

जितभूतस्य योगिन इन्द्रियजयोपायमाह । ग्रह—यः ग्रहणञ्च स्वरूपं चास्मितान्वयश्चार्थवत्वञ्च तेषु संयमस्तस्मादित्यर्थः । ग्रहीति ग्रहणं तच्च ग्राह्याधीन

स्वरूपं पुनः प्रकाशात्मनो बुद्धिसत्त्वस्य सामान्यविशेषयो रयुतसिद्धावयवभेदानुगतः समूहोद्रव्यमिन्द्रियं तेषां तृतीयं रूपं अस्मितालक्षणोहङ्कारः। तस्य सामान्यस्येन्द्रियाणि विशेषाः चतुर्थं रूपं व्यवसायात्मकाः प्रकाशक्रियास्थितिशीलागुणाः येषामिन्द्रियाणि साहङ्काराणि परिणामः पञ्चमं रूपं गुणेषु यदनुगतं पुरुषार्थवत्त्वमिति। पञ्चस्वेतेष्विन्द्रियरूपेषु यथाक्रमं संयमः तत् तत् जयं कृत्वा पञ्चरूपजयादिन्द्रियः जयप्रादुर्भवति योगिनः॥ ४६॥

निरूपणमिति याच्ञां दर्शयति—सामान्यविशेषात्मेति। याच्ञामुक्त्वा यद्ग्रहणमाह। तेष्विति। वृत्तिरालोचनं विषयाकारपरिणतिरिति यावत्। येवाहुः—सामान्यमात्रगोचरा इन्द्रियवृत्तिरिति तान् प्रत्याह। न चेति। यद्यते इति ग्रहणं सामान्यमात्र गोचरं ग्रहणं वाङ्मनोनिवृत्तिकं हि मनो वाङ्मनोप्रवर्त्तके अन्यथा अश्वशिरादाभावप्रसङ्गात्। तदिह यदि न विशेष विषयमिन्द्रियं तेनालोचित विशेष इति कथं मनसानुव्यवसीयेत तस्मात् सामान्यविशेषविषयमिन्द्रियालोचनमिति तदेतद्ग्रहणमिन्द्रियाणां प्रथमं रूपं। द्वितीयं रूपमाह। स्वरूपं पुनरिति। अहङ्कारो हि सत्त्वभागेनात्मीयेन इन्द्रियाण्योजनत् अतो यतत्व करणत्वं सामान्यं यच्चनियतरूपादिविषयत्वं विशेषस्तदुभयमपि प्रकाशात्मकमित्यर्थः। तेषां तृतीयं रूपमिति अहङ्कारो हि इन्द्रियाणां कारणमिति। यत्रेन्द्रियाणि तत्र तेन भवितव्यमिति। सर्वेन्द्रिय साधारण्यात् सामान्यमिन्द्रियाणामित्यर्थः। चतुर्थं रूपमिति गुणानां हि हैरूप्यं व्यवसायात्मकं व्यवसाय व्यवसेयात्मकत्वञ्च तत्र व्यव-

ततोमनोजवित्वं विकरणभावः प्रधानजयश्च ॥ ४७ ॥

कायस्यानुत्तमोगतिलाभोमनोजवित्वम् विदेहानामेन्द्रियाणामभिप्रेतकालदेशविषयापेक्षो वृत्तिलाभो विकरण भावः सर्वप्रकृतिविकारवशित्वं प्रधानजय इत्येतास्तिस्रः सिद्धयोमधुप्रतीका उच्यन्ते। एताश्च करणपञ्चकरूपजयादधिगम्यन्ते ॥ ४७ ॥

सेयात्मकतां शास्त्रतामास्थाय पञ्चतन्मात्राणि भूतभौतिकानि निर्मीयते व्यवसायात्मकत्वं तु ग्रहणरूपमास्थाय साहङ्काराणीन्द्रियाणीत्यर्थः शेषं सुगमं ॥ ४६ ॥

पञ्चरूपेन्द्रियजयात् सिद्धिराह। त—य। विदेहानामिन्द्रियाणां करणभावो विकरणभावः। देशः काश्मीरादिः। कालोऽतीतादीर्विषयः सूक्ष्मादिः सान्वयेन्द्रियत्वात् सर्वप्रकृतिविकार वशित्वं प्रधानजयः ताएता सिद्धयो मधुप्रतीका इत्युच्यन्ते योगशास्त्रनिष्णातैः। स्यादेतदिन्द्रिय जयादिन्द्रियाणि सविषयाणि वश्यानि भवन्तु प्रधानादीनां तत्कारणानां किमायातमित्यत आह ॥

एतार्थेति। करणानामिन्द्रियाणां पञ्चरूपाणि ग्रहणादीनि तेषां जयात् एतदुक्तं भवति नेन्द्रियमात्रजयश्चेताः सिद्धयोपि तु पञ्चरूपस्य तदन्तर्गतस्य प्रधानादीनि ॥ ४७ ॥

सत्वपुरुषान्यताख्यातिमात्रस्य सर्व्वभावाधिष्ठातृत्वं सर्व्वज्ञातृत्वञ्च ॥ ४८ ॥

निर्द्धूतरजस्तमोमलस्य बुद्धिसत्वस्य परे वैशारद्यपरस्यां वशीकारसंज्ञायां वर्त्तमानस्य सत्वपुरुषान्यताख्यातिमात्र रूपप्रतिष्ठस्य सर्व्वभावाधिष्ठातृत्वं सर्व्वात्मानो गुणाव्यवसाय व्यवमेयात्मकाः स्वामिनं चेतनप्रत्यग्रेषा दृश्यात्मत्वेनोपस्थित इत्यर्थः । सर्व्वज्ञातृत्वं सर्व्वात्मनां गुणानां ग्राह्योदिता व्यपदेश्यधर्म्मत्वेन व्यवस्थितानामक्रमोपारूढ़विवेकजं ज्ञानमित्यर्थः इत्येषा विशोका नाम सिद्धिः यांप्राप्य योगीसर्व्वज्ञः क्षीणक्लेशबन्धनोवशी विहरति ॥४८॥

यत्र ते ज्ञानक्रियारूप ऐश्वर्य्यहेतवः संयमाः साक्षात्पारपर्य्येण स सिद्ध्युपसंहार संपादित श्रद्धाद्वारेण यदर्थास्तस्याः सत्वपुरुषान्यताख्यातेरवान्तरविभूतीर्दर्शयति—स—स्वसिद्धंतरजस्तमोमलतया वैशारद्यं ततः परावशीकारसंज्ञा रजस्तमोभ्यासुपप्लुतं हि चित्तसत्वमवश्यमासीत्तदुपशमेतु सदृश्यं योगिनोवशिनः तस्मिन् वश्ये योगिनः सत्वपुरुषान्यताख्यातिमात्ररूप प्रतिष्ठस्य सर्व्वाधिष्ठातृत्वं । एतदेव विवृणोति । सर्व्वात्मान इति व्यवसाय व्यवसेयात्मानोजड़प्रकाशरूपा इत्यर्थः तदनेन क्रियैश्वर्य्यमुक्तं । ज्ञानैश्वर्य्यमाह । सर्व्वज्ञातृत्वमिति । अस्या अपिद्विविधायाः सिद्धेर्वैराग्याय योगिजनप्रसिद्धां संज्ञामाह । एषा विशोकेति । क्लेशाय बन्धनानि च कर्म्माणि तानि क्षीणानि यस्य स तथा ॥ ४८ ॥

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥४९॥

यदास्यैवं भवति क्लेशकर्मक्षये सत्वस्थायं विवेकप्रत्ययो-धर्मः सत्वञ्च हेयपक्षे न्यस्तं पुरुषाख्यापरिणामी शुद्धोऽन्यः सत्वादित्येवमस्य ततोविरज्यमानस्य यानि क्लेशबीजानि दग्धशालिबीजकल्पान्यप्रसवसमर्थानि सह मनसा प्रलयं गच्छन्ति तेषु प्रलीनेषु पुरुषः पुनरिदन्तापत्त्यं नभुंक्ते। तदेतेषां गुणानां मनसि कर्मक्लेशविपाकस्वरूपेणाभिव्यक्तानां चरितार्थानां प्रतिप्रसवे पुरुषस्यात्यन्तिको गुणवियोगः कैवल्यं तदास्वरूपप्रतिष्ठा चितिशक्तिरेव पुरुष इति ॥४९॥

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्ट-प्रसङ्गात् ॥ ५० ॥

चत्वारः खल्वमी योगिनः प्रथमकल्पिकोमधुभूमिकः प्रज्ञाज्योतिरतिक्रान्तभावनीयश्चेति। तत्राभ्यासी प्रवृत्त-

संयमान्तराणां पुरुषार्थाभासफलत्वात् विवेकख्यातिसंयमस्य पुरुषार्थतां दर्शयितुं विवेकख्यातेः परवैराग्योपजननद्वारेण कैवल्यं फलमाह। तत्—स्यं यदास्य योगिनः क्लेशकर्मक्षये एवं ज्ञानं भवति विभूतिमित्याह—सत्वस्थायं विवेक प्रत्ययो धर्मः। शेषं तच्च तच्च व्याख्यातत्वात् सुगमं॥ ४९॥

सम्प्रति कैवल्यसाधने प्रवृत्तस्य योगिनः प्रत्यवसन्धे तन्निराकरणमुप-

मात्रज्योतिः प्रथमः। ऋतम्भरप्रज्ञो द्वितीयः। भूतेन्द्रियजयी तृतीयः। सर्व्वेषु भावितेषु भावनीयेषु कृतरक्षाबन्धः कृतकर्त्तव्यः साधनादिमान् चतुर्थस्त्वतिक्रान्तभावनीयः तस्य चित्तप्रतिसर्ग एकोर्थः सप्तविधा अस्य प्रान्तभूमिप्रज्ञाः तत्र मधुमतीं भूमिं साक्षात् कुर्व्वतो ब्राह्मणस्य स्थानिनो देवासत्वशुद्धिमनुपश्यन्तः स्थानैरुपनिमन्त्रयन्ते—भो इहास्यतां, इह रम्यतां, कमनीयोयं भोगः, कमनीयेयं कन्यारसायनमिदं जरामृत्यु बाधते, वैहायसमिदं यानममीकल्पद्रुमाः पुण्या मन्दाकिनी सिद्धा महर्षय उत्तमा अनुकूला अप्सरसो दिव्ये श्रोत्रचक्षुषी वज्रोपमः कायः स्वगुणैः सर्व्वमिदमुपार्जितमायुष्मताप्रतिपद्यता मिदमत्ययमजरममरस्थानं देवानां प्रियमित्येवमभिधीयमानः सङ्गदोषान्

दिशति। स्था—क्तात्। तानि स्थानानि येषां सन्ति ते स्थानिनो महेन्द्रादयः तैरुपनिमन्त्रणं तस्मिन् सङ्गस्य स्मयस्य न कर्त्तव्यः पुनरनिष्टप्रसङ्गात्। तत्र यदेवास्थानैरुपनिमन्त्रयन्ते तं योगिनमेकं निर्द्धारयितुं यावन्तो योगिनः सम्भवन्ति तावत् एवाह। चत्वार इति। तत्र प्रथम कल्पितस्य स्वरूपमाह। तत्राभ्यासीति। प्रवृत्तमात्रं न पुनर्दृष्टीकृतं ज्योतिर्ज्ञानं परचित्तादिविषयं यस्य स तथा। द्वितीयमाह। ऋतम्भरा प्रज्ञ इति। यच्चेदमुक्तं—ऋतम्भरा तत्र प्रज्ञेति स हि भूतेन्द्रियाणि जिगीषुः। तृतीयमाह। भूतेन्द्रियजयीति। तेन हि स्थूलादिसंयमेन ग्रहणादि संयमेन च भूतेन्द्रियाणि। जितानि तमेवाह। सर्व्वेषु भावितेषु निष्पादितेषु भूतेन्द्रियजयात् परचित्तादि ज्ञानादिषु कृतरक्षाबन्धः यतस्तेभ्यो न च्यवते भाव-

भावयेत् घोरेषु संसाराङ्गेषु पच्यमानेन मया जननमरणान्धकारे विपरिवर्त्तमानेन कथञ्चिदासादितः क्लेशतिमिरविनाशी योगप्रदीपस्तस्य चैते तृष्णायोनयोविषयवायवः प्रतिपक्षाः स खल्वहं लब्धालोकः कथमनया विषयमृगतृष्णया वञ्चितःतस्यैव पुनः प्रदीप्तस्य संसाराग्नेरात्मानमिन्धनीकुर्य्यामिति स्वस्ति वः स्वप्नोपमेभ्यः क्षपणजनप्रार्थनीयेभ्योविषयेभ्य इत्येवं निश्चितमिति समाधिं भावयेत् सङ्कल्पमकृत्वास्मयमपि न कुर्य्यात् एवमहं देवानामपि प्रार्थनीय इति स्मयादयं सुस्थितंमन्यतया मृत्युना केशेषु गृहीतमिवात्मानं न भावयिष्यति। तथाचास्य छिद्रान्तरप्रेक्षी नित्यं यत्नोपचर्य्यः प्रामादोलब्धविवरः क्लेशानुत्तं भविष्यति। ततः पुनरनिष्ट

क्षीयेषु निषादनीयेषु विभीकादिषु परवैराग्यस्य पर्य्यन्तेषु कर्त्तव्य साधनवान् पुरुष प्रयत्नस्य साधनविषयस्यैव साध्यनिषादकत्वात्। चतुर्थमाह। चतुर्थ इति। तस्य हि भगवती जीवन्मुक्तस्य चरमदेहस्य चित्तप्रतिसर्गे एकीर्थः तदेतेषु योगिषु उपनिमन्त्रणविषयं योगिनमवधारयति। तव मधुमतीमिति। प्रथमकल्पिके यावत् महेन्द्रादीनां तत्प्राप्तिश्रद्धैव नास्ति द्वितीयेपि तैर्नोपनिमन्त्रणीयः भूतेन्द्रियवशित्वेनैव तत्प्राप्तेः। चतुर्थेपि परवैराग्यसंपत्तेरासङ्गश्रद्धा दूरोत्सारितैवेति पारिशेष्यात् द्वितीयएव कृतभरप्रश्नस्तदुपनिमन्त्रणविषय इति वैहायसं आकाशगामी अक्षयमविनाशीअजवं सदाभि नवनम् अयकरणे दोषमाह। अयादयमिति। स्मयात् सुस्थितं मन्योत्पादित्यतां भावयिष्यति न तस्यां प्रार्थीधास्यतीत्यर्थः। सुगम्

प्रसङ्गः । एवमस्य सङ्गसमयावकुर्वतोभावितोर्थोदृढ़ो भविष्यति भावनीयश्चार्थोभिमुखो भविष्यतीति ॥ ५० ॥

क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ॥५१॥

यथापकर्षपर्य्यन्तद्रव्यं परमाणुरेवं परमापकर्षपर्य्यन्तः कालः क्षणः । यावता वा समयेन चलितः परमाणुः पूर्व्वदेशं जह्यादुत्तरदेशमुपसम्पद्येत स कालः क्षणः तत् प्रवाहाविच्छेदस्तु क्रमः क्षण तत् क्रमयोर्नास्ति वस्तुसमाहार इति समाहारोमुहूर्त्ताहोरात्रादयः स । खल्वयं कालोवस्तु

मन्यत् उक्तार्थकचित् कचित् संयमात् सर्व्वज्ञता सा च न निःशेषता अपि तु प्रकारमात्रविवक्षया यथा सर्व्वे व्यञ्जनैर्भुक्तमिति अत्र हि यावन्तो व्यञ्जन प्रकारास्तैर्भुक्तमिति गम्यते न तु निःशेषैरिति अस्ति च निःशेषवचनः सर्व्वशब्दः यथोपनीतमत्रं सर्व्वमशितं प्राशकेनेति ॥ ५० ॥

तच्च हि निःशेषमिति गम्यते तदिह निःशेषत्वता लक्षणस्य विवेकजज्ञानस्य साधनं संयमनाह । च – नं । चरमपदार्थं निदर्शनपूर्व्वकमाह । यथेति । लोष्टस्य हि प्रविभाज्यमानस्य यस्मिन्नवयवेल्पतारतम्यं व्यवतिष्ठते सोपकर्षपर्य्यन्तः परमाणुर्यथा तथापकर्ष पर्य्यन्तः कालः क्षणः पूर्व्वापरभागविकलकालकलेति यावत् । तमेव क्षणं प्रकारान्तरेण दर्शयति – यावतावेति । परमाणुमात्रं देशमतिक्रमेदित्यर्थः । क्रमपदार्थः क्रमपदार्थमाह । तत्प्रवाहेति । तत्पदेन क्षणाः परामृश्यते न चेदृशः क्रमोवास्तवः किन्तु काल्पनिकस्तस्य समाहाररूपस्यायुगपदुप-

शून्यो बुद्धिनिर्भाणः शब्दज्ञानानुपातौ लौकिकानां व्युत्थित दर्शनानां वस्तुस्वरूपइवावभासते । क्षणस्तु वस्तुपतितः क्रमावलम्बी क्रमसमाप्तिर्यात्मा तं कालविदः कालइत्याचक्षते योगिनः नच द्वौक्षणौ सहभवतः क्रमस्य न द्वयोः सहभुवोरसंभवात् पूर्वस्मादुत्तरस्य भाविनोयदानन्तर्यं क्षणस्य स क्रमस्तस्माद्वर्त्तमान एकैकः क्षणोन पूर्वोत्तरक्षणाः सन्तीति तस्मान्नास्ति तत्समाहारः येतु भूतभाविनः क्षणास्ते परिणामान्विता व्याख्येयास्तनैकेन क्षणेन कृत्स्नोलोकः परिणाममनुभवति तत्क्षणोपारूढाः खल्वमी धर्म्मास्तयोः क्षणतत्क्रमयोः संयमात्तयोः साक्षात्करणं ततश्च विवेकजं ज्ञानं प्रादुर्भवति । तस्य विषयविशेष उपक्षिप्यते ॥ ५१ ॥

स्थितेषु वास्तवत्वेन विचारासहत्वादित्याह । क्षणतत्क्रमयोरिति । अयुगपद्भावि-क्षणधर्म्मत्वात् क्रमस्य क्षणसमाहारस्यावास्तवत्वात् क्षणतत्क्रमयोरप्यवास्तवत्वं समाहारस्य नैसर्गिक वैतस्थिक बुद्धातिशयरहिता लौकिका: प्रतिक्षणएव व्युत्थितदर्शना भ्रान्तायेकालमीदृशं वास्तवमभिमन्यन्त इति । तत् किं क्षणोप्यवास्तवो नेत्याह । क्षणस्तु वस्तुपतितो वास्तव इत्यर्थः । क्रमस्यावलम्बनं अवलम्बः सोस्यास्तीति क्रमेणावलम्ब्यते वैकल्पिकेनेत्यर्थः क्रमस्य क्षणावलम्बनत्वे हेतुमाह । क्रमस्येति । क्रमस्या वास्तवत्वे हेतुमाह । न चेति । चोहेत्वर्थे यस्तु वैजात्यात् सहभावमुपेयात्तं प्रत्याह । क्रमस्य न द्वयोरिति । कस्मादसाध्व इत्यत इत्यत आह । पूर्वस्मादिति । उपसंहरति तस्मादिति । तत् किमिदानीं क्षण-

जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः॥ ५२॥

तुल्ययोर्देशलक्षणसारूप्ये जातिभेदेऽन्यतायां हेतुर्गौरियं वडवेयमिति। तुल्यदेशजातीयत्वे लक्षणमन्यत्वकरं कालाच्चौ गोः। खस्तिमती गौरिति। द्वयोरामलकयो र्जातिलक्षणसारूप्यादेशभेदेऽन्यत्वकर इदं पूर्वमिदमुत्तरमिति। यदातु पूर्वमामलकमन्यव्यग्रस्य ज्ञातुरुत्तरदेशे उपा-

विषयायमाणाएव पूर्वोत्तरचर्याः नेत्याह। येत्विति अन्विताः सामान्यसमन्वागता इत्यर्थः। उपसंहरति तेनेति वर्त्तमानस्यैवार्थक्रियासु खोचितासु सामर्थ्यादिति॥ ५१॥

यद्यप्येतद्विवेकजं ज्ञानं निःशेष भावविषयमित्यये वक्ष्यते तथाप्यति सूक्ष्मत्वात् प्रथमं तस्य विषयविशेष उपचिप्यति जा—त्ति। लौकिकानां जातिभेदोऽन्यतायाः ज्ञापकहेतुः तुल्या जातिः गौर्वं तुल्यश्च देशः पूर्व्वत्वादिः कालाच्चौ खस्तिमत्यौर्लक्षणभेदः परमितिद्वयी रामलकयोस्तुल्या आमलकत्व जातिर्वर्त्तनादि लक्षणं तुल्यं देशभेदः परमिति यदातु योगि ज्ञानं जिज्ञासुना केनचित्पूर्व्वाभ-लकमन्य व्यग्रस्य योगिन ज्ञातुरुत्तरदेशे उपावर्त्तते। उत्तरदेशमामलकं ततोपसार्य्यपिधाय वा तदा तुल्यदेशत्वे पूर्व्वमेतदुत्तरमेतदिति प्रविभागानुपपत्ति प्राज्ञस्य लौकिकस्य चिप्रमाणी निपुणस्य असन्दिग्धेन च तत्त्वज्ञानेन भवितव्यं विवेकज ज्ञानवती योगिनः सन्दिग्धत्वानुपपत्तेः। अत उक्तं सूत्रकृता ततः प्रतिपत्तिः तत इति व्याचष्ट विवेकज ज्ञानदिति। क्षण तत्क्रम संयाज्यमातं ज्ञानं कथमात्मः

वर्त्तते तदा तुल्यदेशत्वे पूर्व्वमेतदुत्तरमेतदिति प्रविभागानुपपत्तिः असंदिग्धेन च तत्त्वज्ञानेन भवितव्यमित्यत इदमुक्तं ततः प्रतिपत्तिः विवेकजज्ञानादिति। कथं पूर्व्वामलकसहक्षणदेशउत्तरामलकसहक्षणाद्देशाद्विभक्ते चामलके स्वदेशक्षणानुभवभिन्ने अन्यदेशक्षणानुभवस्तयोरन्यत्वे हेतुरिति॥

एतेन दृष्टान्तेन परमाणोस्तुल्यजातिलक्षणदेशस्य पूर्व्वपरमाणुदेशसहक्षणसाक्षात् करणात् उत्तरस्य पर-

लक्षं तुल्यजाति लक्षण देशादामलकाम्बरादिवैचयतीति पृच्छति। कथमिति उत्तरमाह। पूर्व्वामलक सह क्षणोदेशः पूर्व्वामलकैकेन क्षणोदेशः तेन सह निरन्तरः परिणाम इति यावत् उत्तरामलक सह क्षणाद्देशादुत्तरामलक निरन्तर परिणामाभिन्नः भवतु देशयोर्भेदः किमायात मामलकभेदस्थेत्यत आह तें चामके स्वदेश क्षणानुभव भिन्ने स्वदेशसहिती यः क्षणस्यामलकस्य कालकला स्वदेशेन सहोत्तरा धर्म्मरूप परिणाम लक्षिता सा स्वदेश क्षणस्यानुभवः प्राप्तिः ज्ञानं वा तेन भिन्ने आमलके यथी रामलकयोः पूर्व्वोत्तराभ्यां देशाभ्यामौत्तराधर्म्य परिणामक्षण आसीत्यथैहान्तरीत्तराधर्म्य परिणामक्षण विशिष्टलमनुभवः संयमी ते भिन्नएव भवंति सम्मति तद्देश परिणामेपि पूर्व्वं भिन्नदेशपरिणामाद्विशिष्टस्य चैतद्देश परिणाम क्षणस्य संयमतः साक्षात् करणात्तदिदमुक्तमन्य देश क्षणानुभवस्तु तयोरन्यत्वे हेतुरिति। अनेनेव निदर्शनेन लौकिक परीक्षक सम्वादादीनां परमाणोरपीदृशस्य भेदो योगीश्वर बहिर्गम्यः यद्वेय इत्याह। एतेनेति

मात्रोस्तद्देशानुपपत्तौ उत्तरस्य तद्देशानुभवोभिन्नः सह-लक्षणभेदात्त योरीश्वरस्य योगिनः अन्यत्वप्रत्ययो भवति इति । अपरेतु वर्णयन्ति—येऽस्तावविशेषास्तेऽन्यतामप्रत्ययं कुर्वन्तीति तत्रापि देशलक्षणभेदो मूर्त्तिव्यवधिजातिभेद-व्यान्यत्वहेतुः क्षणभेदस्तु योगिबुद्धिगम्य एवेति अतउक्तं-मूर्त्तिव्यवधिजातिभेदाभावान्नास्ति मूलपृथक्त्वमिति वार्ष-गण्यः ॥ ५२ ॥

अपरेतु वर्णयन्ति वर्णनमुदाहरति य इति वैशेषिका हि नित्यद्रव्यवृत्तयोन्त्या विशेषा इत्याहुः तथा हि योगिनोमुक्ता न तुल्यजाति देशकालान् व्यवधिरहितान् परस्परतो भेदेन प्रत्येकं तत्त्वेन च प्रतिपद्यन्ते तस्मादस्ति कश्चिदन्त्यो विशेष इति तथाच सत्येव नित्यानां परमाण्वादीनां द्रव्याणां भेदक इति तदेतद्दूषयति तत्रा-पीति जातिदेश लक्षणान्युदाहृतानि मूर्त्तिः संस्थानं यथैकं विग्रहावयव संस्थानोपपन्नमपसार्य तस्मिन्नेव देशेऽन्ययव्यग्रस्य द्रष्टुः कुत्सितावयव सन्निवेश उपा-वर्त्यते तदा तस्य संस्थानभेदेन भेदप्रत्ययः शरीरं वा मूर्त्तिं तत्सम्बन्धे नात्मनां संसारिणां मुक्तात्मनां वा भूतचरथे यादृशं तादृशेन भेद इति सर्व्वत्र भेद प्रत्ययस्या-न्यथा सिद्धिर्नास्त्य विशेष कल्पना व्यवधिभेदकारणं यथा कुशपुष्करबीजयोर्देश स्वरूपयोरिति यतो जातिदेशादिभेदा लौकबुद्धिगम्या अत उक्त क्षणभेदस्तु योगि बुद्धिगम्य एवेति एवकारक्षणभेदमवधारयति । न योगि बुद्धिगम्यत्वं तेन भूतचरेण देहसम्बन्धे न मुक्तात्मनामपि भेदो योगिबुद्धिगम्य उच्येय इति यस्य तुल्याभेद हेतवो न सन्ति तस्य प्रधानस्य भेदो नास्तीत्याचार्योमिने यस्मादूचे कृतार्थं प्रतिनष्टमप्य-नष्टं तदन्य साधारत्वादिति तदाह । मूर्त्तिव्यवधीति उक्त भेदहेतूपलक्षणमेतत् जगन्मूलस्य प्रधानस्य पृथक्त्वं भेदो नास्तीत्यर्थः ॥ ५२ ॥

तारकसर्व्वविषयं सर्व्वार्थोविषमक्रम चेति विवेकजं ज्ञानं ॥ ५३ ॥

तारकमिति। स्वप्रतिभोत्थमनौपदेशिकमित्यर्थः। सर्व्व-विषयं नास्य किञ्चिदविषयीभूतमित्यर्थः। सर्व्वथा विषय मतीतानागतप्रत्युत्पन्नं सर्व्वं पर्यायैः सर्व्वथा जनातीत्यर्थः। अक्रममित्येकक्षणोपारूढं सर्व्वं सर्व्वथा गृह्णातीत्यर्थः। एतद्विवेकजं ज्ञानं परिपूर्णमस्यैवांशोयोग-प्रदीपोमधुमतीं भूमिमुपादाय यावदस्य परिसमाप्तिरिति प्राप्तविवेकजज्ञानस्याप्राप्तविवेकजज्ञानस्य वा ॥ ५३ ॥

तदेवं विषयैकदेशं विवेकज ज्ञानस्य दर्शयित्वा विवेकजं ज्ञानं लक्षयति। तावं विवेकजं ज्ञानमिति लक्षा निर्देशः शेषं लक्षयं संसारसागरात्तारयतीति तारकं पूर्व्वस्मात् प्रातिभाद्विशेषयति सर्व्वथा विषयमिति पर्य्यायाः अतएव विवेकजं ज्ञानं परिपूर्णं नास्य क्वचित् किञ्चित् कथञ्चित् कदाचित् अगोचर इत्यर्थः। आस्तां तावत् ज्ञानान्तरं सम्प्रज्ञातोपि नावदस्यां सः तस्मादतः परं किं परिपूर्णमित्याह अस्यैवांशीयोपप्रदीपः संप्रज्ञाता किमुपक्रमः किमवसानश्चासावित्याह। मधुमतीमिति। ऋतम्भरा प्राज्ञैव मधुमोदकारणत्वात् यद्वीकं प्रज्ञाप्रसादमारुरुक्षति तदती मधुमतीं तामुपादाय यावदस्य परिसमाप्तिं सप्तधा प्रान्तभूमिः प्रज्ञा अतएव विवेकजं ज्ञानं तारकं भवति तदंशस्य योगप्रदीपस्य तारकत्वादिति ॥ ५३ ॥

सत्वपुरुषयो. शुद्धिसाम्ये कैवल्यमिति ॥५४॥

यदा निर्धूतरजस्तमोमलं बुद्धिसत्वं पुरुषस्यान्यता प्रत्ययमात्राधिकारं दग्धक्लेशबीजं भवति तदा पुरुषस्य शुद्धिसारूप्यमिवापन्नं भवति तदा पुरुषस्योपचरितभोगाभावः शुद्धिः एतस्यामवस्थायां कैवल्यं भवति । ईश्वरस्यानीश्वरस्य वा विवेकजज्ञानभागिन इतरस्य वा नहि दग्धक्लेशबीजस्य ज्ञाने पुनरपेक्षा काचिदस्ति । सत्वशुद्धिद्वारेण एतत्समाधिजमैश्वर्यञ्च ज्ञानं चोपक्रान्तपरमार्थंतस्तु ज्ञानादर्शनं निवर्त्तते तस्मिन्निवृत्तेन सन्तुत्तरे क्लेशाः क्लेशाभावात् कर्म्मविपाकाभावश्चरिताधिकाराश्चैतस्यामवस्थायां

तदेवं परम्परया कैवल्यस्य हेतून् सविभूतीन् संयमानुक्त्वा सत्व पुरुषान्यता ज्ञानं साक्षात् कैवल्यसाधनमित्यत्र सूत्रमवतारयति प्राप्तेति विवेकजं ज्ञानं भवतुमा वाभूत् सत्व पुरुषान्यता ख्यातिस्तु कैवल्यप्रयोजिकेत्यर्थः । स—त्वमिति । इति: सूत्र समाप्तौ ईश्वरस्य पूर्व्वोक्तैः संयमैः ज्ञानक्रियया प्रकृतिलयोऽनीश्वरस्य वा समनन्तरोक्तेन संयमेन विवेकज ज्ञानभागिन इतरस्य वानुत्पन्न ज्ञानस्य न विभुतिषु काचिदपेक्षाकीत्याह । न हीति ननु यद्यनपेक्षिता विभूतयः कैवल्ये व्यर्थः तर्हि तासामुपदेश इत्यत आह सत्व शुद्धिद्वारेणेति इत्यभूत खल्वर्थे तृतीयानात्यन्तमहेतवः कैवल्ये विभूतयः किन्तु न साक्षादित्यर्थः ज्ञानं विवेकमनुपक्रान्तं

गुणानपुरुषस्य पुनर्दृश्यत्वेन उपतिष्ठन्ते तत् पुरुषस्य कैवल्यं तदा पुरुषः स्वरूपमात्रज्योतिरमलः केवली भवति ॥ ५४ ॥

इति पातञ्जलभाष्य प्रवचने विभूतिपादस्तृतीयः समाप्तः।

यच्च पारम्पर्येण कारणं तदौपचारिकं न मुख्यं परमार्थतस्तु ख्यातिरेव मुख्यमित्यर्थः ज्ञानादिति प्रसङ्ख्यानादित्यर्थः ॥ ५४ ॥

अवान्तरङ्गान्यङ्गानि परिणामाः प्रपञ्चिताः।
संयमादभूतिसंयोगस्तासु ज्ञानं विवेकजं ॥ ३ ॥

इति श्रीवाचस्पति मिश्र विरचितायां पातञ्जलभाष्य व्याख्यायां तत्त्व-वैशारद्यां विभूतिपादस्तृतीयः समाप्तः ॥

कैवल्यपादः ।

जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः ॥१॥

देहान्तरिता जन्मना सिद्धिः औषधिभिरसुरभवनेषु रसायनेनेत्येवमादि । मन्त्रैराकाशगमनाणिमादिलाभः तपसा संकल्पसिद्धिः कामरूपी यत्र तत्र कामग इत्येवमादिसमाधिजाः सिद्धयो व्याख्याताः ॥ १ ॥

यदेवं प्रथम द्वितीय तृती पादैः समाधितत्साधन तद्विभूतयः प्राधान्येन व्युत्पादिताः इतरत्तु प्रासङ्गिक मौपोद्घातिकत्वेनोक्तं इदानीं तद्वक्तुकं कैवल्यं व्युत्पादनीयं न चैतत् कैवल्यभागीयं चित्तं परलोकच्च परलोकिनं विज्ञानातिरिक्तं चित्तकरणक सुखाद्यात्मक शब्दाद्युपनीतारमात्मानच्च प्रसङ्गान परमकाष्टाच्च विना व्युत्पाद्य शक्यं वक्तुमिति तदेतत् सर्व्वमत्र पादे व्युत्पादनीयं इतरच्च प्रसङ्गादुपोद्घातादा । तत्र प्रथमं सिद्धचित्तेषु कैवल्यभागीयं चित्तं निर्द्धारयितुकामः पञ्चभयीं सिद्धिमाह । जन्म । औषधि । मन्त्र । तपः । समाधिजाः सिद्धयः । व्याचष्टे देहान्तरितेति । स्वर्गापभोगभागीयावत् कर्म्मणो मनुष्यजातीयाचरितात् कुतश्चिन्निमित्तात् लब्धपरिपाकात् क्वचिद्देवनिकाये जातमात्रस्यैव दिव्यदेहान्तरिता सिद्धिरणिमाद्या भवतीति । औषधि सिद्धिमाह असुरभवनेष्विति । मनुष्यो हि कुतश्चिन्निमित्तादसुरभवनमुपसम्प्राप्तः कमनीयाभिरसुरकन्याभी रूपनीतं रसायनमुपयुज्य जरामरणत्वमत्यन्त सिद्धीरासादयति । इहैव वा रसायनोपयोगेन

तत्र कायेन्द्रियाणामन्यजातीयपरिणतानाम् ॥

जात्यन्तरपरिणामः प्रकृत्यापूरात् ॥ २ ॥

पूर्वपरिणामापाये उत्तरपरिणामोपजनस्तेषां पूर्वाः

यथामाख्ख्ये मुनीरसोपयोगादि वल्यावासीति । मन्त्रसिद्धिमाह । मन्त्रैरिति । तपः सिद्धिमाह तपसेति । सङ्कल्पसिद्धिमाह । कामरूपीति । यदेव कामयतेऽणिमादि तदेकपदेस्य भवतीति यत्र कामयते श्रोतुं वा मन्तुं वा तत्र तदेव शृणोति मनुते चेति आदिशब्दाद्दर्शनादयः संगृहीता इति । समाधिजाः सिद्धयो व्याख्याता अभवत्तेपादे अथ चतसृषु सिद्धिष्वौषधादि साधनासु तेषामेव कायेन्द्रियाणां जात्यन्तरे परिणतिरिष्यते सा पुनर्न तावदुपादानमाचात् न हि तावन्माचसुधादानं नूनाधिक दिव्यादिव्यभावेस्य भवति नो खल्वविलक्षणं कारणं कार्यवैलक्षण्यायार्ल माऽस्याकस्मिकत्वं भूदित्याशङ्क्य पूरयित्वा सूत्रं पठति ॥ १ ॥

तत्र कायेन्द्रियाणामन्यजातीय परिणतानां जात्यन्तरपरिणामः प्रकृत्या पुरात् । मनुष्यजाति परिणतानां कायेन्द्रियाणां यो देव तिर्यग्जातिपरिणामः स खलु प्रकृत्यापूरात् कायस्य हि प्रकृतिः पृथिव्यादीनि भूतानि इन्द्रियाणाञ्च प्रकृतिरस्मिता तदवयानुप्रवेश आपूरः तस्माद्भवति । तदिदमाह पूर्वपरिणामेति । ननु यद्यापूरणानुग्रहः कस्मात् पुनरसौ न सदातन इत्यत आह । धर्मादीति तदनेन तस्यैव शरीरस्य बाल्य कौमारयौवन वार्द्धकादीनि च न्यग्रोधतरुभावश्च वल्मीकवल्मीकाया तृणराशि निवेशितायां वाग्नीडवज्वालासहस्र समालिङ्गित गगनमण्डलत्वञ्च व्याख्यातं प्रकृत्यापूरादित्युक्तं तत्रेदं सन्दिह्यते किमापूरः प्रकृ-

वयवानुप्रवेशाद् भवति कायेन्द्रियप्रकृतयश्च स्वं विकारं प्रतिगृह्णन्ति आपूरेण धर्मादि निमित्तमपेक्षमाणा इति ॥२॥

निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ॥ ३ ॥

नहि धर्मादिनिमित्तं प्रयोजकं प्रकृतीनां भवति न कार्येण कारणं प्रवर्त्यत इति। तर्हि वरणभेदस्तु, ततः क्षेत्रिकवत् यथा क्षेत्रिकः केदाराद्यां पूर्णात् केदारात् पिप्लावयिषुः समं निम्नं निम्नतरं वालापः पाणिनापकर्षत्या वरणं त्वासां भिनत्ति तस्मिन् भिन्ने स्वयमेव आपः केदारान्तरमाप्लावयन्ति तथा धर्मः प्रकृतीनामावरणमधर्मं भिनत्ति तस्मिन् भिन्ने स्वयमेव प्रकृतयः स्वं स्वं विकारमाप्लावयन्ति। यथा वा स एव क्षेत्रिकस्तस्मिन्नेव केदारेण

तीनां स्वाभाविकी धर्मादिनिमित्तो वेति किंप्राप्तं सतीष्वपि प्रकृतिषु कदाचिदापूराद्धर्मादि निमित्त अवणाच्च सन्निमित्त एवेतिप्राप्तं। एवं प्राप्ते आह निमित्त क्षेत्रिकवत्। सत्यं धर्मादयो निमित्तं न तु प्रयोजकाः तेषामपि प्रकृति कार्यत्वात् न च कार्यं कारणं प्रयोजयति तस्य तदधीनोत्पत्तितया कारण तन्त्रत्वात् स्वतन्त्रस्य च प्रयोजकत्वात् न खलु कुलालमन्तरेण मृद्दण्डचक्र सलिलादयः उत्पित्सितेनोत्पन्नेन वा घटेन प्रयुज्यन्ते किन्तु स्वतन्त्रेण कुलालेन न च पुरुषार्थोपि प्रवर्त्तकः किन्तु तदुद्देशेनेश्वर उद्देश्यतामात्रेण पुरुषार्थः प्रवर्त्तक इत्युच्यते

प्रभवत्यौदकान् भौमान् वा रसान् धान्यमूलान्यनु प्रवेशयितुं किन्तर्हि मुद्गवेधुकश्यामाकादींस्ततोपकर्षत्यपकृष्टेषु तेषु स्वयमेव रसा धान्यमूलान्यनुप्रविशन्ति। तथा धर्म्मोनिवृत्तिमात्रे कारणमधर्म्मस्य शुद्धाशुद्धयोरत्यन्तविरोधात् न तु प्रकृतिप्रवृत्तौ धर्म्महेतुर्भवतीति-अत्र-नन्दीश्वरादय उदाहार्य्याः विपर्य्ययेणाप्यधर्म्मोधर्म्मं बाधते ततश्चाशुद्धिपरिणाम इति तत्रापि नहुषाजगरादय उदाहार्य्याः। यदातु योगी बहून् कायान्निर्म्मिमीते तदा किमेकमनस्कास्ते भवन्त्यथानेकमनस्का—इति ॥ २ ॥

निर्म्माणचित्तान्यस्मितामात्रात् ॥ ४ ॥

अस्मितामात्रं चित्तकारणमुपादाय निर्म्माणचित्तानि करोति ततः सचित्तानि भवन्ति ॥ ४ ॥

अत्रिष्ठोल्लख पुरुषार्थस्याव्यक्तस्य स्थितिकारणत्वं युक्तं न चेतनवतश्च धर्म्मादीनाम निमित्तता प्रतिबन्धापनयनमात्रेण चेष्टिकवदुपपन्नेश्वरस्यापि धर्म्माधिष्ठानार्थं प्रतिबन्धापनय एव व्यापारो वेदितव्य' तदेतन्निमद व्याख्यानेन भाष्यसीक्षं प्रकृत्या पूरेण सिद्धीः समर्थ सिद्धि विविर्म्मित नानाकायवत्तिं चित्तैक्त्व नानात्वे विचारयति यदात्विति ॥ २ ॥

तत्र नानामनस्केकायानां प्रतिचित्तमभिप्राय भेदादेकाभिप्रायानुरोधश्च परस्पर प्रतिसन्धानश्च न स्यात् पु षान्तरवत् तस्मादेकमेव चित्तं प्रदीपु-

प्रवृत्तिभेदेप्रयोजकं चित्तमेकमनेकेषां ॥५॥

बहूनां चित्तानां कथमेकचित्ताभिप्रायपुरःसरा प्रवृत्तिरिति सर्वचित्तानां प्रयोजकं चित्तमेकं निर्म्ममीते ततः प्रवृत्तिभेदः ॥ ५ ॥

तत्र ध्यानजमनाशयः ॥ ६ ॥

अविसारितया बहूनपि निर्म्माणकायान् व्याप्नोतीति प्राप्तमाह। निर्म्माणचित्तान्यस्मितामात्रात्। यद् यावत्यौवच्छरीरं तत्सर्व्वमेकैकासाधारण चित्तान्वितं दृष्टं तद्यथा चैवमेवादिशरीरं तथाच निर्म्माणकाया इति। सिद्धं तेषामपि प्रातिस्विकं मन इत्यभिप्रायेणाह अस्मितामात्रमिति ॥ ४ ॥

यदुक्तं अनेकचित्तत्वे एकाभिप्रायानुरोधश्च प्रतिसन्धानञ्च न स्यातामिति तदुत्तरं सूत्रं प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषां। अभविष्य देष दोषः यदि चित्तमेकं नानाकायवर्त्ति मनो नायकं ननिरभास्यत्तन्निर्म्माणत्व दोषः न चैकं गृहीत्वाकृतं प्रातिस्विकैर्मनोभिः कृतं वा नायक निर्म्माणेन निजस्यैव मनसो नायकत्वादिति वाच्यं प्रमाणसिद्धस्य नियोग पर्य्यनुयोगानुपपत्तेरिति अत्र पुराणं भवति। एकस्तु प्रभुशक्त्यावे बहुधा भवतीश्वरः। भूत्वा यस्मात्तु बहुधा अवलोकः पुनस्तु सः। तस्माच्च मनसोभेदाज्जायन्ते चेतएवहि। एकधा सहिषाचैव विधा च बहुधा पुनः। योगीश्वरः शरीराणि करोति विकरोति च। प्राप्नुयादिषयान् कैश्चिदुत्तपश्चरेत्। संहरेच्च पुनस्तानि सूर्य्योरश्मिगणानिवेति तदेतेनाभिप्रायेणाह। बहूनां चित्तानामिति तदेवमुदितेषु पञ्चसु सिद्धचित्तेषु ॥५॥

पञ्चविधं निर्म्माणचित्तं जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय इति तत्र यदेव ध्यानजं चित्तं तदेवानाशयं तस्यैव वास्त्याशयो रागादिप्रवृत्तिर्नास्तः पुण्यपापाभिसम्बन्धः क्षीणक्लेशत्वात् योगिन इति ॥ ६ ॥

इतरेषान्तु विद्यते कर्म्माशयो यतः—

कर्म्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् ॥७॥

चतुष्यात् खल्वियं कर्म्मजातिः। कृष्णा। शुक्लकृष्णा। शुक्ला। अशुक्लाऽकृष्णाचेति। तत्र कृष्णा दुरात्मनां। शुक्ला-

अपवर्गभागीयं चित्तं निर्द्धारयति। तत्र ध्यानजमनाशयं। आशेरत इत्याशयाः कर्म्मवासनाः क्लेशवासनाश्च तत्र ते न विद्यन्ते यस्मिन् तदनाशयं चित्तं अपवर्गभागीयं भवतीत्यर्थः। यतो रागादि निबन्धना प्रवृत्तिर्नास्ति अतो नास्ति पुण्यपापाभिसम्बन्धः। कस्मात्पुनरागादिजनिता प्रवृत्तिर्नास्तीत्याह। क्षीणक्लेशत्वादिति ध्यानजस्यानाशयस्य मनोन्तरेभ्यो विशेषं दर्शयितुमितरेषामाशयवत्तामाह इतरेषां त्विति ॥ ६ ॥

तत्रैवञ्च हेतुपरं सूत्रमवतारयति यद्ध इति। कर्म्माशुक्लाकृष्णमितरेषामाशयवत्तामाह इतरेषां पदं स्थानं चतुर्थं समवेता यदुच्यदीयं यावद बहिःसाधनं साध्यं तत्र सर्व्वत्रापि कर्म्मणि परपीडा नास्ति अवघातादिसमवेतेपि क्षित्यादिवधसंश्रयात् अस्तीत्याह बीजादिवधेन स्थावरादि-

कृष्णा बहिःसाधनसाध्या, तत्र परपीड़ानुग्रहद्वारेणकर्म्माशयप्रचयः। शुक्ला तपःस्वाध्यायध्यानवतां सा हि केवले मनसि आयत्तत्वाद्बहिःसाधनाधीनानपरान् पीड़यित्वा भवति। अशुक्ला अकृष्णा संन्यासिनां क्षीणक्लेशानां चरमदेहानामिति। तत्राशुक्लं योगिन एव फलसंन्यासात्कृष्णं चानुपादानात् इतरेषान्तु भूतानां पूर्व्वमेव त्रिविधमिति ॥ ७ ॥

ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्॥८

ततइति त्रिविधात् कर्म्मणः। तद्विपाकानुगुणानामेवेति यज्जातीयस्य कर्म्मणो यो विपाकस्तस्यानुगुणा या वासनाः कर्म्मविपाकमनुशेरते तासामेवाभिव्यक्तिर्न हि

भेदीत्यनिष्प्रतिबन्धात् अनुग्रहश्च दक्षिणादिना ब्रह्मादेरिति शुक्लातपः। स्वाध्याय ध्यानवतामसन्न्यासिनां शुक्लत्वमुपपादयति स्वाहीति अशुक्ला कृष्णा सन्न्यासिनां सन्न्यासिनोदर्शयति। क्षीणेति कर्म्मसम्बन्धात् कर्म्मसन्न्यासिनोहि न क्वचिद्बहिः साधनसाध्ये कर्म्मणि प्रवृत्ता इति नचैषामस्ति कृष्णकर्म्माशयस्यानुष्ठानसाध्यस्य कर्म्माशयफलस्वैरे समर्पणान्नशुक्लकर्म्माशयः निरवयफलोहि शुक्लउच्यते यस्य फलमेव नास्ति कुतस्तस्य निरवयफलमित्यर्थः॥ ७॥

तदेवं चतुष्टयीं कर्म्मजातिमुक्त्वा कतमा कस्येवेत्यवधारयति तत्राशुक्लमिति कर्म्माशयं विविच्य क्लेशाभ्यवगतिमाह। ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां। यज्जातीयस्य पुण्यजातीयस्यापुण्यजातीयस्य वा कर्म्मणो यो विपाकोदित्वो वा नारकी वा आत्मायुर्भोगस्तद्विपाकस्यानुगुणाः तादृशाः। या वासना

दैवं कर्म विपच्यमानं नारकतिर्यङ्मनुष्यवासनाभिव्यक्ति निमित्तं भवति किन्तु दैवानुगुणा एवास्य वासना व्यज्यन्ते नारकतिर्यङ्मनुष्येषु चैवं समानश्चेति ॥ ८ ॥

जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृति संस्कारयोरेकरूपत्वात् ॥ ९ ॥

दृष्टादृष्टविपाकोदयः स्वव्यञ्जकाञ्जनाभिव्यक्तः स यदि जात्यन्तरेण वा दूरदेशतया वा कल्पशतेन वा व्यवहितः पुनश्च स्वव्यञ्जकाञ्जन एवोदियात् द्राग्येवं पूर्वानुभूत दृष्टादृष्टविपाकाभिसंस्कृता वासना उपादाय व्यज्येत तस्मात् यतो व्यवहितानामप्यासां सदृशं कर्माभिव्यञ्जकं निमित्तीभूतमित्यानन्तर्यमेव कुतश्च स्मृतिसंस्कारयोरेक-

कर्मविपाकमनुशेरते अनुकुर्वन्ति दिव्यभोगजनिताहि दिव्यकर्मविपाकानुगुणा वासनाः नहि मनुष्यभोगवासनाभिव्यक्तौ दिव्यकर्मफलोपभोगसम्भवः तस्मात् स्वविपाकानुगुणाएव वासनाः कर्माभिव्यञ्जनीया इति भाष्यार्थः ॥ ८ ॥

स्यादेतत् मनुष्यस्य प्रायणानन्तरमधिगतमाजारभावस्यानन्तरतया मनुष्यवासनाया एवाभिव्यक्त्या भवितव्यं न खल्वस्ति सम्भवो यदनन्तरदिवसानुभूतं न स्मर्यते व्यवहितदिवसानुभूतञ्च स्मर्यत इत्यतआह। जातिदेशकालत्वात्॥ भवतु दृष्टादृष्टवासनाया जात्यादि व्यवधि तथापि तस्याः फलतश्चानन्तर्यं दृष्टादृष्टविपाकेन कर्मणा तस्या एव स्वविपाकानुगुण्याया अभिव्यक्तौ तत् स्मरणसमुपपादयित्याह। दृष्टादृष्टविपाकोदय इति उदेष्यजात्यादिनोदयः कर्मणः पुनश्च स्वव्यञ्जका

रूपत्वात् यथानुभवास्तथा संस्काराः। ते च कर्माशयवासना-रूपाः यथा च वासनास्तथा स्मृतिरिति जातिदेशकाल व्यवहितेभ्यः संस्कारेभ्यः स्मृतिः स्मृतेश्च पुनः संस्कारा इत्येते स्मृति संस्काराः कर्माशयवृत्तिलाभवशाद्व्यज्यन्ते। अतश्च व्यवहितानामपि निमित्तनैमित्तिकभावानुच्छेदा-दानन्तर्य्यमेव सिद्धमिति ॥ ९ ॥

तासामनादित्वञ्चाशिषोनित्यत्वात् ॥ १० ॥

तासां वासनानामाशिषो नित्यत्वादनादित्वं। ये यमात्माशीर्मानभूवं भूयासमिति सर्व्वस्य दृश्यते सा न स्वाभाविकी कस्मात् जातमात्रस्याननुभूतमरणधर्म्मकस्य

स्न एव उदियात् अभिव्यज्येत विपाकारम्भाभिमुख: क्रियेतेत्यर्थ: अभिसंस्कारक्रिया उपादाय गृहीत्वा व्यज्येत यदि व्यज्येत स्वविपाकानुगुणा एव वासना गृहीत्वा व्यज्येतेत्यर्थ: आनन्तर्य्यमेव फलत: कारणद्वारकमुपपाद्य कार्य्यद्वारकमुपपादयति कृतश्च स्मृतीति एकरूपतया सादृश्यं तदेवाह तथेति ननु अनुभवस्तरूपासेत् संस्कारा: तथासत्यनुभवा विप्रकारव इत्येतेपि विप्रकारव: कथं चिरभाविने अनु-भवाय कल्पेरन्नित्यत आह। ते च कर्म्मवासना रूपा: यथाऽपूर्व्वं स्थायि जन्मिक-कर्म्मनिमित्तमपि एवं चन्मिकानुभवनिमित्तोपि संस्कार: स्थायी किन्त्विदादि-ज्ञानञ्च सादृश्यं अन्यथा भेदे तत्त्वेन सादृश्यानुपपत्तेरित्यर्थ:। सुगममन्यत् ॥९॥

स्यादेतत् व्यज्येरन् पूर्व्वपूर्व्वतरजन्माभिसंस्कृता वासना। यदि पूर्व्वपूर्व्वतरजन्म-सद्भावे प्रमाणं स्यात्तदेवतु नास्ति न ह्यात्मनोवस्य जन्मोऽहमेवोत्पन्नमात्रं प्रमाण्यं

द्वेषदुःखानुस्मृतिनिमित्तोमरणत्रासः कथं भवेत्। न च स्वाभाविकं वस्तुनिमित्तमुपादत्ते तस्मादनादिवासनानुविद्धमिदं चित्तं निमित्तवशात् क्वाग्निदेव वासनाः प्रतिलभ्य पुरुषस्य भोगायोपावर्त्तते इति घटप्रासादप्रदीपकल्पं। सङ्कोचविकाशि चित्तं शरीरपरिमाणाकारमात्रमित्यपरे

भवितु मर्हति पद्मादिसङ्कोचविकाशवत् स्वाभाविकत्वे न तदुपपत्तेरिति अतआह। तासामनादित्वाश्चिषोनित्यत्वात्॥ तासां वासनानामनादित्वञ्च न केवलमानर्थक्यमिति चार्थः आशिषोनित्यत्वात् आत्माशिषोवासनानामनादित्वे नित्यत्वाव्यभिचारादिति ननु स्वाभाविकत्वेनापुरुषपत्तेरसिद्धमाशिषोनित्यत्वमित्यत आह येयमिति नास्तिकः पृच्छति कस्मात्। उत्तरं जातमात्रस्य जन्तोरिति अतएवैतस्मिन् जन्मन्यननुभूतमरणधर्म्मकस्य मरणमेव धर्म्मः सोऽननुभूतो येन स तथोक्तस्य मातुरङ्कात् प्रस्खलतः कम्पमानस्य भाङ्कार्य्यचक्रादिलाञ्छितं तदुरःसूत्रमतिगाढं पार्श्वियाहमवलम्बमानस्य बालकस्य कस्यभेदानुमितात् द्वेषानुषक्ते दुःखे या स्मृतिस्तन्निमित्तोमरणत्रासः कथं भवेदिति ननूक्तं स्वभावादित्यत आह। न च स्वाभाविकं वस्तुनिमित्तमुपादत्ते गृह्णाति क्वोत्पत्तौ एतदुक्तं भवति बालकस्वेदश्वोद्दश्यमानः कम्पोभयनिमित्तः द्वेष्यकम्पत्वात् अस्मदादिकम्पवत् बालकभयं द्वेषदुःखस्मृतिनिमित्तं भयत्वात् अस्मदादिभयवत् आगामिप्रत्यवायोत्प्रेक्षालक्षणञ्च भयं न दुःखस्मृतिमात्रात् भवति अपि तु यतोयतो विभेति तस्य तस्य प्रत्यवायहेतु भावमनुमाय सम्प्रत्यपि प्रत्यवायमयमपि विदध्यादिति शङ्कते तस्मात् यज्जातीयादनुभूतचरात् द्वेषानुषक्तं दुःखमुपपादितं तस्य स्मरणात् तज्जातीयस्यानुभूयमानस्य तद्दुःखहेतुत्वमनुमाय ततो विभेति न च बालकेनास्मिन् जन्मनि स्खलनस्यान्यच्च दुःखहेतुत्वमवगतं न च तादृशं दुःखमुपलब्धं तस्मात् प्राग्भवियोनुभवः परिशिष्यते

प्रतिपन्नास्तथा चान्तराभावः संसारश्च युक्त इति। वृत्तिरेवास्यविभुनः सङ्कोचविकाशिनीत्याचार्यः। तच्च धर्मादिनिमित्तापेक्षं निमित्तञ्च द्विविधं बाह्यमाध्यात्मिकञ्च शरीरादिसाधनापेक्षं बाह्यं स्तुतिदानाभिवादनादिचित्तमात्रा-

तच्चैतदेवं प्रयोगमारोहति जातमात्रस्य बालस्य स्मृतिः पूर्वानुभव निबन्धना स्मृतित्वात् अद्यतनादिस्मृतिवदिति न च सङ्कोच विकाशावपि स्वाभाविकौ न हि स्वाभाविकं कारणान्तरमपेक्षतेवह्नेरौष्ण्यं प्रत्यपि कारणान्तरापेक्षाप्रसङ्गात् तस्मादागन्तुक मदृष्टकारं सम्पर्कमात्रमेव कमलिनी विकाशकारणं सङ्कोचकारणञ्च संस्कारस्थितिस्थापक इति एवं स्मृत्याद्यनुमित हर्षादयोपि प्राचिभवे हेतवो वेदितव्याः तदास्तां तावत् प्रकृतमुपसंहरति तस्मादिति निमित्तं लब्ध विपाककालं कर्म प्रतिलभ्योभिव्यक्ति प्रसङ्गत चित्तपरिमाण विप्रतिपत्तिं निराचिकीर्षुर्विप्रतिपत्ति माह। घटप्रासादेति देह प्रदेश वर्त्तिकार्य्य प्रदर्शनात् देहात्बहिः सद्भावे चित्तस्य न प्रमाणमस्ति न चैतदनुपरिमाणं दीर्घशष्कुली भक्षणादावपर्य्याप्ते ज्ञानपक्षकानुत्पाद प्रसङ्गात् न चाननुभयमान क्रमकल्पनार्या प्रमाणमस्ति न चैकमनेनानादेशैरिन्द्रियैरपर्य्याप्तेन संबन्धुमर्हति तत्परिशेषात् कायपरिमाणं चित्तं घटप्रासादवर्त्ति प्रदीपवत्॥ संकोचविकाशी पुत्तिका इति देहयोरस्योत्पत्स्येते शरीर परिमाणमेवाकारः परिमाणं यस्येति अपरे प्रतिपन्नाः नन्वेवं कथं अस्य चैवंरूपस्य संयोगः न खल्वेतदनाश्रय मतशरीरात् भाद्र पिंड देहवर्त्तिनी लोहित रेतसी प्राप्नोति परतन्त्रत्वात् नहि स्थावरादिष्वगच्छत् मुच्छाया गच्छति नचागच्छति पटे तदाश्रयं चित्रं गच्छति तथाच न संसारः स्यादित्यत आह। तथा चान्तराभावः। अतएव संसारश्च युक्तइति तथाच शरीरपरिमाणत्वे देहान्तर प्राप्तये पूर्वदेहं

धीनं श्रद्धाद्याध्यात्मिकं तथाचोक्तं ये चैते मैत्र्यादयोध्यायिनां विहारास्ते वाह्यसाधननिरनुग्रहात्मानः प्रकृष्टं धर्ममभिनिर्वर्त्तयन्ति तयोर्मानसं बलीयः कथं ज्ञानवैराग्ये केनातिशय्येते दृष्टकारणं चित्तबलव्यतिरेकेन कः शरीरेण कर्म्मणा शून्यं कर्त्तुमुत्सहेत समुद्रमगस्त्यवद्वा पिवेत् ॥१०॥

त्यागश्च देहान्तर प्राप्तिस्थानस्यातिवाहिक शरीर संयोगाश्रयतः तेनखल्वयं देहान्तरे सञ्चरेत् । तथाच पुराणं । अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमोबलादिति सीयमन्तराभावः अतएव संसारस्य युक्तइतितदेतदभ्युपगम्यमाणः स्वमतमाह । इत्तिरेवास्य विभूतिश्चित्तस्य संकोच विकाशिनीत्याचार्यः स्वयम्भूः प्रतिपेदेइदमनाकृतं यद्यनाश्रयं चित्तं न देहान्तर सञ्चारि कथमेतदाधिवाहिक माश्रयते तथापि देहान्तर कल्पनाया मनवस्था न चास्य देहान्निष्कर्षन् आतिवाहिकस्य सम्भवति निष्कृष्टस्य चेतसस्तत् सम्बन्धात् अस्तुतर्हि सूक्ष्मशरीरमेवासर्गादाच महाप्रलयान्नियतं चित्तानामधिष्ठानं षाट्कौशिकशरीरमध्यवर्त्तितेन हि चित्तमासत्यलीकादाचावीचेस्तत्र तत्र शरीरे सञ्चरति निष्कर्षश्चास्योपपन्नःषाट्कौशिकात् कायात्तत्रहि तदन्तराभावस्य नियतत्वात् न चास्यापि सद्भावे प्रमाणमस्ति नखल्वेतदध्यक्षगोचरः न च संसारीऽस्यानुमानं आचार्यमते नाप्युपपत्तेः आगमस्तु पुरुषस्य निकर्षमाह न च चित्तं वा सूक्ष्मशरीरं वा पुरुषः किन्तु चितिशक्तिरप्रतिसंक्रमा न चास्याः निष्कर्षः सम्भवति इत्यौपचारिकी व्याख्येयः तथाच चितेः चित्तस्य तत्रतत्र हत्त्याभावएव निष्कर्षार्थः यच्चस्मृतीतिहासपुराणेषु मरणानन्तरं प्रेतशरीरप्राप्तिः तद्विभीषिकया सपिण्डीकरणादिभिरित्युक्तं तदनुजानीमः आतिवाहिकत्वं तस्य न त्वभ्युपगच्छामः न चाचार्यस्य कश्चिदागमः सूक्ष्मशरीरएव यमपुरुषैरपि पाशवद्धीनीयते नत्वातिवाहिक

हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः ॥ ११ ॥

हेतुर्धर्म्मात् सुखं अधर्म्मात् दुःखं सुखाद्रागी दुःखाद्द्वेषस्ततःप्रयत्नस्तेन मनसा वाचा कायेन वा परिस्पन्दमानः। परमनुगृह्णाति उपहन्ति वा ततः पुनर्धर्म्माधर्म्मौ सुखदुःखे रागद्वेषाविति। प्रदर्शितमिदं षड्रं संसारचक्रस्य च प्रतिक्षणमावर्त्तमानस्याऽविद्या नेत्री मूलं सर्व्वक्लेशानामित्येषा हेतुः फलन्तु यमाश्रित्य यस्य प्रतुत्पद्यता धर्म्मादेः न ह्यपूर्व्वोपजनः मनस्तु साधिकारमाश्रयो वासनानां न ह्यवसिताधिकारे मनसि निराश्रया वासनाः स्थातुमुत्सहन्ते यदभिमुखीभूतं वस्तु यां वासनां व्यनक्ति तस्यास्तदलम्बनमेवं हेतुफलाश्रयालम्बनैरेतैः संगृहीताः सर्व्ववासनाः एषामभावे तल्लंश्रयाणामपि वासनानामभावः

शरीरः तस्मादहंकारिकत्वाच्चैतसः अहंकारस्य च गगनमण्डलवत्सर्वलोकव्याप्तित्वादिमूलं मनसः ॥ १० ॥

एवञ्चेदस्य इत्तिरपि विभ्वीति सर्व्वज्ञतापत्तिरित्यतउक्तं। इत्तिरेवास्येति स्यादेतत् चित्तमाचाधीनायाइत्तेः सङ्कोचविकाशौ कुतः कादाचित्कावित्यत आह। तच्च चित्तं धर्म्माद्यपेक्षं इत्ती निमित्तं विभजते। निमित्तचेति धर्म्मादिग्रहणेनेन्द्रियधनादयो गृह्यन्ते शरीरादीत्यत्रापि वीर्य्यमृत्यादयो गृह्यन्ते चान्तरत्वे सम्भवतिमाचार्य्यश्चासाह। तथाचोक्तं विहारोव्यापारः प्रकृत यत्नं तयोर्वाह्याभ्यन्तरयोर्मध्ये ज्ञानवैराग्ये तत्प्रतिबन्धकं केन वाप्रसाध्येन धर्म्मेणातिशय्येते अभिभूयेते ज्ञानवैराग्य

नास्तासतः सम्भवो न चास्ति सतो विनाश इति द्रव्यत्वेन सम्भवत्यः कथं निवर्त्तिष्यन्ते वासनाइति ॥ ११ ॥

अतीतानागतं स्वरूपतोऽस्त्यध्वभेदात् धर्म्माणाम् ॥ १२ ॥

भविष्यत् व्यक्तिकमनागतम् अनुभूतव्यक्तिकमतीतं स्वव्यापारोपारूढं वर्त्तमानं त्रयञ्च तद्दस्तु ज्ञानस्य ज्ञेयं यदि चैतत्स्वरूपतो नाभविष्यन्नेदं निर्विषयं ज्ञानमुत्पत्स्येत तस्मादतीतानागतं स्वरूपतोस्तीति किञ्च भोगभागीयस्य वाऽपवर्गभागीयस्य वा कर्म्मणः फलमुत्पित्सुः यदि निरूपाख्यमिति तदुद्देशेन तेन निमित्तेन कुशलानुष्ठानं न युज्येत सतश्च फलस्य निमित्तं वर्त्तमानीकरणे समर्थं नापूर्व्वोपजनने सिद्धं निमित्तं नैमित्तिकस्य विशेषानुग्रहणं कुरुते नापूर्व्वमुत्पादयति। धर्म्मीचानेकधर्म्मस्वभावस्तस्य चाध्वभेदेन धर्म्माः प्रत्यवस्थिताः न च यथा

भावेव धर्म्मौ तमभिभवतः बीजभावादपनयत इत्यर्थः अत्रैव सूत्रमिदमुदाहरणमाह। इत्यकारक्षेति ॥ ११ ॥

अथैतावित्तद्वृत्तयोवासनाश्च अनादयश्चेत् कथमासामुच्छेदो न स्यात् चितिशक्तिरनादिरुच्छिद्यते इत्यत आह। हेतुफलाभावः। अनादेरपि समुच्छेददृष्टः तद्यथा अनागतस्येषि सव्यभिचारत्वादसाधनं चितिशक्तिमु विनाकारणाभावात् न विनश्यति मलवादित्वात् उक्तञ्च वासनानामनादीनामपि

वर्त्तमानं व्यक्तिविशेषापन्नं द्रव्यतोऽस्त्येवमतीतमनागतञ्च कथं तर्हि स्वेनैव व्यङ्गेन स्वरूपेणागतमस्ति स्वेन चानुभूतव्यक्तिकेन स्वरूपेणातीतमिति वर्त्तमानस्यैवाध्वनः स्वरूप व्यक्तिरिति न सा भवत्यतीतानागतयोरध्वनोरेकस्य चाध्वनः समयेद्यावध्वानो धर्म्मिसमन्वागतो भवत एवेति नाभूत्वाभावास्त्रयाणामध्वनामिति ॥ १२ ॥

ते व्यक्तसूक्ष्मागुणात्मानः ॥ १३ ॥

ते खल्वमीत्राध्वानो धर्म्मा वर्त्तमाना व्यक्तात्मानोऽतीतानागताः सूक्ष्मात्मानः प्रकृतिविशेषरूपाः सर्व्वमिदं गुणानां सन्निवेशविशेषमात्रमिति परमार्थतो गुणात्मनः तथाच "शास्त्रानुशासनं गुणानां परमं रूपं न दृष्टिपथमृच्छति ।

समुच्छेदे कारणं सूचयति अनुग्रहोपघातावपि धर्म्माधर्म्मादिनिमित्तमुपलक्षयतः तेन सुरापानादयोपि संगृहीता भवति नेत्री नायिका अत्रैव हेतुमाह मूलमिति प्रत्युत्पन्नता वर्त्तमानता तु धर्म्मस्वरूपोत्पादः अत्रैव हेतुर्नहीति यदभिमुखीभूतं वस्तु कामिनीसम्पर्कादिव्यापकाभावे व्याप्यस्याभाव इति सूचार्थः ॥ १२ ॥

उत्तरसूत्रमवतारयितुं ग्रहणे नास्तीति असत इति तु सम्पातायातं निदर्शनाय वा अतीतानागतधर्म्माणां नासतामुत्पादो न सतां विनाशः किन्तु सतामेव धर्म्माणामध्वभेदेनोदयव्ययाविति सूचार्थः अनुभूता प्राप्ता येन व्यक्तिः तथा सम्प्राप्तिव्यक्तिर्नासीति यावत् ततश्च कालेपि धर्म्मा सन्नित्याह । यदिचेति नञ्सत् ग्राह्यविषयः सञ्चतीति निरुपाख्यत्वात् विषयावभासं हि विज्ञानं नासति विषये भवति त्रैकाल्ये विषयश्च 'विज्ञानं' योगिनां तस्मादादीनाञ्च विज्ञानमसति विषये नोत्पन्नं

यत्तु दृष्टिपथं प्राप्तन्तन्मायेव सुतुच्छक" मिति। यदातु सर्व्वं गुणाः कात्स्न्येक: शब्दएकमिन्द्रियमिति ॥ १३ ॥

स्वात् उत्पद्यते च तस्मादतीतानागते सामान्यरूपेण समनुभवतेस्त इति एवमनुभवतीत्यर्थः। विषय सर्व्वं हेतुत्वं उद्देश्यत्वादप्यनागतस्य विषयत्वेन सत्वमेवेत्याह किंच भोगभागीयस्वेति कुशली निपुणः। अनुष्ठेयेपि च यद् यन्निमित्तं तत् सर्व्वं नैमित्तिके सत्वेव विशेषप्रमाणत्वं यथा काल्यस्वाध्यायदाव: नच्छलते काल्यत्वादयो इत्यन्तमुत्पादयन्ति सतएव तु तत्प्राप्तिविकारौ कुर्व्वन्ति एवं कुलालादयोपि सतएव घटस्य वर्त्तमान भाव हितवदुत्पाद सतर्वेति यदि तु वर्त्तमानत्वाभावादतीतानागतवयी रसत्वं इत्त भोः वर्त्तमानस्याप्यभावः अतीतानागतत्वाभावात् स्वार्थविशिष्टतया तु सत्वं यथाक्रमव्यविशिष्टं मित्यभिप्रायेणाह धर्म्मी चेति प्रत्येक मवस्थानं प्रत्यवस्थितिरिति। द्रव्यतइति द्रव्ये धर्म्मिणि सार्व्वैविभक्तिकस्तसिः यद्यतीतानागतावतीतानागते न स्तः तर्हि वर्त्तमान समये तत्वा भावात्रस्यातामित्यत आह। एकस्य चेति प्रकृतमुपसंहरति नाभूत्वाभावइति स्वादेतत् नानाप्रकारो धर्म्मधर्म्मि अवस्था परिणामरूपो विश्वभेद प्रपञ्चोन प्रधानादेः कस्मात् भवितुमर्हति नत्वविलक्षणात् कारणात् कार्य्यभेद स्वभाव इत्यत आह। तेन ते अध्वानो धर्म्मा व्यक्तास्य सूक्ष्मास्य गुणात्मानो न चैगुण्यातिरिक्तमेषामस्ति कारणं "हेचिवलु तदा हिताऽनादिता क्लेशवासनानुगता हेचिवात्। यथोक्तं वायुपुराणे वैश्वरूप्यात् प्रधानस्य परिणामीयमङ्गत इति व्यक्तानां पृथिव्यादीनामेकादशेन्द्रियाणाच वर्त्तमानानामतीतानागतत्वं षड्विशेषा यथायोगं भवन्ति। सम्प्रति विश्वस्य नित्यानित्यरूपे विभजन् नित्यरूपमाह सर्व्वमिदमिति दृश्यमानं सन्निवेशसंस्थानभेदवान् हरिधाम इत्यर्थः। अत एव षष्ठीतत्पुरुष श्रास्त्रस्यानुश्रुतिः। मायेव तु न मायासु

परिणामैकत्वात् वस्तुतत्वम् ॥ १४ ॥

प्रख्याक्रियास्थितिशीलानां गुणानां ग्रहणात्मकानां करणभावेनैकः परिणामः श्रोत्रमिन्द्रियं ग्राह्यात्मकानां शब्दभावेनैकः परिणामः शब्दोविषय इति ।

शब्दादीनां मूर्त्तिसमानजातीयानामेकः परिणामः पृथिवी परमाणुस्तन्मात्रावयवस्तेषाञ्चैकः परिणामः पृथिवी

तुच्छं विनाऽपि यथाहि मायाकार्य्यंवान्यथा भवति एवं विकारा धर्म्याविर्भाव तिरोभाव धर्म्याश्च:प्रतिक्षणमन्यथा प्रकृति नित्यतया मायाविधर्म्मैव परार्थेति ॥ १३॥

भवतु नैगुण्यस्यैत्यं परिणामवैचित्र्यं एकस्तु परिणामः पृथिवीयमिति वातीयमिति वा कुतः चात्मन एकत्व विरोधादित्याशङ्क्य सूत्रमवतारयति । यदातु सर्व्वे गुणा इति परिणामत्वं बहूनामप्यैक्यं परिणामोदृष्टः तद्यथा गवाश्वमहिष मातङ्गानां दमनिचित्तानामेकी लक्षणजातीयलक्षणः परिणामः वर्त्तितैलानलानाञ्च प्रदीप इति। एवं बहुत्वेपि गुणानां परिणामैकत्वं ततस्तत्स्वभावभूत भौतिकानां प्रत्येकं तत्त्वमेकत्वं ग्रहणात्मकानां सत्वप्रधानतया प्रकाशात्मनामहङ्कारान्तर कार्य्याणां करणभावेनैकः परिणामः श्रोत्रमिन्द्रियं तेषामेव गुणानां तमः प्रधानतया जड़त्वेन ग्राह्यात्मकानां शब्दतन्मात्र भावेनैकः परिणामः शब्दोविषयः शब्द इति शब्दतान्मात्रं विषय इति जड़त्वमाह न तु तन्मात्रस्य श्रोत्र विषयत्व सम्भव इति श्रेयं सुगमं अथ विज्ञानवादिन वैनाशिकमुत्थापयति सांख्यैर्यो विज्ञानविसदृचर इति यदिहि भूतभौतिकानि विज्ञानमात्राद्विज्ञानि भवेयुस्ततस्तदुत्पत्ति कारणमीदृशं प्रधानं कल्पित न तु तानि विज्ञानातिरिक्तानि सन्ति परमार्थतः

गौर्वृक्षः पर्व्वतइत्येवमादिः भूतान्तरेष्वपि स्नेहौष्ण्य प्रणामित्वावकाशदानान्युपादाय सामान्यमेकविकारारम्भः समाधेयः नास्त्यर्थोविज्ञानविसहचरेणास्ति तु ज्ञानमर्थविसहचरं स्वप्नादौ कल्पितमित्यनया दिशा ये वस्तुस्वरूपमपक्षवस्ते-

सत्स्वार्थं प्रधानकल्पनं कथञ्च यद्देवादीनामिन्द्रियाणामहङ्कारः विकारार्थं कल्पनेति तथाहि जडस्यार्थस्य स्वयमप्रकाशत्वान्नास्त्यर्थो विज्ञानविसहचरसाहचर्यं सम्बन्धः तदभावो विसहचरः भावार्थः विज्ञानासम्बन्धी नास्तीति व्यवहारयोग्य इत्यर्थः अस्ति तु ज्ञानमर्थविसहचरं तस्य स्वयं प्रकाशत्वे न स्वीचकारास्तिता व्यवहारे कर्त्तव्ये जड़मर्थं प्रत्यपेक्षाभावात् तदनेन वेद्यत्व सहोपलम्भनियमौ सूचितौ विज्ञानवादिना तौ चैवं प्रयोगमारोहतः यद्धियते येन वेदनेन तत्ततो न भिद्यते यथा ज्ञानस्यात्मा वेद्यत्वे च भूतभौतिकानीति विरुद्धव्याप्तोपलब्धिः निषिद्ध भेदविरुद्धेनाभेदेन व्याप्तं वेद्यत्वं दृश्यमानं स्वव्यापकभेदमुपस्थापयितुं विरुद्धं भेदं प्रतिक्षिपतीति। तथा यद् येन नियतसहोपलम्भं तत्ततोन भिद्यते यथैकज्ञानाच्चन्द्रादद्वितीय चन्द्रः नियत सहोपलम्भयोश्च ज्ञाननेति व्यापकविरुद्धोपलब्धिः निषेध्यभेदव्यापकानियमविरुद्धा नियमोऽनियमं निवर्त्तयं तद्व्याप्तं भेदं प्रतिक्षिपतीति स्यादेतदर्थस्य ब्रुवन्नी ज्ञानात् कथं भिन्नवत् प्रतिभासत इत्यत आह। कल्पितमिति यथाहुः वैनाशिकाः 'सहोपलम्भनियमादभेदो नीलतद्धियोः। भेदश्च भ्रान्ति विज्ञानैर्दृश्यस्य ग्राह्यादिवद्वये इति कल्पितत्वं विशदयति ज्ञानपरिकल्पनेति निराकरोति ते इति ते कुत्सं ग्रन्थं वचनाः स्युरिति सम्बन्धः प्रतिज्ञानमुपस्थितं प्रत्युपस्थितं कथं तथेति यथा यथावभासते इदं कारोल्लेखेन तथा तथा स्वयमुपस्थितं न तु कल्पनोपस्थापितं विज्ञानविषयतापन्नं स्वसाहात्म्येनेति कारत्वं विज्ञानं प्रत्यर्थस्य दर्शयति यस्मादर्थेन स्वकीयया ग्राह्याकारा विज्ञानमजनितं तस्मादर्थस्य ग्राहकं तदेवं

ज्ञानपरिकल्पनामात्रं वस्तु खपुष्पविषयोपमं न परमार्थतः अस्तीति ये ब्रुवते ते तथेति प्रत्युपस्थितमिदं खमाहात्म्येन वस्तु कथं अप्रमाणात्मकेन विकल्पज्ञानबलेन वस्तुस्वरूपमुत्सृज्य तदेवापलपन्तः अश्रद्धेयवचनाः स्युः ॥ १४ ॥

भूतं वस्तु कथ मप्रमाणात्मकेन विकल्पविज्ञानबलेन विकल्पस्याप्रामाणिकत्वात् तद्बलस्यापि तदात्मनो प्रमाणात्मकत्वं येन वस्तुस्वरूपमुत्सृज्योपपुतं कृत्वा उपगच्छेति क्वचित् पाठः तत्रापि स एवार्थः तदेवापलपन्तः अश्रद्धातव्यवचनाः स्युः इदमवाकूतं सद्दीपलब्धनियमस्य हेतुत्वे सन्दिग्धव्यतिरेकतया नैकान्तिकी । तथाहि ज्ञानाकारस्य भूतभौतिकादेर्यदेतत् बाह्यत्वं स्थूलत्वं च भासते न तत् ज्ञाने सम्भवतः तथाहि नानादेशव्यापिता स्थौल्यं विच्छिन्नदेशता च बाह्यत्वं नचैकविज्ञानस्य नानादेशव्यापिता विच्छिन्नदेशताचोपपद्यते तद्देशत्वात्तद्देशत्वविरुद्धधर्मसंसर्गस्यैकत्वासम्भवात् असम्भवे वा त्रैलोक्यस्यैकत्वप्रसङ्गात् । अतएवास्तु विज्ञानभेद इति चेत् हन्त भो परमसूक्ष्मगोचराणां प्रत्ययानां परस्परवार्त्तानभिज्ञानां स्थूलगोचरमात्र लाभकृतानां कुतस्त्योयं स्थूलावभासः न च विकल्पगोचरोभिलापः संसर्गाभावात् विशदप्रतिभासत्वाच्च न च स्थूलमालोचितं यतः तदुपाधिकस्य विशदता भवेत् तत्पृष्ठ सविकल्पस्य भाविनः न चाविकल्पवत् विकल्पोऽपि स्वाकारमात्रगोचरः तस्य चास्थूलत्वात् न स्थूलगोचरो भवितु मर्हति तस्मादाद्ये च प्रत्यये स्थूलस्य बाह्यस्य चासम्भवादलीकमेतदाख्यातव्यं नचालीकं विज्ञानादभिन्नं विज्ञानस्य तद्वत् तुच्छत्वप्रसङ्गात् तथाच ग्राह्यत्वस्याभेदव्याप्यत्वाभावात् कुतो भेदप्रतिपत्तत्वं सद्दीपलब्धनियमस्य सदसतोरिव विज्ञानस्थौल्ययोः सतीरपि स्वभावाद्वा कुतश्चित् प्रतिबन्धाद्दीपपत्स्यते तस्मादनैकान्तिकत्वाद्धेतोः हेत्वाभासो विकल्पमात्रस्यैव बाह्याभावे प्रसुवाते न च प्रत्यक्षमाहात्म्यं विकल्पमात्रे चापीष्यते तस्मात् सा-

कुतश्चैतदन्याय्यम् ?—

वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तिः पन्थाः ॥१५॥

बहुचित्तावलम्बनीभूतमेकं वस्तु साधारणं तत् खलु नैकचित्तपरिकल्पितं नाप्यनेकचित्तपरिकल्पं किन्तु स्वप्रतिष्ठितं कथं वस्तुसाम्ये चित्तभेदात् धर्मापेक्षं चित्तस्य वस्तुसाम्येपि सुखज्ञानं भवत्यधर्मापेक्षं ततएव दुःखज्ञानं अविद्यापेक्षं ततएव मूढज्ञानं सम्यग्दर्शनापेक्षं ततएव माध्यस्थज्ञानमिति कस्य तच्चित्तेन परिकल्पितं नचान्यचित्तपरिकल्पितेनार्थेनान्यस्य चित्तोपरागोयुक्तः तस्मादुभयज्ञानयोराह्यग्रहणभेदभिन्नयोर्विभक्तः पन्था नानयोः सङ्करगन्धोप्यस्तीति साङ्ख्यपक्षे पुनर्वस्तु त्रिगुणं चलञ्च गुणवृत्तमिति

धूर्कं कथनप्रमाणात्मकेन विकल्पज्ञानवर्तनेति एतेन श्रुत्ययमपि स्वप्नादिप्रत्ययदृष्टान्तेन निरालम्बनत्वसाधनमपास्तं प्रमेयविकल्पस्वलक्षयविध्यवस्थापनेन प्रत्युक्तः विस्तरस्तु न्यायकणिकायां मनुसंरणीय इति तदिह कृतं विस्तरेणेति ॥ १४ ॥

तदेवमुत्सूत्रं भाष्यकृद्विज्ञानातिरिक्तस्थापने युक्तिमुत्कासीचिं युक्तिमवतारयति कुतश्चैतदिति । वस्तु— पन्थाः॥ यज्ञानालं यस्यैकत्वं तत्तस्यैव भिद्यते यथा चैकस्य ज्ञानमेकं भिन्नेभ्यो देवदत्तविष्णुमित्रैकप्रत्ययेभ्यो भिद्यते ज्ञान नानात्वेऽपि चार्थो न भिद्यते इति भवति विज्ञानेभ्योन्यः अभेदश्चार्थस्य ज्ञानभेदेऽपि प्रमातृणां परस्परप्रतिसन्धानादवसीयते अस्ति हि रक्तद्विष्टविमूढमध्यस्थानामेकस्यां योषिति प्रतीयमानायां प्रतिसन्धानं या त्वया दृश्यते सैवमयापीति । तस्माद्वस्तुसाम्ये चित्तभेदात् ज्ञानभेदात्तयोरर्थज्ञानयोर्विभक्तः पन्थाः स्वरूपभेदोपायः सुखज्ञानं कान्तायां कान्तस्य सपत्नीनां दुःखज्ञानं विषादः । स्यादेतत् यत्र कस्य चित्तेन परिकल्पितः

धर्मादिनिमित्तापेक्षं चित्तैरभिसम्बध्यते निमित्तानुरूपस्य च प्रत्ययस्योत्पद्यमानस्य तेन तेनात्मना हेतुर्भवति केचिदाहुर्ज्ञानसहभूरेवार्थोभोग्यत्वात् सुखादिवदिति तत्र तयाद्वारा साधारणत्वं धावमानाः पूर्वोत्तरेषु क्षणेषु वस्तुरूपमेवापह्नवते ॥ १५ ॥

नचैकचित्ततन्त्रं वस्तुपद्प्रमाणकं तदा किं स्यात् ॥ १६ ॥

एकचित्ततन्त्रं चेद्वस्तु स्यात्तदाचित्तेव्यये निरुद्धे वा स्वरूपमेव तेनापराद्धष्ट मन्यस्या विषयीभूतमप्रमाणकमगृहीत स्वभावकं केनचित्तदानीं किं तत्स्यात् ।

सम्बध्यमानं वा पुनश्चित्तेन कुत उत्पद्येत येचास्यानुपस्थिताभागास्तेचास्य नस्युरेवं नास्ति पृथगित्युदरमपि न

कामिनी क्षणीयैः तेनैवान्येषामपि चित्तमुपरज्यते इति साधारणमुपपद्यते इत्यत आह । नचान्येति तथा सत्येकस्मिन्नीलज्ञानवति सर्व्वएव नीलज्ञानवन्तः स्युरिति नन्वर्थवादिनामप्यैक्यार्थः कथं सुखादिभेदाभिन्नविज्ञानहेतुर्नह्यविलक्षणात् कारणात् कार्य्यभेदोयुक्त इत्यत आह । सांख्यपक्ष इति एकस्यैव बाह्यस्य वस्तुनस्त्रैगुण्यपरिणामस्य वैरूप्यमुपपन्नम् ॥ १५ ॥

एवमपि सर्व्वेषांसविशेषेण सुखदुःखमोहात्मकं विज्ञानं स्यादित्यत आह । धर्मादिनिमित्तापेक्षं रजःसहितं सत्वं धर्मापेक्षं सुखज्ञानं जनयति। सत्वमेव तु विगतरजस्कं विद्यापेक्षं माध्यस्थ्यज्ञानमिति नैव धर्मादयो न सर्व्वे सर्व्वत्र पुरुषे सन्ति कन्तु कस्मिंत् कस्मिंदिति अभ्युपपन्ना व्यवस्थेति अत्र केचिदाहुः प्रवादुकाः ज्ञानसह भूरेवार्थो भोग्यत्वात् सुखादिवदिति एतदुक्तं भवति भवत्वर्थोज्ञानात् व्यतिरिक्तः

दृष्टे॥ तस्मात् स्वतन्त्रोर्थः सर्वपुरुषसाधारणः स्वतन्त्राणि च चित्तानि प्रतिपुरुषं प्रवर्त्तन्ते तयोः सम्बन्धादुपलब्धिः पुरुषस्य भोग इति ॥ १६ ॥

तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् ॥१७॥

अयस्कान्तमणिकल्पाविषयाः। अयः सधर्मकं चित्तमभि-

तथाप्यसौ जडत्वात् न ज्ञानमन्तरेण शक्यःप्रतिपत्तुं ज्ञानेन तु भासनीयःतथाच ज्ञान समयएवास्ति नान्यदा प्रमाणाभावादिति तदेतदुरसूत्रं तावत् दूषयति भाष्यकारः तत्र यथाहारेति वस्तुखलुसर्व्वचित्त साधारणमनेकक्षणपरं परीक्ष्यमाणं परिणामात्मक मनुभूयते लोकिकपरीक्षकैः तत्रेदिज्ञानेन सह भवेत् नूनमेवं विधमेवंचेदिमं ग्रस्यीपरिकीयमनुरोधं येन सोपि नापह्नूयेतेत्यर्थः मा वा भूदिदमंग्रस्यापह्नवीज्ञान सहभूरेवास्त्वर्थः तत्राप्याह । नचैकं किं स्यात् यद्वि घटाद्दि चित्तं तद् यदा पट द्रव्यव्ययतया न घटेवर्त्तते यद्वा विवेकविषयमासीत् तदेव च निरोधं समापद्यते तदाघटज्ञानस्य वा विवेक ज्ञानभेद मात्र जीवन सन्नाज्ञानष्ट एव स्यादित्याह एक चित्तेति किं तत्स्यात् नस्यादित्यर्थः। संबध्यमानञ्च चित्तेन तद् वस्तुविवेकीवा घटो वा कृत उत्पद्यते नियत कारणान्वय व्यतिरेकानु विधायि भावानि हि कार्याणि न स्वकारण मतिवर्त्त कारणान्तरान्वितुमीशते माभूदकारणत्वे तेषां कादाचित्-कत्वव्याघातः न च तत् ज्ञानकारणत्वमेव तत्कारणत्वमिति युक्तम् । आगामीदकस्य उपाक्तितमोदकस्य वीपयुज्यमानस्य रसवीर्य्य विपाकादि साम्य प्रसङ्गात् तस्मात् साधूक्तं सम्बध्यमानं वा पुनश्चित्तेनेति अपिच योयोऽर्वाग्भागः स सर्व्वोमिथ्यपरभाग व्याप्तः ज्ञानाधीने खल्वेवंस्वस्याननुभूयमानत्वान्मिथ्यपरभागो न स इति व्यापकाभावा-दर्वाग्भागोपि न स्यात् इत्यर्थाभावात् कृती ज्ञानसहभूरर्थ इत्याह। येचास्येति अनुपस्थिता अज्ञाताः उपसंहरति तस्मादिति सुगमं शेषं ॥ १६ ॥

सम्बध्योपरं जयन्ति येन च विषयेणोपरक्तं चित्तं स विषयोज्ञातस्ततोन्यः पुनरज्ञातोवस्तु नोज्ञाताज्ञातस्वरूपत्वात् परिणामि चित्तं यस्य तु तदेव चित्तं विषयस्तस्य ॥१७॥

सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात् ॥ १८ ॥

यदि चित्तवत् प्रभुरपि पुरुषः परिणमेत ततस्तद्विषया चित्तवृत्तयः शब्दादिविषयवत् ज्ञाताज्ञाताः स्युः सदा

स्यादेतत् अर्थवत् स्वतन्त्रः सच जड़स्वभाव इति न कदाचित् प्रकाशते प्रकाशमे वा जड़त्वमप्यस्यापगत मितिभावीप्यपगच्छेत् न जातु स्वभावमपहाय भावीवस्तुं महति न चेन्द्रियाद्याधेयो जड़स्वभावस्यार्थस्य धर्मीप्रकाश इति साम्प्रतं अर्थधर्मत्वे नीलत्वादिवत् सर्व्व पुरुषसाधारण इत्येकःशास्त्रार्थश्च इति सर्व्व एव विद्वांसः प्रसज्येरन् न चात्मःकश्चिदस्ति न चातीवानागतयोः धर्म्म प्रत्युत्पन्नयुक्तः तस्मात् स्वतन्त्रोर्थः उपलभ्य विषय इति मनोरथमात्रमेतदित्यत आह ।

तदु—ज्ञातं । जड़स्वभावोप्यर्थ इन्द्रिय प्रणाड़िकया चित्तमुपरञ्जयति तदेवं भूतं चित्तदर्पणमुपसंक्रान्तप्रतिबिम्बाचिति शक्तिश्चित्तमर्थोपरक्तं चैतयमानार्थमनुभवति तत्रार्थे किञ्चित् प्राक्दिकमाधत्ते नाप्यसंवेदा चित्तेन तत्प्रतिबिम्बसंक्रान्तेः कृतत्वादिति यद्यपि च सर्व्वगतत्वाच्चित्तस्य चेन्द्रियस्य चाहङ्कारिकस्य विषये नास्तिसम्बन्धः तथापि यत्र शरीरे वृत्तिमच्चित्तं तेन सह सम्बन्धी विषयाणामित्ययत्नात्मणिकल्पा इत्युक्तम् अयः सधर्मकं चित्तमिति । इन्द्रियप्रणालिकयाभिसंबध्यो परं जयन्ति अतएव चित्तं परिणामीत्याह वस्तु न इति ॥ १७ ॥

तदेवं चित्तव्यतिरेकेणमर्थमवस्थाप्य तेभ्यः परिणतिधर्मकेभ्यो व्यतिरिक्त-

ज्ञातत्वन्तु मनसस्तत्प्रभोः पुरुषस्यापरिणामित्वमनुमापयति ॥ १८ ॥

स्यादाशङ्काचित्तमेव स्वाभासं विषयाभासञ्च वैशेषिकानां चित्तात्मवादिनाञ्च भविष्यत्यग्निवत्

न तत्स्वाभासं दृश्यत्वात् ॥ १९ ॥

यथेतराणीन्द्रियाणि शब्दादयश्च दृश्यत्वान्न स्वाभासानि तथा मनोपि प्रत्येतव्यं। न चाग्निरत्र दृष्टान्तं नह्यग्निरात्मस्वरूपमप्रकाशं प्रकाशयति। प्रकाशश्चायं प्रकाश्यमात्मानमादर्शयितुं तद्धर्ममपरिणामित्वमस्य वक्तुं पूरयित्वा सूत्रं पठति यस्य तु तदेव चित्तं विषयश्चस्य सदाऽपरिणामीत्वात्। चित्तमूढविक्षिप्तैकाग्रतावस्थितं चित्तमानिरोधात् सर्वदा पुरुषेणानुभूयते दृश्यत्वात् तत् कस्य हेतोः यतः पुरुषोऽपरिणामी परिणामित्वे चित्तवत् पुरुषोपि ज्ञाताज्ञातविषयी भवेत्। ज्ञातविषय एव त्वयं तस्मादपरिणामी ततश्च परिणामिभ्योतिरिच्यते इति तदेतदाह।

यदि चित्तवदिति। सदाज्ञातत्वं तु मनसः संवृत्तिकस्य तस्य यः प्रभुः स्वामीभोक्तेति यावत् तस्य प्रभोः पुरुषस्यापरिणामित्वमनुमापयति तथाचापरिणामित्वस्य परिणामिनश्चित्तात् पुरुषस्य भेद इति भावः। अत्र वैनाशिकमुत्थापयति स्यादाशङ्केति अयमर्थः स्यादेतदेवं यदि चित्तमात्मनो विषयः स्यात् अपि तु स्वप्रकाशने तत् विषयाभासं पूर्वचित्तं प्रतीत्य समुत्पन्नं तत्कृतः पुरुषस्य सदाज्ञातविषयत्वं कुतस्त्यो वाऽपरिणामितया परिणामिनश्चित्ताद्भेद इति ॥ १८ ॥

न—तत्वात् भवेदेतदेवं यदि स्वसंवेदनं चित्तं स्यान्नत्वेतदस्ति तद्धि परिणामितया नीलादिवदनुभवव्याप्यं यच्चानुभवव्याप्यं न तत्स्वाभासं भवितुमर्हति स्वात्मनिक्रियाविरोधात् नहि तदेव क्रियाच कर्मच कारकञ्च न हि पाकः पच्यते छिदा वा छिद्यते

प्रकाशक संयोगेदृष्टः न च स्वरूपमात्रेस्ति संयोगः किंच स्वाभासं चित्तमित्ययाह्यमेव कस्यचिदिति। शब्दार्थः तद्यथा स्वात्मप्रतिष्ठमाकाशं दृश्यप्रतिष्ठमित्यर्थः स्वबुद्धि प्रचारप्रतिसंवेदनात् सत्वानां प्रवृत्तिर्दृश्यते। क्रुद्धोहमीतोहममुत्र मे रागोमुत्र मे क्रोध इत्येतत् स्वबुद्धेरग्रहणेन युक्तमिति ॥ १९ ॥

एकसमये च भयानवधारणम् ॥ २० ॥

न चैकस्मिन् क्षणे स्वपररूपावधारणं युक्तं क्षणिक-

पुरुषस्वपरिणामिनानुभवकर्मेति नास्मिन् स्वयं प्रकाशता न युज्यते अपराधीन-प्रकाशता ह्यस्य स्वयं प्रकाशता नानुभवकर्मता तस्मात् दृश्यत्वात् दर्शनकर्मचित्तं न स्वाभासं आत्मप्रकाशप्रतिबिम्बितस्यैव चित्तस्य तावद्वृत्तिविषयाः प्रकाशन्त इति भावः। ननु दृश्योग्नि स्वयं प्रकाशश्च न हि यथा घटादयोग्निना व्यज्यन्ते एवमग्निरप्यान्तरेणेत्यत आह। नचाग्निरचेति तस्मात् न ह्यचेति मानामाग्निरप्यान्तरात् प्रकाशिष्टविज्ञानात् तु प्रकाशत इति न स्वयं प्रकाशत इति न व्यभिचार इत्यर्थः प्रकाशाद्यवच्छिन्नसि क्रियारूपः प्रकाश इति यावत् एतदुक्तं भवति या या क्रिया सा सा सर्व्वा कर्तृकरणकर्मसम्बन्धेन दृष्टा यथा पाको दृष्टश्चाग्नितण्डुलसम्बन्धेन तथा प्रकाशोपि क्रियेति तथापि तथा भवितव्यं सम्बन्धश्च भेदाश्रयी नाभेदे सम्भवति इत्यर्थः किंच स्वाभासं चित्तमित्ययाह्यमेव कस्यचिदिति शब्दार्थः। स्यादेतत् माभूत् याह्यं चित्तं न हि ग्रहणस्य कारणस्या व्यापकस्य च निवृत्तौ चित्तनिवृत्तिरित्यत आह। स्वबुद्धीति बुद्धिश्चित्तं प्रचारा व्यापाराः सत्वा प्राणिनश्चित्तस्य वृत्तिभेदाः क्रोधलोभाद्याः स्वाश्रयेण चित्तेन स्वविषयेण च सह प्रत्यात्ममनुभूयमानाश्चित्तस्याग्राह्यतां विघटयन्तीत्यर्थः स्वबुद्धिप्रचारप्रतिसंवेदनमेव विशदयति क्रुद्धोहमिति॥१९॥

वादिनो यद् भवनं सैव क्रिया तदेव च कारकमित्यभ्युपगमः ॥ २० ॥

चित्तान्तरे दृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृति सङ्करश्च ॥ २१ ॥

स्यान्मतिः स्वरसनिरुद्धं चित्तं चित्तान्तरेण समनन्तरेणगृह्यत इति।

एवं—रणं। स्वाभासं विषयाभासंचित्तमिति ब्रुवाणोनतावत् येनैव व्यापारेणात्मानमवधारयति तेनैव विषयमपीति वक्तुमर्हति नह्यविलक्षणो व्यापारः कार्यभेदाय पर्याप्तःतस्माद्व्यापारभेदोऽङ्गीकर्त्तव्यःनच वैनाशिकानामुत्पत्तिभेदातिरिक्तः अस्ति व्यापारःनचैकस्यावचीत्यर्त्तं रविलक्षणायाः क्रार्य्यवैलक्षण्यसम्भवःतस्मात्क्षणिकत्वप्रसङ्गात् नचैकस्योत्पत्तिक्षयसम्भवः तस्मादर्थस्य च ज्ञानरूपस्य चावधारणं नैकस्मिन् समये इति तदेतद्वार्थीणीच्यते नचैकस्मिन् क्षणे इति तथाचोक्तं वैनाशिकैः "भूतियैषा क्रिया सैवकारकं सैवचोच्यते" इति तस्माद्दृश्यत्वमेतच्चित्तस्य सदातनं स्वाभासत्वमुपनयत् द्रष्टारञ्च द्रष्टुरपरिणामित्वञ्च दर्शयतीति सिद्धं ॥ २० ॥

पुनर्वैनाशिकमुत्थापयति। स्यान्मतिः मामूत् दृश्यत्वेन स्वसंवेदनं एवमप्यात्मा न सिध्यति। स्वसन्तानवर्त्तिना चरमचित्तक्षणे स्वरसनिरुद्धस्वजनकचित्तक्षणग्रहणादित्यर्थ समञ्च तत्ज्ञानत्वेनानन्तरत्वाव्यवहितत्वेन मसनन्तरं तेन। चि—त्य। बुद्धिरिति चित्तमित्यर्थः नाग्रहीता चरमाबुद्धिः पूर्व्वबुद्धिग्रहणसमर्था क्षनबुद्धबुद्धासंवेद्या पूर्व्वा बुद्धिबुद्धाभावात् मर्हति। नह्यगृहीतदक्षी दक्षिन मवगन्तुमर्हति तस्मादनवस्थेति विज्ञानवेदना संज्ञारूप संस्कारा: स्वसा: साङ्गा-

अथ चित्तं चेच्चित्तान्तरेण गृह्येत बुद्धिः केन गृह्यते साप्यन्यया साप्यन्ययेत्यतिप्रसङ्गःस्मृतिसङ्करश्च यावन्तीबुद्धि-बुद्धीनामनुभवास्तावन्त्यः स्मृतयः प्राप्नुवन्ति तत्सङ्कराच्चैक स्मृत्यनवधारणञ्चस्यादित्येवं बुद्धिप्रतिसंवेदिनं पुरुषमप-लपद्भिः वैनाशिकैः सर्व्वमेवाकुलीकृतं ते तु भोक्तृस्वरूपं यत्र क्वचन कल्पयतोनन्यायेन संगच्छन्ते। केचित् सव-मात्रमपि परिकल्पयन्ति सं सत्वो यएतान् पञ्चस्कन्धा-न्निक्षिप्यान्यांश्च प्रतिसन्दधातीत्युक्त्वा ततएव पुनस्त्यन्ति तथास्कन्धानां महन्निर्वेदाय विरागायानुत्पादाय प्रशान्तये गुरोरन्तिके ब्रह्मचर्य्यं चरिष्यामीत्युक्त्वा सत्यस्य पुनः सत्व-मेवापद्यते साङ्ख्ययोगादयस्तु प्रवादाः स्वयन्देन पुरुष-मेव स्वामिनं चित्तस्य भोक्तारमुपयन्तीति ॥ २१ ॥

योगादयः प्रवादाः साङ्ख्य योगाश्च तएवादयो येषां वैशेषिकादिप्रवादानान्ते साङ्ख्ययोगादयः प्रवादाः सुगममन्यत् ॥ २१ ॥

स्यादेतत् यदिचित्तं नस्वाभासं नापिचित्तान्तरवेद्यं आत्मनापिकथं भीच्यते चित्तं न खल्वात्मनःस्वयं प्रकाशस्याप्यस्ति काचित् क्रिया न तामन्तरेण कर्त्ता न चासम्बन्धश्चित्तेन कर्मणा तस्य भोक्ता अतिप्रसङ्गादित्याशयवान् पृच्छति कथमिति। सूत्रे शी-षरमाह चि—नं। यत् तदवोचत् इतिसारूप्यमितरत्रेति तदितः समुल्लिखितचित्तेः स्वबुद्धिसंवेदनं बुद्धेस्तदाकारापत्तौ चिति प्रतिबिम्बाधारतया तद्रूपतापत्तौ सत्यां, यथाहि चन्द्रमसः क्रियामन्तरेणापि सङ्क्रान्तचन्द्रप्रतिबिम्बं ममलं जलमचलं चलमिव चन्द्रमसमवभासयति एवं विनापि चिति व्यापारं उपसंक्रान्तं चिति प्रतिबिम्बं चित्तं स्वगतया क्रियया क्रियावती मसङ्गतामपि सङ्गतां चिति-

कथं ?—

चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धि संवेदनम् ॥ २२ ॥

अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुपतति तस्याश्च प्राप्तचैतन्योपग्रहरूपाया बुद्धिवृत्तेरनुकारिमात्रतया बुद्धिस्वविशिष्टा हि ज्ञानवृत्तिराख्यायते तथाचोक्तं "न पातालं न च विवरं गिरीणां नैवान्धकारं कुचयो नोदधीनाम् गुहा यस्यां निहितं ब्रह्मशाश्वतं बुद्धिवृत्तिमविशिष्टं कवयो वेदयन्ते इति ॥ २२ ॥

अतश्चैतदभ्युपगम्यते—

द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थं ॥ २३ ॥

मनोहि मन्तव्येनार्थेनोपरक्तं तस्मृयच्च विषयत्वाद्विष-

शक्ति मवभासयत् भोग्यभाव मासादयत् भोक्तृभाव मापादयति तस्या इति सूत्रार्थः भाष्यमप्येतदर्थमसङ्कुचच तत्र व्याख्यातं इति न व्याख्यातमत्र बुद्धिस्वविशिष्टत्वे ज्ञानवृत्तेरागमुदाहरति । तथाचोक्तं न पातालमिति शाश्वतस्य शिवस्य ब्राह्मणो विष्णुश्च स्वभावस्य चितिच्छायापन्नां मनोवृत्तिमेव चितिच्छायापन्नत्वाच्चिते रत्र विशिष्टां गुहां वेदयन्ते तस्यामेव गुहायां तद् गुह्यं ब्रह्मतदपनयितुं स्वयं प्रकाश मनावरच मनुपसर्गं प्रद्योतते चरमदेहस्य भगवत इति तदेवं दृश्यत्वेन चित्तस्य परिणामिन स्तदतिरिक्तः पुमान् परिणमति धर्मोपपादितः । संप्रति स्वीकृतत्वचमप्यु

यिण पुरुषेणात्मीयया हृत्याभिसम्बन्धं तदेतच्चित्तमेव द्रष्टृ-दृश्योपरक्तं विषयविषयिनिर्भासं चेतनाचेतनस्वरूपापन्नं विषयात्मकमप्यविषयात्मकमिवाचेतनं चेतनमिव स्फटिक-मणिकल्पं सर्व्वार्थमित्युच्यते। तदनेन चित्तसारूप्येण भ्रान्ताः केचित्तदेव चेतन मित्याहुः अपरे चित्तमात्रमेवेदं सर्व्वं नास्ति। खल्वयं गवादि घटादिश्च सकारणो लोक इति अनुकम्पनीयास्ते कस्मात् अस्ति हि तेषां भ्रान्तिबीजं सर्व्वरूपाकार निर्भासं चित्तमिति समाधिप्रज्ञायां प्रज्ञे-

प्रमाणयति। अतश्चैतदिति अवश्यं चेतदित्यर्थः। द्रष्टृ—र्थं। यथाहि नीलाद्यनुरक्तं चित्तं नीलाद्यर्थं प्रत्यचेणैवावस्थापयति एवं द्रष्टृच्छायापत्त्यातदनुरक्तंचित्तं द्रष्टारमपि प्रत्यचेणावस्थापयति अस्तिहि ज्ञाकारं ज्ञानं नीलमहं सम्प्रत्येमि इति तस्मात् यथा ज्ञातापि प्रत्यचसिद्धोपि न विचिचावस्थापितौ यथा जले चन्द्रमसो बिम्बं नत्वे तावता तदप्रत्यचं न चास्य जलगतत्वे तद् प्रमाणमिति चन्द्ररूपेण्य प्रमाणं भवितुमर्हति तस्माच्चित्ते प्रतिबिम्बित तयाचैतन्यगोचरापि चित्तवृत्तिर्न चैतन्यागोचरेति तदिदं सर्व्वार्थत्वं चित्तस्येति तदेतदाह मनोहीति न केवल तदाकारापत्त्या ज्ञत्वे नार्थेनोपरक्तं मनः अपितु स्वयं चेतिचक्रारो भिन्नक्रमः पुरुषेचेत्यस्यानन्तरं द्रष्टव्यः तच्छायापत्तिः पुरुषस्य हृत्तिः दृश्यश्च चैतन्यच्छायापत्तिश्चित्तस्य वैनाशिकैः रभ्युपेतव्या कथमन्यथाचित्तं चैतन्यमिते आदीपयाम्बभूवु रित्याह तदनेनेति केचिद्वै-नाशिका बाह्यार्थवादिनः। अपरे विज्ञानमात्रवादिनः। ननु यदि चित्तमेव द्रष्टाकारं दृश्याकारं चानुभूयते हन्त चित्तादभिन्नावेवास्तां द्रष्टृ दृश्यौ यथाहुः। 'अभिन्नोपि हि बुद्ध्यात्मा विपर्य्यासित दर्शनैः ग्राह्यग्राहक संवित्ति भेदवानिवलक्ष्यते'

योर्थः प्रतिविम्बीभूतस्तस्यालम्बनीभूतत्वादन्यः सचेदर्थ चित्तमात्रं स्यात् कथं प्रज्ञयैव प्रज्ञारूपमवधार्येत तस्मात् प्रतिविम्बीभूतोर्थः प्रज्ञायां येनावधार्यते स पुरुष इति एवं गृहीत्वग्रहणग्राह्यस्वरूपचित्तभेदाख्यमर्थं तत्तज्जातितः प्रविभजन्ते ते सम्यग्दर्शिनस्तैरधिगतपुरुषः ॥२३॥

इतश्चैतत्—

तदसङ्ख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात् ॥ २४ ॥

तदेतच्चित्तमसङ्ख्येयाभिर्वासनाभिरेव चित्रीकृतमपि परार्थं परस्य भोगापवर्गार्थं न स्वार्थं संहत्यकारित्वाद्ग्रह-

इति तत्कथमेतेऽनुकल्पनीया इत्यत आह । समाधिप्रज्ञायामिति ते खलूक्ताभिरूपपत्तिभिश्चित्तातिरिक्तं पुरुषमभ्युपगमयाप्याष्टाङ्गयोगोपदेशेन समाधिप्रज्ञाया आत्मगोचरायामवतार्य बोधयितव्याः । तद्यथा समाधिप्रज्ञायां प्रज्ञे यीर्थः आत्मा प्रतिविम्बीभूतोन्यः कस्मात् तस्यात्मनः आलम्बनीभूतत्वात् अथ चित्तादभिन्नमेव कस्मान्नालम्बनं भवतीति यदि युक्तिबोधितोपि वैजात्यादद्येत् तच्चेतुमाह सचेदात्मरूपोर्थः चित्तमात्रं स्यात् ननु ततो व्यतिरिक्तः ततः कथं प्रज्ञयैव प्रज्ञारूपमवधार्येत स्वात्म निष्ठत्ति विरोधात् उपसंहरति । तस्मादिति समीचीनोपदेशेनानुकल्पिता भवन्तीति आह एवमेतदिति ज्ञातिः स्वभावः इत्यर्थः चित्तातिरिक्तात्म सद्भावे हेत्वन्तरमवतारयति इतश्चेति ॥ २२ । २३ ।

तद्—वित्वात् । यद्यप्यसङ्ख्येयाः कर्मवासनाः क्लेशवासनाश्च चित्तमेवाधिशेरते न तु पुरुषं तथाच वासनाधीनोविपाकाश्चित्तमाश्रयतया चित्तञ्च भोक्तृता

यत् संहत्यकारिणा चित्तेन न स्वार्थेन भवितव्यं न सुखचित्तं सुखार्थं न ज्ञानं ज्ञानार्थमुभयमप्येतत् परार्थं यश्च भोगेनापवर्गेन चार्थेनार्थवान् पुरुषः स एव परो न परः सामान्यमात्रं यत्तु किञ्चित्परं सामान्यमात्रं स्वरूपेणोदाहरिष्यनाग्निकस्तत् सर्वं संहत्यकारित्वात् परार्थमेव स्यात् यस्त्वसौ परोविशेषः स न संहत्यकारी पुरुष इति ॥ २४ ॥

भावहन्ति । भोक्तुरर्थं च भोग्यमिति सर्वं चित्तार्थं प्राप्तं तथापि तच्चित्तमसङ्ख्येय वासना विचित्रमपि परार्थं कस्मात् संहत्यकारित्वादितिसूत्रार्थः । व्याचष्टे यदेतदिति स्यादेतच्चित्तं संहत्यापि करिष्यति स्वार्थं च भविष्यति कः खलु विरोध इति यदि कश्चित् ब्रूयात् तं प्रत्याह । संहत्यकारित्वेति सुखचित्तमिति भोगमुपलक्षयति तेन दुःखचित्तमपि द्रष्टव्यं ज्ञानमित्यपवर्गं उक्तः एतदुक्तं भवति सुखदुःखचित्ते प्रतिकूलानुकूलात्मकेनात्मनि सम्भवतः स्वात्मनि वृत्तिविरोधात् न चान्योपि संहत्यकारी साक्षात् परम्परया वा सुखदुःखे विदधानस्ताभ्यामनुकूलनीयः प्रतिकूलनीयो वा तस्मादयं साक्षात् परम्परया वा न सुखदुःखयोर्व्याप्रियते स एवात्मनुकूलनीयः प्रतिकूलनीयो वा स च नित्योदासीनः पुरुषः एवमपह्नूयते येन ज्ञाने न तस्यापि भेद्य तन्नत्वात् स्वात्मनि च वृत्तिविरोधान्न ज्ञानार्थत्वं न चान्यविषयादाद्यादपवर्गे सम्भवो विदुषः प्रकृतिलयानामपवर्गासम्भवात् तस्मात्तत् ज्ञानमपि पुरुषार्थमेव न तत् स्वार्थं संहतपरार्थत्वे ज्ञानस्य प्रसङ्गादसंहत परार्थ सिद्धिरिति तदेवं कैवल्यमूलबीजं समस्तमात्मदर्शनमुक्त्वा तदुपदेशाधिक्रतं पुरुषमनधिक्रत पुरुषान्तरव्यावृत्तमाह। विशेष इतिचिः यस्मात्मभावे भाव नास्ति तस्मात्तत्र योगोपदेशादवतिष्ठतो युञ्जानस्य तत्परिपाकात् चित्तस्थपुरुषयो र्विशेष दर्शनादात्मभावना निवर्त्तते यस्मात्मभावभावनैव नास्ति नास्तिकस्य तदुपदेशानर्हः

विशेषदर्शिनआत्मभावभावनानिवृत्तिः ॥२५॥

यथा प्रावृषि तृणाङ्कुरस्योद्भेदेन तद्बीजसत्तानुमीयते तथा मोक्षमार्गश्रवणेन यस्य रोमहर्षाश्रुपातौ दृश्येते तत्रापि अस्ति विशेषदर्शनबीजमपवर्गभागीयं कर्माभिनिर्वर्त्तितमित्यनुमीयते तस्यात्मभावभावना स्वाभाविकी प्रवर्त्तते यस्याभावादिदमुक्तं स्वभावं मुक्त्वा दोषाद् येषां पूर्वपक्षे रुचिर्भवत्यरुचिश्च निर्णये भवति । तत्रात्मभावभावना कोऽहमासं कथमहमासं किं स्विदिदं कथं स्विदिदं के भविष्यामः कथं भविष्याम इति सा तु विशेषदर्शिनो निवर्त्तते कुतः चित्तस्यैवैष विचित्रः परिणामः पुरुषस्वेषु यामविद्यायां शुद्धश्चित्तधर्म्मैरपरामृष्ट इति ततोऽप्यात्मभावभावनाकुशलस्य निवर्त्तते इति ॥ २५ ॥

कृतेस्यापरिनिश्चितात्मा तत्परलोकभावस्य नोपदेशो न विशेषदर्शनं नात्मभावभावना निवृत्तिरिति सूत्रार्थः ॥ २४ ॥

तत्रात्मभाव भावनायाः चित्तवर्त्तिन्याः कुतोवगम इत्यत आह । यथा प्रावृषीति प्राग्भवीयं तत्त्वदर्शनबीजमपवर्गभागीयं यत्कर्माष्टाङ्गयोगानुष्ठानं तदेकदेशानुष्ठानं वा तदभिनिर्वर्त्तितं मन्तव्यमनुमीयते तस्यचात्मभावभावनावस्तुनैव स्वाभाविकी वस्त्वभ्यासं विनापि प्रवर्त्तते अनधिकारिव्यभागमिनां वचनेन दर्शयति यस्याभावादिदमिति पूर्वपक्षःनास्तिकर्म्मफलं परलोकिनोभावात् परलोकाभाव इति तत्र रुचिरुचिश्च निर्णये पक्षविभ्रमति तत्र विषये आत्मभावभावना प्राग्व्याख्यातविशेष दर्शिनः परामर्शमाह । चित्तस्यैवेति तस्य विशेषदर्शनकुशलस्यात्मभावना विनिवर्त्तते इति ॥ २५ ॥

तदाविवेकनिम्नं कैवल्यप्राग्भारं चित्तम् ॥२६॥

तदानीं यदस्य चित्तं विषय प्राग्भावमज्ञाननिम्नमासीत्तदस्यान्यथा भवति कैवल्यप्राग्भवं विवेकजज्ञाननिम्नमिति ॥ २६ ॥

तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥२७॥

प्रत्ययविवेकनिम्नस्यसत्वपुरुषान्यताख्यातिमात्रप्रवाहिनश्चित्तस्य तच्छिद्रेषु प्रत्ययान्तराण्यकौतिवा ममेति वा जानामीति वा न जानामीति वा कुतः क्षीयमाणबीजेभ्यः पूर्वसंस्कारेभ्यः इति ॥ २७ ॥

हानमेषां क्लेशवदुक्तम् ॥ २८ ॥

यथा क्लेशा दग्धबीजभावना प्ररोहसमर्था भवन्ति तथा ज्ञानाग्निना दग्धबीजभावः पूर्वसंस्कारो न प्रत्ययप्रसूर्भवति

अथ विशेष दर्शिनः कोदृग्यं चित्तमित्यत आह । तदा—चित्तं । निगदव्याख्यातं ॥ २६ ॥ स्यादेतद्विशेष दर्शनं चेद्विवेक निष्ठं न जातु चित्तं व्युत्थितं स्याद्दृश्यते चासभिचामटती व्युत्थित मित्यत आह । त—भ्यः । प्रत्ययेति प्रतीयते येनस प्रत्ययश्चित्त सत्वं तस्याविवेकख्यितेः । तेन निम्नस्य जानामीति साक्षात् मीक्षीविविच्य दर्शिंती न जानामीति मोहसन्मूलावहङ्कार ममकारावह मकौति वा ममेति दर्शिंती क्षीयमाणानि च तानि बीजानि चेति समासः पूर्व संस्कारेभ्यो: व्युत्थान संस्कारेभ्यः । २७ ॥

स्यादेतत् सत्यपि विवेकज्ञाने व्युत्थान संस्कारा यदि प्रत्ययान्तराणि

ज्ञानसंस्काराश्च चित्ताधिकारसमाप्तिमनुशेरत इति न चिन्त्यते ॥ २८ ॥

प्रसङ्ख्यानेप्यकुसीदस्य सर्व्वथा विवेकख्यातेर्धर्म्ममेघः समाधिः ॥ २९ ॥

यदायं ब्राह्मणः प्रसङ्ख्यानेप्यकुसीदस्ततोपि न किञ्चित् प्रार्थयते तदापि विरक्तस्य सर्व्वथा विवेकख्यातिरेव भवतीति संस्कारबीजक्षयान्नास्य प्रत्ययान्तराण्युत्पद्यन्ते तदास्य धर्म्ममेघोनाम समाधिर्भवति ॥ २९ ॥

प्रसुवते कस्मादिति ज्ञानहेतवे तेषां यतः प्रत्ययान्तराणि न पुनः प्रसुवीरन्नित्यत आह। ज्ञान—क्लं। अपरिपक्व विवेकज्ञानस्याक्षीयमाणा व्युत्थान संस्कारा प्रत्ययान्तरं प्रसुवते न तु परिपक्व विवेकज्ञानस्य क्षीणाः प्रत्ययान्तराणि प्रसोतुमर्हन्ति यथा विवेकच्छिद्र समुत्पन्ना अपि क्लेशा न संस्कारान्तरं प्रसुवते तत्कस्य हेतोःतदैते क्लेशा विवेकज्ञान वह्निदग्धबीजभावा इति एवं व्युत्थान संस्कारा अपीति अव्युत्थान संस्कारा विवेकज्ञान संस्कारै निरोद्धव्याः विवेक संस्काराश्च निरोधसंस्कारैः निरोध संस्काराणाञ्च वाह्यविषयत्वं दर्शितं निरोध उपायः प्रायश्चित्तनीय इत्यत आह। ज्ञानसंस्कारा क्षिति परश्चैवाग्य संस्कारा इत्यर्थः ॥ २८ ॥

तदेवं सूत्रकारो व्युत्थान निरोधोपायं प्रसङ्ख्यानमुक्त्वा प्रसङ्ख्यान निरोधोपाय माह। प्र—समाधिः ततःप्रसङ्ख्यानान्नकिञ्चित् सर्व्वभावाधिष्ठातृत्वादिप्रार्थयते प्रत्युत तत्रापि क्लिश्यति परिणामित्वदोषदर्शनेन विरक्तः सर्व्वथा विवेकख्यातिरेव भवति एतदेव विवृणोति तत्रापीति यद्यव्युत्थान प्रत्यया भवेयुः तदा नायं ब्राह्मणः सर्व्वथा विवेकख्यातिः यतस्तस्य न प्रत्ययान्तराणि भवन्ति ततः सर्व्वथा विवेकख्याति

ततः क्लेशकर्म्मनिवृत्तिः ॥ ३० ॥

तन्नाभाद्विद्यादयः क्लेशाः समूलकाषं कषिता भवन्ति कुशलाकुशलाश्च कर्म्माशयाः समूलघातं हता भवन्ति क्लेशः कर्म्मनिवृत्तौ जीवन्नेव विद्वान विमुक्तो भवति कस्मात् यस्माद्विपर्य्ययो भवत्यकारणं न हि क्षीणविपर्य्ययः कश्चित् केनचित् क्वचिज्जातो दृश्यते इति ॥ ३० ॥

तदा सर्व्वावरणमलापेतस्य ज्ञानस्यानन्त्यात् ज्ञेयमल्पम् ॥ ३१ ॥

सर्व्वैः क्लेशकर्म्मावरणैर्विमुक्तस्य ज्ञानस्यानन्त्यं भवति तमसाभिभूतमावृतं ज्ञानसत्वं क्वचिदेव रजसा प्रवर्त्तित उद्घाटितं ग्रहणसमर्थं भवति तत्र यदा सर्वैरावरणमलैरपगतमलं भवति तदा भवत्यस्यानन्त्यं ज्ञानस्यानन्त्या

रिति तदाख्यधर्म्ममेघःसमाधिर्भवति । एतदुक्तं भवति प्रसङ्ख्याने विरक्तः सन्निरोधे निर्बीजं धर्म्ममेघं समाधिमुपासीत तदुपासनेच सर्व्वथा विवेकख्यातिर्भवति ॥२९॥

तन्निरोधं पारयतीति तस्य च प्रयोजनमाह । ततः। कस्मात् पुनर्जीवन्नेव विद्वान् विमुक्तोभवति उत्तरं यस्मादिति क्लेशकर्म्म वासनेभ्यः किलकर्म्माशयो जात्यादि निदानं स वासति निदाने निदानीभवितुमर्हति यथाहात्र भगवान्बादरायणः "वीतराग जन्मादर्शनादिति" ॥ ३० ॥

धर्म्मेधं धर्म्ममेघे सति कीदृशं चित्तमित्यत आह । तदासर्व्वा—ल्पं । आवियते चित्तसत्वमेभिरिति आवरणानि मलाः क्लेशकर्म्माणि सर्व्वे च ते आवरण मलाश्चेति,

ज्ञेयमल्पं सम्पद्यते यथाकाशे खद्योतः यत्रेदमुक्तं 'अग्नीषोमाभ्यामविध्यत्तमनङ्कुलिरावयत् अग्रीवस्तं प्रत्यमुञ्चत्त मजिह्वोभ्य पूजय' इति ॥ ३१ ॥

ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम् ॥ ३२ ॥

तस्य धर्ममेघस्योदयात् कृतार्थानां गुणानां परिणामक्रमः परिसमाप्यते नहि कृतोभोगापवर्गाः परिसमाप्तक्रमाः क्षणमप्यवस्थातुमुत्सहन्ते ॥ ३२ ॥

सर्वावरणमलाः तेभ्योपेतस्य चित्तसत्वस्य ज्ञानस्य आयते नेनेति अनया व्युत्पत्त्या ज्ञानन्यादपरिमेयत्वात् ज्ञेयमल्पम्। यथा हि शरदि घनपटल मुक्तस्य चन्द्रार्चिषः परितः प्रद्योतमानस्य प्रकाशानल्यात् प्रकाश्याः घटादयोल्पाः प्रकाश्यन्ते एवमपगत रजस्तमसश्चित्तसत्वस्य प्रकाशानल्यादल्पं प्रकाश्यमिति तदेतदाह। सर्व इति एतदेव व्यतिरेकमुखेन स्फोरयति आवरकेण तमसाभिभूत मिति क्रियाशीलेन रजसा प्रवर्त्तित मतएवोद्घाटितं प्रदेशादपनीतं तमइत्यर्थः अतएव सर्वान् धर्म्मान् ज्ञेयान् मेहति धर्षति प्रकाशनेनेति धर्म्ममेघ इत्य च्यते नत्वयमस्तु धर्म्ममेघः समाधि सवासन क्लेशकर्म्माशय प्रशमहेतुः अथ सत्यप्यस्मिन् कस्मात् न जायते पुनर्जन्तुः इत्यत आह। यत्रेदमुक्तमिति कारणसमुच्छेदोपिचेत् कार्य्यक्रियते इन्त भोः मणिवेधादयोन्यादिभ्यो भवेयुः प्रत्यया: तथाचानुपपन्नार्थतायाः नाभाणको लौकिक उपपन्नार्थः स्यात् अविध्यदग्नीषोमणिमिति आवयत् ग्रथितवान् प्रत्यमुञ्चत् पिनद्धवान् अभ्यपूजयत् स्तुतवानिति ॥ ३१ ॥

ननु धर्म्ममेघस्य परा काष्ठा ज्ञानप्रसादमात्रं परं वैराग्यं समूलघातमुपहन्तु व्युत्थान समाधिः संस्कारान् स. क्लेशकर्म्माशयान् गुणास्तु स्वतएव विलयं

अथ कोयं क्रमोनामेति—

क्षणप्रतियोगीपरिणामापरान्तनिर्ग्राह्यः क्रमः॥ ५२॥

क्षणानन्तर्य्यात्मा परिणामस्यापरान्तो भावयं गृह्यते क्रमः नह्यननुभूतक्रमक्षणा पुराणता वस्तुस्थाने भवति नित्येषु च क्रमोदृष्टः द्वयी चेयं नित्यता कूटस्थ नित्यता परिणामनित्यताच तत्र कूटस्थ नित्यता पुरुषस्य परिणामनित्यता गुणानां यस्मिन् परिणम्यमाने तत्व

करणशीलाः कस्मात्तादृशमपि पुरुषं प्रति देवेन्द्रियादिनारभन्त इत्यत आह। ततो—गुणानां। शीलमिदं गुणानां यदमीषं प्रतिक्रियार्थानां प्रति न प्रवर्त्तन इति भावः॥ ५२॥

अथान्तरे परिणामक्रमं पृच्छति। अथ कोयमिति क्षण—क्रमो परिणाम क्षण-प्रति योगीक्षणः प्रतिसम्बन्धी यस्य स तथोक्तः क्षण प्रचयाश्रय इत्यर्थः न जातु क्रमः क्रमवत्तमन्तरेण शक्योनिरूपयितुं नचैकस्मिन्क्षणस्य क्रमः तस्मात् क्षणप्रचयाश्रयः परिशिष्यते तदिदमाह क्षणानन्तर्य्यति। परिणामक्रमे प्रमाणमाह परिणामस्येति नवस्यहि वस्त्रस्य प्रयत्न संरचितस्यापि चिरेण पुराणता दृश्यते सोयं परिणाम-स्यापरान्तः पर्य्यवसानं तेन हि परिणामस्य क्रमः ततः प्रागपि पुराणतायाः सूक्ष्म सूक्ष्मतर सूक्ष्मतम स्थूल स्थूलतर स्थूलतमत्वादीनां पौर्वापर्य्यमनुमीयते एतदेव व्यति-रेक मुखेन दर्शयति नह्येति अननुभूतोऽग्राह्यः क्रमक्षणो यया सा तथोक्ता नन्वेष क्रम प्रधानस्य न सम्भवति तस्य नित्यत्वादित्यत आह। नित्येषु चेति बहुवचनेन सर्व्वनित्यव्यापितां क्रमस्य प्रतिजानीते तत्र नित्यानां प्रकारभेदं दर्शयित्वा नित्य-व्यापितां क्रमस्य उपपादयति॥ द्वयीति ननु कूटस्थं स्वभावादप्रच्युतमस्तु नित्यं यदि परिणामि सदेव स्वरूपात् च्यवमानं कथं नित्यमित्यत आह। यस्मिन्निति

न विहन्यते तन्नित्यं उभयस्य च तत्वानभिघातान्नित्यत्वं गुणधर्म्मेषु बुद्ध्यादिषु परिणामापरान्तनिर्ग्राह्यः लब्धपर्य्यवसानो नित्येषु धर्म्मिषु गुणेष्वलब्धपर्य्यवसानः कूटस्थनित्येषु स्वरूपमात्रप्रतिष्ठेषु मुक्तपुरुषेषु स्वरूपास्थिता क्रमेणैवानुभूयत इति तत्राप्यलब्धपर्य्यवसानः शब्दपृष्ठे नास्ति क्रियामुपादाय कल्पित इति अथास्य संसारस्य स्थित्या गत्याच गुणेषु वर्त्तमानस्यास्ति क्रमसमाप्तिर्न वेति अवचनीयमेतत् कथं अस्ति प्रश्न एकान्तवचनीयः धर्म्मलक्षणावस्थानामुदयव्ययधर्म्मत्वं धर्म्मिणस्तु तत्तादविघात एवेति अथ किं परिणामापरान्तनिर्ग्राह्यता सर्व्वक्रमस्य नेत्याह तत्र गुणधर्म्मेषु बुद्ध्यादिष्विति यतो लब्धपर्य्यवसानः धर्म्माणां विनाशात् प्रधानस्य तु परिणामक्रमोनलब्धपर्य्यवसानः। ननु प्रधानस्य धर्म्मरूपेण परिणामादस्तु परिणामक्रमः। पुरुषस्यत्वपरिणामिनः कुतः परिणामक्रम इत्यतआह कूटस्थेति तत्र बुद्धानां चित्ताव्यतिरेकाभिमानात् तत्परिणामेनपरिणामाध्यासःमुक्तानांचास्तिक्रियामुपादायावास्तवीपिपरिणाममीक्षकल्पितः शब्दस्य पुरःसरतया तत् पृष्ठोविकल्पोऽस्ति क्रियामुपादत्त इति गुणेष्वलब्धपर्य्यवसानः परिणामक्रमइत्युक्तम् तदसहमानः पृच्छति अथेति। स्थित्येति महाप्रलयावस्थायां गत्येति सृष्टौ एतदुक्तम्भवति यद्यानन्तात्परिणामसमाप्तिः संसारस्य इत्यभीः कथं महाप्रलयसमये सर्व्वेषामात्मनां सह संसारसमुच्छेदीत कथञ्च सृष्टादौ सहसीत्पद्येत संसारः तस्मादेकैकस्यात्मनोमुक्तिक्रमेण सर्व्वेषां विमोक्षादुच्छेदः सर्व्वेषां संसारस्य क्रमेणेति प्रधान परिणाम क्रम परिसमाप्तिः एवञ्च प्रधानस्याप्यनित्यत्व प्रसङ्गः न चापूर्व्वसत्व प्रादुर्भाव इष्यते येनानित्यं स्यात् तदसत्वनाद्वित्वमाहतेः सकलशास्त्रार्थ भङ्गप्रसङ्ग इतिभावः। उत्तरमाह अवचनीयमनुत्तरार्द्धमेतत् एकान्ततएव तस्यावचनीयतां दर्शयितुमेकान्तवचनीयं प्रश्नं दर्शयति।

सर्वोजातो मरिष्यति ओं भो इति अथ सर्वो वा जनिष्यत इति विभज्य वचनीयमेतत् प्रत्युदितख्यातिः क्षीणक्लेशः कुशलो न जनिष्यते इतरस्तु जनिष्यते। तथा मनुष्यजातिः श्रेयसी न वाश्रेयसीयेवं परिदृष्टे विषये वचनीयः प्रश्नः पशूनधिकृत्य श्रेयसी देवादृष्टीश्चाधिकृत्य नेति अयत्नवचनीयः प्रश्नः संसारोयमत्रत्राणस्थानन्त इति कुशलस्यास्ति संसारक्रमपरिसमाप्तिर्नेतरस्येति अन्यतरावधारणे दोषः तस्माद्विभजनीयएवायं प्रश्न इति ॥३३॥

अस्ति प्रश्न इति सर्वेजातो मरिष्यति प्रश्नउत्तरं ओं भोः इति स सर्वं प्रति इत्यर्थः अविभज्य वचनीयमुक्त्वा प्रविभज्यवचनीयं प्रश्नमाह। अथ सर्वे इति विभज्य वचनीयतामाह विभज्येति विभज्य वचनीयमेव प्रश्नान्तरं विवेचयन्नाह तथा मनुष्येति अयत्नवचनीय ऐकान्तिकः न हि सामान्येन कुशलाकुशलस्य पुरुषसंसारस्यान्तवत्त्वमनन्तवत्त्वं वा शक्यमेकान्ततो वक्तुं यथा प्राणभृन्मात्रस्य श्रेयस्त्वमश्रेयस्त्वं वानैकान्ततः शक्यमवधारयितुं यथा जातमात्रस्य मरणमेकान्ततो विभज्य पुनः शक्यमवधारयितुमित्याह। कुशलेति अयमभिसन्धिरत्रेह मोक्षे सर्वेषां मोक्षात् संसारोच्छेद इत्यनुमानं तत्रागमनुसिद्ध मोक्षाश्रयं तथाविधमुपगत मोक्ष प्रतिपादकागम प्रमाणभावः कथं तमेवागमं प्रवान विकल्पः नियतायामप्रमाणो कुर्यात् तस्मादागमाश्रयित विषयमेतदनुमानं न प्रमाणं भूयते हि श्रुति स्मृति इतिहास पुराणेषु सर्गप्रतिसर्ग परम्पराया अनादित्वमनन्तत्वं केति अपिच सर्वेषामेवात्मनां संसारस्य न तावद् युगपदुच्छेदः सम्भवी न हि पण्डितकृपाणामप्यनेक जन्मपरम्पराभ्यास परिश्रमसाध्या विवेकख्याति प्रतिष्ठा किं पुनः प्राणभृन्मात्रस्य स्थावर जङ्गमादेरेकदाऽकस्मात् भवितुमर्हति न च कारणायौगपद्ये कार्ययौगपद्यं युज्यते

गुणाधिकारक्रमसमाप्तौ कैवल्यमुक्तं तत्स्वरूपमवधार्यते—

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ॥ ३४ ॥

कुतः भोगापवर्गानां पुरुषार्थशून्यानां यः प्रतिप्रसवः कार्यकारणात्मनां गुणानां तत् कैवल्यस्वरूपप्रतिष्ठा पुनर्बुद्धिसत्त्वानभिसम्बन्धात् पुरुषस्य चितिशक्तिरेव केवला तस्याः सदा तथैवावस्थानं कैवल्यमिति ॥ ३४ ॥

क्रमेण तु विवेकख्यातावसंख्येयानां क्रमेण मुक्तौ न संसारोच्छेदः अनन्तत्वाज्जन्तूनामसङ्ख्येयत्वादिति सर्वमवदातम् ॥ ३३ ॥

कैवल्यरूपावधारणं परस्य सूत्रस्यावान्तरसङ्गतिमाह गुणाधिकारेति पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति। कुतः हेयतया पुरुषार्थशून्यानां यः प्रतिप्रसवः स्वकारणे प्रधाने लयः तेषां कार्यकारणात्मनां गुणानां व्युत्थानसमाधिनिरोधसंस्कारा मनसि लीयन्ते मनोऽस्मितायां अस्मिता लिङ्गे लिङ्गमलिङ्गे इति यो यं गुणानां कार्यकारणात्मकानां प्रतिसर्गः तत्कैवल्यं यं कञ्चित् पुरुषं प्रति प्रधानस्य भोगः स्वरूपप्रतिष्ठा पुरुषस्य वा भोग इत्याह। स्वरूपेति। अस्ति हि महाप्रलयेऽपि स्वरूपप्रतिष्ठा चितिशक्तिः न चासौ भोग इत्यत आह। पुनरिति सोऽयं इतिशब्दः शास्त्रपरिसमाप्तौ ॥ ३४ ॥

इति श्रीपातञ्जले योगशास्त्रे साङ्ख्यप्रवचने कैवल्यपादश्चतुर्थः सम्पूर्णः ॥

॥ ग्रन्थाग्रं समाप्तः ॥

मुक्तार्हं चित्तं परलोकमेयं ऋसिद्धयो धर्ममयः समाधिः ।
द्वयी च मुक्तिः प्रतिपादितास्मिन् पादे प्रसङ्गादपि चान्यदुक्तम् ॥
निदानं तापानामुदितमथ तापाश्च कथिताः
संहारैरष्टाभिर्विदितमिह योगश्चयमपि ।
कृतीमुक्तैरध्वा गुणपुरुषभेदः स्फुटतरो
विविक्तं कैवल्यं प्रसृगणिततापा चितिरसौ ॥ ४ ॥

इति श्रीवाचस्पतिमिश्रविरचितायां पातञ्जलभाष्यव्याख्यायां कैवल्यपादश्चतुर्थः समाप्तः ॥

॥ ग्रन्थाग्रं समाप्तः ॥

CHL

11 AUG 1932

1 APR 19

00042122

Digitized with financial assistance from
Hemendra Kothari
on 06 November, 2019